॥ ॐ श्रीगणेशायनमः पुराजपुरुषंध्यात्वा नत्वाचार्हंत नायकम्॥ सिद्धांतचंद्रिकावृत्तिं चर्करीमितरामहम् १ विद्यारत्नपयोनिधौरव
रतराम्नाये जगत्पूज्यके श्रीभट्टारकसंपदंगुणगणैः स्तुत्यांधरन्पुण्यवान्पूज्यश्रीजिन भक्तिसूरिरधिपो वर्वर्तिविद्यानिधिः सोयंसीतकरायतेच-
यशसासूरायतेतेजसा २ श्रीकीर्तिरत्नसूर्यार्हीयतींद्रोःभूत्तरांततः श्रीमत्सुमतिरंगाख्यःपाठकःप्रवरस्ततः ३ श्रीपाठकाःश्रीस्फुरवलाभसंज्ञाजा
ग्रत्प्रभावा विलसत्प्रतिज्ञाः तच्छिष्यवर्याःकृतिराजिधुर्याःश्रीपाठकाःपाठकवारणेद्राः ४ श्रीभागचंद्रांगणिसंप्रवर्हाःसंवेगरंगांगनिमग्नगात्राः
श्रीभक्तिपूर्वं विनयांहियेषां त्वंनामधेयंगुरवोवदंति ५ तेषांहितेषांविनयप्रधानोऽनवद्यविद्याभ्यसनैकतानः प्राज्ञःसदानंदगणिःसुशिष्यःसु
बोधिनींसंविदधातिवृत्तिं ६ ग्रंथादौग्रंथमध्येग्रंथांतेचमंगलमाचरणीयमिति शिष्टाचारस्तत्र मंगलंत्रिविधमाशीर्वादात्मकं नमस्कारात्मकं व-
स्तुनिर्देशात्मकंचेति अथग्रंथादौ ग्रंथकर्तारामाश्रमो नमस्कारात्मकं मंगलंशिष्यशिक्षायैनिबध्नाति अहंसिद्धांतचंद्रिकांकुर्वे प्रमाणेनप्राप्तोर्थःसिद्धा
न्तःपिधूशास्त्रादावस्माद्गत्यर्थादितिक्तः सिद्धोनिष्पन्नोऽन्तोनिश्चयोऽत्रेतिसिद्धांतःसिद्धांतेचन्द्रिकेवचंद्रिकाशाकपार्थिवादित्वान्मध्यमपदलोपःसि
द्धांतचंद्रिकातां चन्द्रज्योतिरिवप्रकाशिकामित्यर्थः सकलजनाल्हादकत्वंसाम्येनचन्द्रिकाशब्दप्रयोगः चन्द्रोऽस्त्यस्यामिति चन्द्रिकाअइकौ
चमत्वर्थेइतिकः चंद्रंकायति प्रतिपादयतीति वाचन्द्रिका आतोऽचंद्रमाचष्टे इतिवाचन्द्रिका कुन् चन्द्रिका कौमुदीज्योत्स्ने
त्यमरः कुर्वेइतिलट् उत्तमपुरुषस्यैकवचनं आख्यातप्रत्ययस्तुकर्तर्यस्ति कर्तुराख्यातेनोक्तत्वादाख्यातवाच्यकारकवाचकःप्रथमांनो
मिति कर्तासंगृह्यते कुर्वेइत्यत्र य्वोर्विहसेइतिदीर्घस्तुनभवति कुरुछुरोर्नेति निषेधात् ननु करिष्यमाणायाश्चान्द्रिकायाः कथंकुर्वेइ
तिवर्तमाननिर्देशः उच्यते वर्तमानसमीपेभूते भविष्यति चेतिभविष्यदर्थेलट् केषां सिद्धान्तइत्यतआह वाण्याप्रणीतानिवाणी
प्रणीतानि वाणीप्रणीतानिसूत्राणि वाणीप्रणीतसूत्राणि तेषांवणशब्देपचाद्यः वणोब्रह्मा देवतेदमर्थेइत्यण् ततोऽणईवितीश
वाणी वाणयति प्रेरयति जीवानिति ण्यंताद्धाचाद्यः नदादेरितीप्वानियः कर्मणिक्तः सूत्रवेष्टनेचुरादिः सूत्रयंतिबहूनर्थानल्पाक्षरैरि
तिसूत्राणि पचाद्यः गीर्वाग्वाणीसरस्वतीत्यमरः किंकृत्वा महेशानंनमस्कृत्य महांश्चासावीशानश्चेतिमहेशानः शंभुस्तं सहादित्वाँच्छ

द्दस्यमहाइष्टे इतीशानः कर्तरिशानः नमस्कृत्येतिपूर्वकाले क्त्वोति क्त्वा स्थाने समासेक्त्वयितिभावेक्त्वप् वाचस्पत्यादित्वा द्विसर्गस्यसः । अनुक्तत्वात्कर्म्मणि द्वितीयामहेशानमिति एककर्तृकयोर्द्वयोः कृत्ययोः कर्तरि प्रथमास्तिविशेष्यया ऽऽख्यातक्रियया कर्तुरुक्तत्वात् गौणमुख्ययोर्मुख्येकार्यैसंप्रत्यय इतिन्यायादाख्यातक्रियया कर्तुरभिसंबंधः ननुमहेशानमित्यत्र नमआदियोगे इतिचतुर्थीस्यात् मैवंवद नमस्करोतिदेवानित्यत्रेव द्वितीयैवभुक्ताउपपदविभक्तेः कारकविभक्तिर्बलीयसीत्युक्तत्वात् स्वयंभुवेनमस्कृत्येत्यत्र तुस्वयंभुवमनुकूलयितुमित्यर्थविवक्षायां नतुनमः प्रयुक्तस्यकर्मणीत्यनेनचतुर्थी किंच जहत्स्वार्थावृत्तिपक्षेनमः शब्दस्यार्थनिरर्थकत्वान्नमोयोगे चतुर्थी नभवतिअर्थवद्ग्रहणेनानर्थकस्यग्रहण

॥ श्रीगुरवेनमः ॐ नमस्कृत्यमहेशानंमतंबुध्वापतंजलेः ॥ पाणीप्रणीतसूत्राणां कुर्वेसिद्धांतचंद्रिकाम् ॥ १ ॥

मित्युक्तत्वात् पुनः किंकृत्वापतंजलेर्मतंबुध्वाज्ञात्वापतंजलिना मन्यते यत्तन्मतं मतिबुद्धीतिवर्तमाने कर्मणिक्तः वर्तमानाधारार्थस्यक्तस्येत्यनेनपतंजलेरितिकर्तरिषष्ठीबुधअवगमने भावेक्त्वाप्रत्ययः पतंतोऽजलयोयास्मिन् सपतंजलिः शेषनागः तस्यपतंजलेः हलादेरीषादावितिटिलोपः किंच आसनं ब्रह्मणस्तस्यतपसामुत्तमंतपः प्रथमंछंदसामंगमाहुर्व्याकरणंबुधाः ॥ १ ॥ अर्थप्रवृत्तितत्वानांशब्दाएवनिबंधनम् तत्वावबोधःशब्दानांनास्तिव्याकरणादृते ॥ २ ॥ इत्युक्तत्वात्सर्वतउत्तमंव्याकरणं तद्व्याकरणसूत्रंसूत्रव्याख्यानं वाक्याध्याहारः उदाहरणम् प्रत्युदाहरणंचेतिसमुदितंभवतितस्यैकदेशः सूत्रंतद्व्याख्यानंपंचधाययापदच्छेदः पदार्थोक्तिर्विग्रहोवाक्ययोजना आक्षेपस्यसमाधानंव्याख्यानंपंचधास्मृतमिति ॥ १ ॥

अइउऋलृसमानाः संज्ञासूत्रमिदं आद्यंताभ्यामित्यनेनसंज्ञाविधायकसूत्रेणसहैकवाक्यत्वात् तेनावेल इत्यादिप्रत्याहारसंज्ञासिध्यतिअत्रा
कारादिष्वर्थवत्सुसत्स्वपिस्वरूपग्रहणस्येष्टत्वेनार्थवत्वस्याविवक्षित त्वमस्तिअर्थवत्वाभावान्नप्रातिपदिकसंज्ञाप्रातिपदिकत्वाभावान्नस्यादिवि
भक्त्युत्पत्तिः अविभक्तिकानांसमासोनभवतिपदानामेवसमासइत्युक्तत्वात्समासाभावाद्वाक्यमात्रतःसंकेतितंषट्पदमिदंसूत्रंननुसंधिःकथंनकृ
तः उच्यतेवर्णानामसंदिग्धत्वेनबोधनायाऽविवक्षितत्वादेतेषुसंधिःउक्तंचसंहितैकपदेनित्यानित्याधातूपसर्गयोः नित्यासमासेवाक्येतुसाविवक्षाम
पेक्षते ॥ १ ॥ इतिसंहितात्रसंधिःएकमेवपदमित्येकपदं तत्रसंहितानित्यायथादेवौधातूपसर्गयोरुभयोःसंहितानित्याप्रेस्यतेसमासेसंहितानित्याअ-
वांतरपदविभागाभावात् समासेह्येकपदत्वात् यथादेवन्द्रः सासंहितावाक्येविवक्षांवक्तुमिच्छामपेक्षतेयथा हेरोहिणित्वमसिशीलवतीसुधन्या एनंनि
वारयपतिंसारविदुर्विनीतं इत्यादिषुविवक्षाधीनासंहिताज्ञेयातेनवाक्येविवक्षितःसंधिर्भवतिनत्व[illegible]विवक्षितइतिस्वराणांचादिषुपाठान्निपातसंज्ञा

अइउऋलृसमानाः अनेनक्रमेणैते वर्णाज्ञेयाः तेचसमानसंज्ञाः स्युः ॥ २ ॥

अनिपातइतिप्रकृतिभावान्नसंधिरित्यन्येवदंति ननु वर्णात् कार इत्यनेनैभ्यः कारप्रत्ययःकथं नस्यात् उच्यतेवार्तिकं दृष्ट्वा सूत्रकृतः प्रवृ-
त्त्यसंभवान्नकारप्रत्ययः ननु अकाराद्युपदेशेन यथा तत्सवर्णानामाकारादीनांलाभात्पृथगाकारादयोनोपदिष्टास्तथा ऋलृवर्णयोरपिसाव-
र्ण्यादृकारोपदेशेनैवोभयग्रहणसिद्धेः किंपृथगुपदेशः उच्यते ऋलृवर्णयोः सावर्ण्यस्यानित्यतांज्ञापयितुमुभयोरुद्देशः तत्फलंतुकॢप्ताशि
खायस्य सकॢप्ताशिखस्तस्यदूरात्संबोधनेकॢप्तशिखेत्यत्रप्लुतभवनंऋलृवर्णयोःसावर्ण्यस्यानित्यत्वेतुगुरोरनृतोनंत्यस्यापीत्यत्रानृतइतिनि
षेधादृकारस्येव लृकारस्यापिप्लुतोनस्यादित्यर्थः इदंसूत्रंकार्यद्वयंवक्तितत्किं अकारादिक्रमंतेषांसमानसंज्ञांचसमानंमानंपरिमाणं ये
षांते समानाः समानशब्दःसंज्ञाअकारादयःसंज्ञिनइतिइहप्रत्येकमकारादीनांसंज्ञानसमुदायस्यतस्ययुगपल्लक्ष्येप्रयोगाभावात्स
मानसंज्ञाप्रदेशाः समानाद्धेर्लोपोधातोरित्यादयः छ छ छ

किंच एतेषूक्तवक्ष्यमाणेषु सूत्रेषुसंधिः संहितानानुसंधेयो नकर्तव्यः कस्माद्वक्तुमिच्छाविवक्षाविवक्षाजाता ऽस्येतिविवक्षितः वक्तुमि
ष्टोविवक्षित इतिवा विवक्षितस्यभावोविवक्षितत्वं नविवक्षितत्वं अविवक्षितत्वं तस्मादविवक्षितत्वात् वक्तुरनिष्टत्वात् तथाहिवाक्ये
तुसा विवक्षामपेक्षतेइति ह्रस्वदीर्घप्लुतभेदाः सवर्णाः एतेषां अइउ ऋलृवर्णानां येभेदाविशेष व्यक्तयो ह्रस्वदीर्घप्लुतरूपाः सजाती-
याः समानाचासौजातिश्च सजातिः सहादित्वात्समानस्य सादेशः सजातौभवाः सजातीयास्तेमिथः सवर्णसंज्ञका आचार्येण कथ्यंते
ह्रस्वश्चदीर्घश्चप्लुतश्चते ह्रस्वदीर्घप्लुताः ह्रस्वदीर्घप्लुताश्च ते भेदाश्च ह्रस्वदीर्घप्लुत भेदाः जातिस्थानाभ्यां समानाः वर्णाः सहादित्वात्स
मानस्यसः ऋलृवर्णौच जातिस्थानाभ्यां भिन्नत्वेनसावर्ण्याप्राप्तौ विध्यर्थं वचनं पदांतानां समाना नामितिप्रकृतिभावः एतावपि सव
र्णसंज्ञकावाचार्येण कथ्येते सवर्णसंज्ञाप्रदेशाः सवर्णदीर्घः सहेत्यादयः एकमात्रो ह्रस्वः तेषांभेदानाह मात्राशब्देनाऽक्षिस्पंदनप्रमाणः

नैतेषुसूत्रेषुसंधिरनुसंधेयोऽविवक्षितत्वाद्विवक्षितस्तुसंधिर्भवतीतिनियमात् ह्रस्वदीर्घप्लुतभेदाः सवर्णाः एते
षां ह्रस्वदीर्घप्लुताः सजातीयाः परस्परंसवर्णाभण्यंते ऋलृवर्णौच एकमात्रो ह्रस्वः द्विमात्रोदीर्घः त्रिमात्रः प्लुतः एऐओ
औसंध्यक्षराणि

काल उच्यते मात्रं त्ववधृतौस्वार्थेकात्र्स्न्ये मात्रापरिच्छदे अक्षरावयवे द्रव्ये माने ऽल्पेकर्णभूषणे कालेवृत्तेचेति हेम
चन्द्रः एकामात्रोच्चारणकालो यस्यस एकमात्रो ह्रस्वसंज्ञः कथ्यते ह्रसति ह्रसते वादीर्घापेक्षयेति ह्रस्वः द्विमात्रोदीर्घः द्वेमात्रेउच्चा
रणकालोयस्यस द्विमात्रोदीर्घसंज्ञः कथ्यते दृणाति दीर्यते वासुखमितिदीर्घः त्रिमात्रः प्लुतः तिस्रो मात्रा उच्चारण कालो यस्यस त्रिमात्रः
प्लुतसंज्ञः कथ्यते प्लवते लंघते ह्रस्वदीर्घावितिः प्लुतः एऐ ओऔसंध्यक्षराणि पूर्वपद वाक्यत्वात्संच पदमिदंसूत्रं अत्रापिसंध्यभावोऽविव
क्षितत्वात् इदमपि कार्यद्वयंवक्ति तत्किम् एकारादिक्रमं संध्यक्षरसंज्ञांच संधौजातान्यक्षराणि संध्यक्षराणि संध्यक्षरसंज्ञाप्रदेशाः सं
ध्यक्षराणामित्यादयः ७ ७ ७ ७ ७

उभयेस्वराः उभा ववयवौ येषां ते उभये तयडयटौ संख्याया अवयवे इत्ययट् स्वरो नासासमीरे स्यान्मध्यमादित्रिकस्वरे उदात्तादावका
रादौ षड्जादौ च ध्वनौ पुमान् १ इत्याद्यकारादिभिन्नार्थांतरवारणायेदं ह्रस्वदीर्घप्लुताभेदाविशेषव्यक्तयो येषां ते ह्रस्वदीर्घप्लुतभेदाः
एतादृशाअकारादयः एकारादयश्चाचार्येणस्वरसंज्ञकाः कथ्यंते स्वयंराजंते शोभंते इतिस्वराः राजृदीप्तावस्मान्नाम्नीतिडप्रत्ययः एका
किनोपि प्रायोऽर्थप्रतिपादने समर्था इत्यर्थः स्वराइतिबहुवचनंतु प्रत्येकं संज्ञाविधानार्थं ज्ञेयम् ननु उभये इति ग्रहणंव्यर्थम् अकारादीना-
मेकारादीनांचानुवृत्त्यैव लब्धत्वात् उच्यते अनन्तरस्य विधिर्वाप्रतिषेधो वेति न्यायोऽनेनज्ञाप्यते अनंतरत्वादेकारादीनामेवानुवृत्तिःस्या
त् नत्वकारादीनामन्तरितत्वादिति स्वरसंज्ञाप्रदेशाः इयंस्वरे इत्यादयः अवर्जानामिनः अश्च आश्च तयोःसमाहारः अमिति केचित्तन्मंदं अइ
त्यनेनाऽत्वजरतेरेवाभिमतत्वात् अं वर्जयंतीत्यवर्जाः वृजिवर्जने चुरादिरस्मात् कार्येऽणित्यण्प्रत्ययः पूर्वसूत्रादुभये त्यनुवर्तनीयं अव

उभयेस्वराः अकारादयएकारादयश्च स्वराउच्यंते अवर्जानामिनः अवर्णवर्जाः स्वरानामिन उच्यंते ॥

र्णवर्जाउभयेअकारादय एकारादयश्च स्वरानामिसंज्ञका आचार्येणकथ्यंते नमनंनामः भावे घञ् नामो विद्यतेऽस्यास्तीतिना मीनामि
संज्ञाप्रदेशा नामिनोर इत्यादयः किंच स ह्रस्वदीर्घप्लुतरूपः स्वरः प्रत्येकमुदात्तादि भेदेनत्रिधाऽस्ति ह्रस्वस्वरउदात्तः १ ह्रस्वस्वरोऽनुदात्तः
२ ह्रस्वः स्वरः स्वरितः ३ दीर्घस्वरउदात्तः १ दीर्घस्वरोऽनुदात्तः २ दीर्घस्वरः स्वरितः ३ प्लुतस्वर उदात्तः १ प्लुतस्वरोऽनुदात्तः २ प्लुतस्वरः
स्वरितः ३ एवंनवविधोपि प्रत्येकमनुनासिकाननुनासिकभेदाभ्यां पुनः स द्विधाऽस्ति तदित्थं अइउऋ एषां चतुर्णांवर्णानाम् प्रत्येक
मष्टादशभेदाः संति लृवर्णस्य द्वादशभेदास्तस्यदीर्घाभावात् संध्यक्षराणामपि प्रत्येकं द्वादशभेदास्तेषां ह्रस्वाभावात् अइत्यष्टादशा
नां संज्ञा तथैकारोकारौ ऋकारस्त्रिंशतः संज्ञा ऋलृवर्णयोः सावर्ण्यात् एवं लृकारोपि ए इति द्वादशानां संज्ञा तथैकारौकारौकाराः एदैतो-
रोदौतोश्च नामियः सावर्ण्यं भिन्नजातित्वात्[२]

हयवरल १ अणनयङ २ झदधघभ ३ जडदगब ४ खफछठथ ५ चटतकप ६ शषस ७ एतेपिवर्णा उक्तक्रमेणैवज्ञेयाः अन्यथा प्रत्यां-
हारासिद्धेः एतानिनवसंज्ञासूत्राणिसंति आद्यंताभ्यामित्यनेनैकवाक्यत्वात् एषांवर्णानामर्थस्याविवक्षितत्वादेभ्योविभक्तेर नुत्पत्तिर्ज्ञे-
या किंच सवर्णाइत्यनुवर्त्यवाक्यभेदेनव्याख्यातव्यम् तद्यथा भिन्नजातीयाअप्येतेवर्णास्तुल्यस्थानप्रयत्नाःसंतः सवर्णा आचार्येणकथ्यं-
तेइत्यर्थः हकारादिषकारउच्चारणार्थःनतुप्रयोजनार्थः ननुरेफस्ययप्रत्यय हारांतर्भावात् कुंडंरथेनेत्यादौवापदांतस्येतिपक्षेरेफःस्यात् भ
द्रन्हृदइत्यत्रचरहाद्यपोद्वेरितिद्वित्वंउच्यतेभद्रन्हृदइत्यत्ररहाद्यपोद्वेरित्यनेनरस्यद्वित्वेकृतेरिलोपोदीर्घश्चेतिरलोपेचपूर्वस्यहकारस्य-
स्वरत्वाभावान्नदीर्घइतिकुंडंरथेनेत्यत्रत्वनुनासिकस्यानुस्वारस्यस्थानेऽनुनासिकाएवयमाभवंति इत्यर्थकथनात् रेफस्याननुनासिकत्वा

हयवरलञणनङ मङ्झढधघभजडदगब खफछठथ चटतक पशषस आद्यंताभ्यां आद्यंतौवर्णौ मध्यगाना
माभ्यांसहितानां संज्ञास्युः अव इल जब गभ चफ एवमन्येपि ॥ ॥ ॥

दनुनासिकस्यानुस्वारस्य रकारोनभवतीत्यर्थः आद्यंताभ्यांसंज्ञासूत्रमेतत् आदिश्चअंत्यश्चआद्यंतौ ताभ्यांआद्यंताभ्यांकृतामध्य-
स्थाअक्षराग्राह्याइत्युक्तः आद्यंतवर्णरूपामध्यगानांसंज्ञाभवतीत्याद्यंतयोरप्राप्तायां तत्रधृत्याऽन्यतरस्य ग्रहणमाश्रित्यव्याख्येयम् त-
द्यथाआद्यंताभ्यांसहितानामितिकिंचआद्यंतौतावदवयवौताभ्यामवयवीसमुदायआक्षिप्यते तस्यचयुगपल्लक्ष्येप्रयोगाभावात्तदवय
वेष्ववतरंतीसंज्ञामध्यगेषु विश्राम्यति नत्वाद्यंतयोः संज्ञास्वरूपांतर्भावेनतयोः पारार्थ्यनिर्णयादित्याशयेनाह आभ्यांसंहितानामाद्यंता
भ्यां वर्णाभ्यांसहितानांमध्यगानामाद्यंतवर्णरूपाः संज्ञाभवंतीत्यर्थः एतत्सूत्रेणकृताःसंज्ञाः प्रत्याहार शब्देनव्यवह्रियंते प्रत्याह्रियं-
तेसंक्षिप्यंतेवर्णायत्रसप्रत्याहारः साधनाधारयोर्घञ् डितिसुहिप्राप्तेसंज्ञायामक र्तरिचेति अधिकरणेघञ्प्र त्ययः ॥ ६ ३

६ ६ ६ ६ ६ ६

कार्यायेत् वर्णानामाद्योच्चारणं द्विधा कार्यार्थं श्रवणार्थं चेति कार्यं विधातुं कर्तुमुच्चार्यमाण आचार्येण कथ्यमानो वर्ण इत्संज्ञकोस्ति क्रियते संपा

द्यते तत्कार्यं प्रयोजनमित्यर्थः कार्यार्थो यथा डे ङसि ङस् ङीनां ङ कारो ङिति ङितां यङित्यादिकार्यार्थः श्रवणार्थो यथा हकारादिष्वकार इति एति ग

च्छतीति इत् आशुविनाशीत्यर्थः तुमो प्रयुक्तस्य कर्मणीत्यनेन कार्यायेति चतुर्थी प्रसक्तादर्शनं लोपः अदर्शनं सामान्यं लोप इत्यस्यार्थः प्रसक्तानुच्चारण

रूप विशेषस्तु लक्षणया ज्ञातव्यः प्रसक्तस्य प्रसंगप्राप्तस्य वर्णस्यादर्शनम श्रवणमनुच्चारणं लोपसंज्ञं भवति लोपसंज्ञा प्रदेशा हसेपः सेर्लोप इत्याद

यः लोपसंज्ञाफलं तु प्रत्ययलोपे प्रत्ययलक्षणं न यातीति प्रसक्तस्येति किं दधि मधित्यादौ ह्रस्वस्य पिति कृति तुगिति तुग् माभूत् अस्तिहि तत्र क्वि

पोऽदर्शनं तच्च लोप इति प्रसक्तविशेषणाभावे प्रत्ययलक्षणेन तुक् स्यादेवेति प्रत्ययादर्शनं लुक् प्रत्ययस्यादर्शनमश्रवणमनुच्चारणं लुक्संज्ञं

कार्यायेत् कार्यं विधातुमुच्चार्यमाणो वर्ण इत्संज्ञो भवति या या संज्ञा सा सा फलवती यस्येत्संज्ञा तस्य लोपः प्रस-
क्तादर्शनं लोपः प्रत्ययादर्शनं लुक् वर्णविरोधो लोपश् स्वरानंतरिता हसाः संयोग उच्यते विरामोवसानं वर्णानामभा
वोवसानसंज्ञः स्यात् ॥

लुगिति पूर्वाचार्यसंज्ञा लुक्संज्ञाप्रदेशाः नपुंसकात्स्वमोर्लुगित्यादयः लुक्संज्ञाफलं तु लुकि न तन्निमि

त्तमिति वर्णविरोधो लोपश् स्वानुच्चारणप्रकृत्यनंतरं कार्यांतरप्रवृत्तिप्रतिबंधको वर्णविरोधो लोपश्संज्ञो भवति वर्णं विरुणद्धीति वर्णविरो-

धः लोपश्च संज्ञाप्रदेशाः य्वोर्लोपश् वापदांते इत्यादयः लोपश्संज्ञाफलं तु लोपशि पुनर्न संधिरिति नस्य लोपशि न

विभक्तिकार्यमिति च स्वरानंतरिता हसाः संयोगः अंतरं मध्यमगुरित्यंतरिताः नांतरिता अनंतरिताः स्वरा अनंतरिता येषां ते स्वरानंतरिताः अथवा अंतरमव

काशोजातोयेषां तेऽतरि...ः तद्भिन्ना अनंतरिताः स्वरैरनंतरिताः अव्यवहिताः स्वरानंतरिताः स्वररहितानां हसानां संयोगसंज्ञा भवतीत्यर्थः संयुज्यंतेऽस्मि

न्समुदाये हसा इति संयोगः तेनात्र समुदाये वाक्यपरिसमाप्तिर्न तु गुणवृद्ध्यादिसंज्ञावत् प्रत्येकं यदि प्रत्येकं स्यात् तर्हि दृषद्भिर्भतीत्यत्र षकारसन्नि

धौ दकारस्य संयोगत्वात् संयोगांतस्य लोपः स्यात् स्वरानंतरिता इति किं पनसमित्यत्राकारेण व्यवधाने पि सकारमकारयोः संयोगसंज्ञा स्यात्तदास्कोराद्योः

शिक्षि॰
४

श्वेत्यनेनसस्यलोपःस्यादिति हसाइति बहुवचनं तेनद्वयोरपि संयोगसंज्ञाःस्ति भतः शिक्षशिक्षणे अस्माद् गुरोर्हसादित्यङ् प्रत्यये शिक्षेति सिद्ध्यति॥ ७ ॥ कुचुटुतुपुवर्गाःएषूकारउदित् सवर्णंगृण्हातिननुवर्णमात्रमिति परिभाषाज्ञापनार्थः अस्याअर्थस्त्वयं उत् उकारइत् यस्य सउदित्वसवर्णस्यग्राहकोभवति तेनचोः कुरित्युक्ते पंचानांग्रहणमस्ति ननु कादीनां पंचानां सवर्णसंज्ञा केनेतिचेच्छृणु अस्मादेवोदित्करणात् ज्ञापकाज्जानीहि त एते वर्गसंज्ञाःस्युः वर्गसंज्ञाप्रयोजनं तु वर्ग्योवर्ग्येणसवर्णइतिअरेदोनामिनोगुणः अर्च एच्च ओश्च एषांसमाहारःअरेदोसमाहारस्यैकत्वा देकत्वेद्विगुद्वंद्वावितिनपुंसकत्वेपि ह्रस्वोन भवत्यत्रसंज्ञापूर्वकोविधिरनित्यइत्युक्तत्वात् अर् ए ओइतिनामिनइतिषष्ठ्यंत मस्तिनामिनःस्थानेगुणोभवतीत्यर्थः ननु गायति ग्लायतीत्यादौ संध्यक्षराणां गुणःस्यात् उच्यते ऐकारोपदेशसामर्थ्यान्नभवति अन्यथाएकारमेवोपदिशेत् एकारस्यैकारस्यच सत्यसतिवागुणेविशेषोनास्ति औकारांतस्तु धातुर्नास्तिअस्तुवाऔकारोपदेशसामर्थ्यान्नभविष्यतीतिननु

चै॰ १

कुचुटुतुपुवर्गाःअरेदोनामिनोगुणः अर् ए ओ गुणसंज्ञकाः तेच नामि स्थाने भवंति॥ ॥ ॥

वमायादेशोपिनस्यादितिवाच्यम् यंविधिंप्रत्युपदेशोऽनर्थकःसविधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौबाध्यतेइति न्यायात् गुणंप्रतिहि ऐकारोपदेशोऽनर्थकः ग्लैइत्यस्यापि सुपठत्वात् आयादेशस्यतु निमित्तमेवास्ति अतः परिशेषात् ऋवर्णेवर्णोवर्णानांस्थानेअर् ए ओ यथाक्रमंगुणसंज्ञका भवंति तपरत्वंतु स्पष्टार्थमितिगुणसंज्ञाप्रदेशाःगुणःनूपइत्यादयः॥ आरैऔवृद्धिःआश्चआरच ऐश्च औश्च एषां समाहारःआरैऔसमाहारस्यैकत्वादेकत्वेद्विगुद्वंद्वावितिनपुंसकत्वेपि ह्रस्वोनसंज्ञापूर्वकत्वेननस्यानित्यत्वा त्समासेपिसंहिताऽभावोत्र अङ्कौच मत्वर्थे इतिलिंगात् अथवा असमासेऽविभक्तिकोयंनिर्देशः तद्भिन्नत्वे सति तत्सदृशाकरणमनुकरणं अनुकरणात् विभक्तिर्नास्तीतिसमासाऽभावाच्च त्वारिपदानि एवमरेदो इत्यत्रापित्रीणि पदानि अकारस्य आवृद्धिः ऋवर्णस्यआर्वृद्धिः इवर्णस्य एकारस्यचैकारोवृद्धिः उवर्णस्यओकारस्यचऔवृद्धिः एतेवृद्धिसंज्ञकाः वृद्धिसंज्ञायाःप्रदेशाः धातोर्नामिन इत्यादयः॥ ७ ॥ ॥ ७ ७ ७ ४

अंत्यस्वरादिष्टिः अंते भवोंऽत्यः ण्यः अंत्यश्चासौ स्वरश्चेत्यंत्यस्वरः अंत्यस्वर आदिर्यस्य सः अंत्यस्वरादिः स्वराणां मध्येंऽत्यस्वर आदिर्यस्य समुदायस्य स टिसंज्ञो भवति यत्र तु तदादिरन्यो वर्णो नास्ति तत्र स्वरस्यैवांत्यत्वं व्यपदेशिवद्भावेन भवति यत्र चैक एव स्वरस्तत्रापि व्यपदेशिवद्भावादंत्यत्वमस्ति यथात्यदादिषु व्यपदेशिवद्भावस्तु लौकिको न्यायः यथा यस्य बहवः पुत्रास्तस्य तस्मिन् ज्येष्ठ मध्यम कनिष्ठ व्यपदेशोऽस्ति यस्य त्वेकः पुत्रस्तस्य ज्येष्ठादिव्यपदेशस्तस्मिन्नेवेति टिसंज्ञाप्रदेशाः यथा पचेताटेरित्यादयः सोंऽत्यस्वर आदिर्वर्णो यस्य स तदादिर्वर्ण इति अंत्यात्पूर्व उपधा अन्ते भवोंऽत्यस्तस्मात् अंत्याद्वर्णात्पूर्वो वर्ण उपधासंज्ञोस्ति वर्ण इति कस्मात् लब्धन्यायात् तद्यथा अवध्यवधिमद्भावः सजातीयानामे

आरैऔौ वृद्धिः आ आर ऐ औ वृद्धिसंज्ञाः स्युः अंत्यस्वरादिष्टिः अंत्यो यः स्वरस्तदादिर्वर्णाष्टिसंज्ञको भवति अंत्यात्पूर्व उपधा अंत्याद्वर्णमात्रात्पूर्वो यो वर्णः स उपधासंज्ञो भवति ह्रस्वो लघुः विसर्गानुस्वारसंयोगपरो गुरुर्दीर्घश्च मुखनासिकावचनोऽनुनासिकः ॥ ॥

व भवतीत्युत्सर्गः लोके हि अमीषां ब्राह्मणानामंत्यात्पूर्वमानयेत्युक्ते एक एवांत्यादव्यवहितपूर्व आनीयते न तु समुदायः तथेहापि वर्णादव्यवहितः पूर्वो वर्ण एव संज्ञी न तु समुदाय इति उपधासंज्ञाप्रदेशाः नोपधाया इत्यादयः ह्रस्वो लघुः ह्रस्वस्वरो लघुसंज्ञो भवति लघुसंज्ञाप्रदेशाः उपधायालघोरित्यादयः विसर्गानुस्वारसंयोगपरो गुरुर्दीर्घश्च विसर्गश्चानुस्वारश्च संयोगश्च ते विसर्गानुस्वारसंयोगाः परे यस्माद्ध्रस्वात्स विसर्गानुस्वारसंयोगपरो ह्रस्वो गुरुसंज्ञः दीर्घश्च गुरुसंज्ञः मुखनासिकावचनोऽनुनासिकः मुखेन सहिता नासिका मुखनासिका शाकपार्थिवादित्वान्मध्यपदलोपः उच्यतेऽसाविति वचनः मुखनासिकयावचनो यस्य स मुखनासिकावचनो वर्णोऽनुनासिकसंज्ञो भवति ॥ ८ ॥ ८ ॥ ६

विभक्त्यंतंपदं विभक्तिरंतेयस्यतद्विभक्त्यंतंपदसंज्ञमस्ति पद्यते ज्ञेनेनेति पदम् विभक्त्यंतमित्यंतग्रहणात् संज्ञाविधौ प्रत्ययग्रहणे तदंतग्रहणं
नास्तीतिज्ञाप्यते तपरःस्वसमानकालस्यवर्णस्य ग्राहकस्तकारः परोयस्मात्स तपरः तकारात्परोयः सतपरश्चेति तंत्रादिनोभयं विवक्षितं अ
अउच्चार्यमाणस्तपरःस्वसमानकालस्य सवर्णस्यैव संज्ञा भवति स्वेनात्मना सह समानस्तुल्यकाल उच्चारणकालोयस्यस स्वसमानकाल स्त
स्यैति तेनादिदित्यादयः षण्णां षण्णांसंज्ञा ऌदिदिति द्वादशानां संज्ञा ह्रस्वतपरस्तु ह्रस्वभेदानेव गृण्हाति दीर्घतपरस्तु दीर्घभेदानेवगृण्हातिनान्या
नित्यर्थः कादयोमावसानाःस्पर्शाःलोकप्रसिद्ध पाठापेक्षमिदं सूत्रे मावसानत्वायोगात् कादयःपंचविंशतिवर्णाःस्पर्शसंज्ञकाःसंति ञमङणन-
अनुनासिकाः एतेपञ्चवर्णा अनुनासिकसंज्ञकाःसंतिनासिकामनुगताइत्यनुनासिकाःयरलवाअंतस्थाःएतेचत्वारोवर्णाअंतस्थसंज्ञकाःसंतिशष
सहाऊष्माणःएतेचत्वारोवर्णाऊष्मसंज्ञकाःसंति ⨯कइतिः⨯पइतिकपाभ्यां खपाभ्यां प्रागर्द्धविसर्गसदृशो जिह्वामूलीयोपध्मानीयसंज्ञ-

विभक्त्यंतंपदंतपरः स्वसमानकालस्यसवर्णस्यग्राहकः ॥ इतिसंज्ञाप्रकरणम् ॥ ॥ ॥

कौभवतः अर्द्धविसर्गसादृश्यमुच्चारणेलेखनेचबोध्यम् अंइति अःइतिस्वरात्परावनुस्वारविसर्गसंज्ञकौभवतः अकुहविसर्जनीयानां कंठः एषा
मष्टानांवर्णानामुत्पत्तेः स्थानंकंठोस्ति द्वंद्वसमासोबोध्यः सर्वत्र इचुयशानांतालु एषामष्टानामुत्पत्तेः स्थानं तालु भवति उपूपध्मानीयाना
मोष्ठौ एषांसप्तानामुत्पत्तेःस्थानमोष्ठौभवतः ऋटुरषाणांमूर्द्धा एषामष्टानामुत्पत्तेःस्थानंमूर्द्धा मस्तकोस्ति ऌतुलसानांदन्ताः एषामष्टाना
मुत्पत्तेःस्थानं दन्ताः संति एदैतोःकंठतालु इत्यादौतपरत्वमसंदेहार्थं नस्वसमानकालसवर्णग्रहणार्थं तेन प्लुतस्यापि ग्रहणमत्रभवति ए
कारैकारयोरुत्पत्तेःस्थानंकंठश्च तालुच कंठतालु भवति प्राणितूर्यसेनांगानामित्येकवद्भावःओदौतोःकंठोष्ठं तपरत्वमसंदेहार्थं अनयोरुत्प-
त्तेःस्थानंकंठश्चओष्ठौ च कंठोष्ठमस्ति प्राण्यंगत्वादेकवद्भाव ः वकारस्यदंतोष्ठं वस्योत्पत्तेः स्थानंदंताश्च ओष्ठौ च दंतोष्ठमस्ति ओत्वोष्ठ ५
योःसमासेवेत्योकारःजिह्वामूलीयस्यजिह्वामूलंजिह्वामूलीयवर्णस्यजिह्वायामूलमुत्पत्तेःस्थानंअस्तिनासिकानुस्वारस्यअनुस्वारस्योत्पत्तेःस्थानं
नासिकास्तिहकारमित्या

दितं हकारं सुरसिभ धमुरस्य भवार्यैण्यः णितोवेति न वृद्धिः त्वंविजानीयाः बुध्द्याः कीदृशंतं पंचमैर्ङमङणनैर्युक्तम् पुनः कीदृशं
तं अंतस्याभिर्यरलवैः संयुतं मिलितं पचमैरसंयुत मंतस्याभिश्वासंयुक्तं हकारमाचार्याः कंठभवं कंठ्यं कंठस्थानोद्भवमाहुर्ब्रुवंति १ व-
र्णानामुरसन्तेरष्टौस्थानानि संति तद्यथा उरइत्यादि २ मातृकायामेवमनेनप्रकारेणाद्विपंचाशद्वर्णा आचार्येणोदाहृता दर्शिताः तेके त्रय स्त्रिं
शद्व्यंजनानीत्यादयः ४ इतिस्थानानि प्रयत्नोद्विधा आभ्यंतरोवाह्यश्च आभ्यंतरः पंचधा तद्यथास्पर्शानां स्पृष्टंप्रयत्नं १ अंतस्थानामीष-
त्स्पृष्टं प्रयत्नम् २ स्वराणांविवृतं प्रयत्नं ३ ऊष्मणामीषद्विवृतं प्रयत्नम् ४ ह्रस्वस्याऽकारस्य संवृतं प्रयत्नम् ५ वाह्यस्त्वष्टधाऽ पविसर्गश्वा
घसानां विवारः श्वासोऽघोषश्च ३ प्रयत्नः हवानां संवारो नादो घोषश्च ६ प्रयत्नः वर्गाणांप्रथम तृतीय पंचमानामं तस्थानांचाल्पप्रा-
णः प्रयत्नः वर्गाणां द्वितीयचतुर्थानामूष्मणां महाप्राणः ७ प्रयत्नः इति प्रयत्नाः विरामोऽवसानं विरम्यतेऽनेनेति विरामः बाहुलकात्करणे
घञ् यदुच्चारणोत्तरं वर्णांतरं नोच्चार्यते सोंत्यवर्णो विरामोऽवसानसंज्ञो भवतीत्यर्थः सम्यक्ज्ञायते शब्दादिव्यवहारो यया सा संज्ञा इति
संज्ञाप्रकरणम् अथ परिभाषा षष्ठीनिर्दिष्टस्यादेशस्तदंतस्य ज्ञेयः स्थानषष्ठ्या निर्दिष्टस्य शब्दस्य य आदेश उच्यते स आदे
शोऽत्यस्य वर्णस्य स्थाने भवतीत्यर्थः ऐसख्युरित्यैकारः सखिशब्दस्यांतस्ये कारस्य भवति स्थानषष्ठीति किम् कृत इती डागमस्तृ
प्रत्ययस्य ऋवर्णात्पूर्वो माभूदिति जश्शसोः शिरित्यादीनां शित्वंपरिभाषां ज्ञापयति तद्यथा तत्रहि शित्वमंत्यादेशं बाधित्वा सर्वादेशो य
थास्यादित्ये तदर्थं कृतं यदि षष्ठीनिर्दिष्टस्यादेशोंत्यस्य न स्यात्तर्ह्यंतरेणापि शित्वं सर्वादेशः सिद्धः किं तेनेति व्यर्थेन सता शित्वेन
ज्ञापितेति ङिदंतस्य वक्तव्यः ङिदादेशोप्यंतस्य स्याद्गुरुः शिच्च सर्वस्येत्यस्यापवादोयं त्रेरयङ् इत्ययङादेशोंत्यस्ये कारस्य भवति
ज्ञापितेति ङिदंतस्य वक्तव्यः ङिदादेशोप्यंतस्य स्याद्गुरुः शिच्च सर्वस्येत्यस्यापवादोयं त्रेरयङ् इत्ययङादेशोंत्यस्ये कारस्य भवति

सिं॰ च ति ततोनुबंधकृतमनेकवर्णत्वं नस्वीक्रियतेऽसंध्यक्षराणिपराणीत्यादिनिर्देशेनशिदंशो ज्ञाप्यते इयं परिभाषा तथाहि जश्शसोः शि
६ श्चेत् सर्वस्य नस्यात्तदोक्तनिर्देशोऽनुपपन्नःस्यादितिसाधनाधारयोर्युड्कारकाक्रियायुक्ते इत्यादिनिर्देशेनानेकवर्णाशिज्ञाप्यते इयंटित्किं-
तावाद्यं तयोर्वक्तव्यौ टित्कितौ यस्योक्तौ तस्यक्रमादाद्यंताऽवयवौभवतः सिसतासीस्यपा मिडितीट्स्यादीनामाद्यवयवो भवति अग्नविष्टे-
ति रातोञोपुगिति पुक् आतइत्यस्यां तावयवोभवतियापयतीति अन्यार्थटितृ कित् त्वियं परिभाषा न प्रवर्तते यथा अदर्शितिटकारस्याष्टि त-
द्धितीप् प्रयोजनमस्ति कुरुचरीतियक् चतुर्ष्विति ककारस्यगुणाप्रवृत्तिः प्रयोजनमस्ति भूयते इति प्रत्यय विधौनेयं प्रवर्तते इति वा टिदंशो
तस्मादित्यत्रातइतिस्मट् रः संख्यायाइत्यत्र यड् नवानामित्यत्र नुट् किदंशेतुकार्या येत्यत्रडेःऽकृइत्यक् ऐसरव्युरित्यत्र ऋगृडेः इत्यृक्
वर्तमाने इत्यत्र मुगानेत इति मुगिमां परिभाषां ज्ञापयति मिदंत्यात्स्वरासरो वक्तव्यः स्वराणांमध्येयोंत्यस्वरस्तस्मात्परस्तस्यैवांत्यावयवोमि
त्स्यात् नुमयमइतिनुमः पूर्वातत्वान्नोपधाया इतिदीर्घः सिद्ध्यति कुलानि यशांसीति नुमः परादित्वे तु नोपधाया इतिदीर्घो नस्यात् वा-
रिणेइत्यादौ ङितीत्येकारश्चस्यादिति अस्याः संध्यक्षराणीति निर्देशोज्ञापकः सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाऽव्यवहितस्य पूर्व भो १०
स्यैव वक्तव्यं नियमार्थेयं इयंस्वरे इत्यत्रस्वरेइतिभावेसप्तमी अश्रूयमाणक्रियत्वाच्चांतरंगस्यास्त्यर्थस्य लो[illegible]भवति तेनस्वरे सति यकारोभव
तीत्यर्थः व्यवहितेऽव्यवहितेच प्राप्तमव्यवहिते एवेति पूर्वस्य परस्य च प्राप्तं पूर्वस्यैवेति च नियम्यते पूर्वस्येतिकिम् ननुइद मत्रेकारस्य माभूत्
अव्यवहितस्येति किं अग्निचिदत्रेत्यत्र सांतरस्य माभूत् अस्याः ष्वादेः ष्णः लिप्तुंषादे ःसखिपत्योरित्यादिनिर्देशो ज्ञापकः पंचमीनिर्देशेन
क्रियमाणं कार्यमव्यवहितस्य परस्यवक्तव्यम् उदः स्थास्तंभोः सलोपः इत्यत्रोदइति पंचमीनिर्देशेनक्रियमाणो लोप सोऽव्यवहितस्य परस्य न
स्थास्तंभोः सकारस्यभवति उत्थानं उत्तंभनमिति अव्यवहितस्येतिकिं उत्संस्थानं उत्संस्तंभनमित्यादौमाभूत् परस्येतिकिं अस्याउदासनेस्तंभउ
द्गच्छत्यत्रमाभूत् अस्याज्ञापकः सनपुंसकंसधातुरित्यादिनिर्देशः तत्रहिसैषादिति विसर्गलोपः कृतो[illegible]तो ज्ञाप्यते ह्रस्वदीर्घप्लुतशब्दैर्यत्रस्व ६
रोविधीयते तत्र स्वरेति षष्ठ्यंतं पदमुपतिष्ठते षष्ठीनिर्दिष्टस्येत्यस्यनायमपवादः किंतु तच्छेष एव स्वरस्येतिषष्ठ्यंतं पदं सति संभवे सामाना

धिकरण्येनैवसंबध्यते नैवैयधिकरण्येन तेननपुंसकस्येत्यत्र स्वरांतस्यैवनाम्नो-ह्रस्वो भवति सोमपमिति नेहसुवाक् ब्राह्मणकुलांस्वरांतत्वा
भावान्न-ह्रस्वइत्यर्थः शमांदीर्घ इत्यत्रतु सामानाधिकरण्य स्या संभवात् शमादीनां स्वरस्येति संबन्ध्यते तेनशाम्यतीत्यादिसिद्धं सेदीर्घइत्य
त्र स्वरांतस्यधातोर्दीर्घः सेजिगीषतीति नेह बिभित्सतीति दूरादाह्वानेटेः प्लुतइत्यत्रसामानाधिकरण्यस्यसंभवेपिटेर्ग्रहणसामर्थ्यात् टेरवयव
स्य प्लुतो भवति आयुष्मान् एधीन्द्रवर्मन् ज्ञापक सिद्धेयं तथाहि यजां यवराणां रुदादेश्च तुर्णामित्यत्रनामीतिदीर्घस्य प्रवृत्तप्रवृत्तिभ्यां स्वरांते
ष्वु नामीतिदीर्घोभवति नहसांतेषु इतिज्ञापितं एकदेशानुमिति द्वारा ह्रस्वप्लुतयोरप्येवं वर्णानां प्रसंगे सति सदृशतमआदेशोवक्तव्यः सादृश्यं
चतुर्विधमस्ति स्थानार्थगुणप्रमाणभेदात् स्थानतो यथा दध्यानयेत्यत्र तालुस्थानस्येकारस्य तालुस्थानो यकारः अर्थतो यथा रूपवतीभार्या
यस्येत्यत्र पुंवद्वेत्यनेन पूर्वपदस्यस्थानेऽतिदिश्यमानः पुंशब्दो रूपवत्त्ववाचिनो रूपवतो शब्दस्य स्थाने तदर्थवाची एवरूपवच्छब्दो भवतीत्यर्थः
गुणतो यथावाग्घरिरित्यत्र घोषवतो नादवतो महाप्राणस्यसंवारवतो हस्य तादृशो वर्गचतुर्थो घकारो भवतीत्यर्थः प्रमाणतो यथा अमुं अ
मू अमून् इत्यत्र मादू इत्यनेन पूर्वपदस्य स्थाने ह्रस्वस्य ह्रस्वो दीर्घस्य दीर्घ उवर्णोभवतीत्यर्थः न्यायसिद्धेयम् तथाहि सभाया मास्य तामित्यु
क्ते हि पंडिताः पण्डितैः सहाऽऽसते शूराः शूरैः कवयः कविभिर्नतुसंकरेण किंच गवांसंघं प्रति गौर्धावति अश्वोऽश्वानामित्यादि व्यवस्था
तिर्यक्ष्वपि दृश्यते लोपशि पुनर्न संधिर्वक्तव्यः लोपशि कृते सति संधिर्नभवति यथा तआगनाः नस्यलोपशितु संधिर्वक्तव्यः श्वादेरिति
निर्देशात् यथाराजाश्वः नस्यलोपशि न विभक्तिकार्यम् पञ्चस्विति निर्देशात् किलासः स इति षत्वं तुभवत्येव तस्यवर्णमात्राश्रितत्वा
त् यथा पथिषु अस्याः ज्ञापक आचार उपमानात् अत उपधाया इत्यादिनिर्देशः विशेषणं तदंतस्य स्वस्यच रूपस्योपस्थापकं वक्तव्यं
अप्रधान मात्मां तस्य रूपस्य ग्राहकं भवति स्वस्य रूपस्यचेत्यर्थः स्वराद इत्यत्र धातोरिति विशेष्यं स्वरादिति विशेषणम् तदंत ग्राहकं अ
पनि स्वरांताद्धातोरप्रत्ययो भवतीतिस्वस्य स्वरूपस्यच ग्राहकं स्वररूपाद्धातोश्चाऽप्रत्ययइति च यः अपः अस्यांज्ञापकोतिशये हसादेअन्व
येनाम्नामित्यादिनिर्देशः नह्यत्र तदंतविधिं विनास्वरादइतिविधीयमानोऽप्रत्ययः शीङोभवेत् स्वरग्रहणं विनाच इधातोरप्रत्ययो न लभ्येतेति

इयं परिभाषा यदादेशस्तद्वद्भवतिनतुवर्णमात्रविधौआदेशेकृतेस्वरूपभेदात् स्थानिप्रयुक्तकार्याणामप्रवृत्तावतिदेशआरभ्यते आदेशः स्थानिवद्भव
ति यथालक्ष्म्यामित्यत्रङेःरामादेशेकृते तस्यामोङित्वात् ङितामाडित्यड्भवति वर्णमात्रविधौ स्थानिवद्भावो नभवतिवर्णश्चस्थान्यवयवएवात्रगृ
ह्यते यश्चवर्णमात्रेणविधिःयश्चवर्णमात्रात्परश्चविधिर्यश्चवर्णमात्रंसविधिर्यस्यवर्णमात्रेविधिस्तत्र माभूत् तत्रवर्णमात्रेण विधौ यथाव्यूढोर
स्केनेत्यत्र सकारस्यस्थानिवत्त्वेनविसर्गत्वमाश्रित्यावकुप्वंतरेपीतिणत्वंप्राप्तमिति तन्नभवतिवर्णमात्रात्परस्ययथाद्यौरित्यत्रदिवऔरित्यौकारस्यस्था
निवत्त्वेनपंथाइत्यत्रासावित्याकारस्यस्थानिवत्त्वेनचहस्त्वमाश्रित्यहसेपइतिसिलोपोनभवतीति वर्णमात्रस्यविधौयथाद्युकामइत्यत्रदिवसउरसेइत्युका
रस्यस्थानिवत्त्वेनयवयोर्वसेहकारेचलोपोनभवतीतिवर्णमात्रेविधौ यथाकइष्टइत्यत्र यज् देवपूजादौ धातोःक्तप्रत्यये परतःसंप्रसारणस्य स्थानिवत्त्वे
न यकारमाश्रित्य हवे इत्युकारोनभवतीति क्रियायां स्त्रियामित्यादिनिर्देशोज्ञापकः॥ ७ ॥इयंस्वरे इत्यनेनइत्वजातिर्निर्दिश्यते न तुह्रस्वव्यक्ति

इयंस्वरेइवर्णोयत्वमापद्यते स्वरेपरे॥ हसेऽर्हसः स्वरात्परोरेफहकारवर्जितोहसोहसेपरे अवसानेचवाद्विर्भवति झभेजबाः
झसानांझभेपरेजबाभवंतिवर्ग्योवर्ग्येणसवर्णःस्वरहीनंपरेणसंयोज्यंदध्ध्यानयअपाद्यबलावाद्विर्वाच्याःदध्यानय द्वित्वंध
स्यैवयस्यैवनोभयोरुभयोरपि दध्यानयादिषुभाङ्गैर्बोध्यंरूपचतुष्टयम्॥ रेचप्लुत इतिनिषेधसामर्थ्यात् यमितिद्वितीयांतंकर्म त
स्ययोगत्वात् प्राप्नोतीत्यस्याध्याहारःकर्तव्यः इ इतिक्लीबेकर्तृपदमस्ति अथयमितिप्रथमांतंक्लीबे अकारउच्चारणार्थःतदासत्तार्थवाचकमृक्रियापदम
ध्याहार्यमिति स्वरेइति किम् दधिपश्य स्थानीआदेशोनिमित्तं चेतित्रयंसर्वत्रबोध्यम् किंचअर्थवद्ग्रहणे नानर्थकस्येतिपरिभाषयाअस्याऽपत्य
मिःस्त्रीचईइत्यत्रैवयकारःस्यात्नतुदध्यानयेत्यादौ उच्यतेस्यादावित्यादिनिर्देशेनतस्यानित्यज्ञापनान्निषेधः दध्यानयेत्यत्र नामिनःस्वरेइतिनु
म् नस्यादिस्वरत्वाभावात् दध्यृ इतिस्थिते॥ ७ ॥हसेऽर्हसः र्च हच र्हौ नर्हौयस्मिन्सोऽर्ह अत्रसंयोगांतस्येतिहलोपोन सभिन्नस्येति निषेधात् रकारह ७
कारभिन्नःस्वरात्परोहसोद्विर्वास्यात् अवसानेहसेच स्वरादितिकिम् तस्मिन्स्नातः हसिकिम् भवानत्रहसःकिम् तितउच्छत्रम् अर्हितिकिं हर्य्यनुभवः न

सकर्म्मकत्वादस्मै दैवयते देवदत्तो मैत्रेणेत्यत्र गतिबुद्धीत्यनेन आवपि कर्तुः कर्म्मत्वं न तुल्यार्थयोगे तोलनं तुला तुलया संमितस्तुल्य ण्य प्रत्ययः णितो वे
ति वृद्ध्यभावः तुल्यार्थवाचकशब्दयोगे तृतीया वा स्यात् पक्षे संबंधे षष्ठी तुलोपमाशब्दौ विना उपमा तुला वा हरेर्नास्तीति तुल्यः सदृशः समः कृष्णेन कृष्ण-
स्य वा ७ फलप्राप्तौ कालाध्वनोरत्यंतसंयोगे तृतीया अंतं विराममतिक्रांतो ऽत्यंतः अत्यंतश्चासौ संयोगश्चात्यंतसंयोगस्तस्मिन् अत्यंतसंयोगे निरंतर
संनिकर्षे कालाध्ववाचकाभ्यां तृतीया स्यात् फलप्राप्तौ सत्यां देवदत्तेनानुवाको ग्रंथविशेषो ऽन्हा दिनं यावन्निरंतरं क्रोशेन एकक्रोशं यावन्निरंतरं वाऽधी
तः कालाध्वनोरिति द्वितीया बाधिकेयं तृतीया अशिष्टव्यवहारे दाणः प्रयोगे च तुर्थ्यर्थे तृतीया निषिद्धाचारे प्रतिपाद्ये दाणः प्रयोगे च तुर्थ्यर्थे तृतीया-
स्यात् दास्या संयच्छते कामी धर्मे तु भार्य्यायै संयच्छते इति तृतीया, नम आदियोगे चतुर्थी संबंधसामान्ये षष्ठ्यां प्राप्तायां तद्बाधिका चतुर्थी नारायणाय

फलप्राप्तौ कालाध्वनोरत्यन्तयोगे तृतीया अन्हा क्रोशेन वा ऽनुवाको ऽधीतः फलप्राप्तौ किम् मासमधीतो नायातः अशिष्टव्य
वहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया दास्या संयच्छते कामुकः धर्म्मे तु भार्य्यायै संयच्छति नम आदियोगे चतुर्थी नमो नारायणाय
एवं स्वस्ति स्वाहा स्वधा अलं वषड्योगे च उपपदविभक्तेः कारकविभक्तिर्बलीयसीति नमस्करोति देवान् प्रभ्वादियोगे षष्ठ्यपि भो
जनाय भोजनस्य वा प्रभुस्समर्थः शक्तः कृष्णाय कृष्णस्य वा मद्रं भद्रं कुशलं सुखमायुष्यमर्थः प्रयोजनं वा भूयात् ॥ ॥

हरये नमोस्तु प्रजाभ्यः स्वस्ति कल्याणं अग्नये स्वाहा पितृभ्यः स्वधा अलमिति समर्थार्थस्य ग्रहणं हरिर्दैत्येभ्यो अलं समर्थ इत्यर्थः इन्द्राय वषट् ननु नम
स्करोति देवानित्यत्र चतुर्थी स्यात् नमः संबंधसत्वादुच्यते उपपदविभक्तेः कारकविभक्तिर्बलीयसीति उपपदं निमित्तं यस्याः सा उपपदनिमित्ता सा चासौ
विभक्तिश्च उपपदविभक्तिः शाकपार्थिवादित्वान्मध्यपदलोपः क्रियान्वयित्वं कारकत्वं कारकनिमित्ता विभक्तिर्बलीयसी बलिष्ठेत्यर्थः क्रियान्वयित्वा
द्देवानित्यत्र द्वितीया प्रभ्वादियोगे षष्ठ्यपि प्रभु आयुष्य मद्र भद्र कुशल सुखार्थ हितार्थकाः प्रभ्वादय [illegible] योगे षष्ठी चतुर्थ्यौ भवतः तत्रायुष्यादियो-
गे आशीर्वादे दर्थे एवं आशीर्वादे किं देवदत्तस्यायुष्यमस्ति ॥ ॥ ७ ७

इयं परिभाषा यदादेशस्तद्वद्भवति न तु वर्णमात्रविधौ आदेशे कृते स्वरूपभेदात् स्थानिप्रयुक्तकार्याणामप्रवृत्तावतिदेश आरभ्यते आदेशः स्थानिवद्भव
ति यथा लक्ष्म्यामित्यत्र ङे रामादेशे कृते तस्यामो ङित्वात् ङितामडित्यड् भवति वर्णमात्रविधौ स्थानिवद्भावो न भवति वर्णश्च स्थान्यवयव एवात्र गृ
ह्यते यश्च वर्णमात्रेणाविधिः यश्च वर्णमात्रात् परश्च विधिर्यश्च वर्णमात्रं स विधिर्यस्य वर्णमात्रे विधिस्तत्र माभूत् तत्र वर्णमात्रेण विधौ यथा व्यूढोर
स्के नेत्यत्र सकारस्य स्थानिवत्त्वेन विसर्गत्वमाश्रित्याव कुप्वंतरेपीति णत्वं प्राप्तमिति तन्न भवति वर्णमात्रात्परस्य यथा द्यौरित्यत्र दिव औ रित्यौकारस्य स्था
निवत्त्वेन पंथा इत्यत्रासावित्याकारस्य स्थानिवत्त्वेन च हसत्वमाश्रित्य हसेप इति सिलोपो न भवतीति वर्णमात्रस्य विधौ यथा द्युकाम इत्यत्र दिवस उ रसे इत्युका
रस्य स्थानिवत्त्वेन यवयोर्वसे हकारे च लोपो न भवतीति वर्णमात्रे विधौ यथा क इष्ट इत्यत्र यज् देवपूजादौ धातोः क्तप्रत्यये परतः संप्रसारणस्य स्थानिवत्त्वे
न यकारमाश्रित्य हवे इत्युकारो न भवतीति क्रियायां स्त्रियामित्यादिनिर्देशो ज्ञापकः॥ ७ ॥ इयंस्वरे इत्यनेन इत्वजातिर्निर्दिश्यते न तु ह्रस्वव्यक्ति

इयंस्वरे इवर्णो यित्वमापद्यते स्वरे परे॥ हसेऽर्हसः स्वरात्परो रेफहकारवर्ज्जितो हसो हसे परे अवसाने च वा द्विर्भवति झभे जबाः
झसानां झभे परे जबा भवंति वर्ग्यो वर्ग्येण सवर्णः स्वरहीनं परेण संयोज्यं दध्ध्यानय अपाद्य वलावा द्विर्वाच्या दध्यानय द्वित्वं ध
स्यैव यस्यैव नोभयो रुभयोरपि दध्ध्यानयादिषु प्राज्ञैर्बोध्यं रूपचतुष्टयम्॥ रे वप्लुत इति निषेधसामर्थ्यात् यमिति द्वितीयांतं कर्म त
स्य योगत्वात् प्राप्नोतीत्यस्याध्याहारः कर्तव्यः इ इति क्लीबे कर्तृपदमस्ति अथ यमिति प्रथमांतं क्लीबे अकार उच्चारणार्थः तदा सत्तार्थवाचकम् क्रियापदम
ध्याहार्यमिति स्वरे इति किम् दधि पश्य स्थानी आदेशो निमित्तं चेति त्रयं सर्वत्र बोध्यम् किंच अर्थवद्ग्रहणे नानर्थकस्येति परिभाषया अस्याऽपत्य
मिः स्त्री च ई इत्यत्रैव यकारः स्यात् न तु दध्यानयेत्यादौ उच्यते स्यादावित्यादिनिर्देशेन तस्यानित्यज्ञापनान्न निषेधः दध्यानयेत्यत्र नामिनः स्वरे इति नु
म् नस्यादिस्वरत्वाभावात् दध्य् इति स्थिते॥ ७ ॥ हसेऽर्हसः र् च ह् च र्हौ न र्हौ यस्मिन् सोऽर्ह अत्र संयोगांतस्येति हलोपो न स भिन्नस्येति निषेधात् रकारह
कारभिन्नः स्वरात्परो हसो द्विर्वा स्यात् अवसाने हसे च स्वरादिति किम् तस्मिन् स्नातः हसि किम् भवानत्र हसः किम् तितउच्छत्रम् अर्हतीति किं हर्य्यनुभवः न

सकर्म्मकत्वादस्मै देवयते देवदत्तो मैत्रेणेत्यत्र गतिबुद्धीत्यनेन आवपि कर्तुः कर्म्मत्वं न तुल्यार्थयोगे तोलनं तुला तुलया संमितस्तुल्य ण्य प्रत्ययः णितो वे
ति वृद्ध्यभावः तुल्यार्थवाचकशब्दयोगे तृतीया वा स्यात् पक्षे संबंधे षष्ठी तुलोपमाशब्दौ विना उपमा तुला वा हरेर्नास्तीति तुल्यः सदृशः समः कृष्णेन कृष्ण-
स्य वा छ फलप्राप्तौ कालाध्वनोरत्यंतसंयोगे तृतीया अंतं विराममतिक्रांतो ऽत्यंतः अत्यंतश्चासौ संयोगश्चात्यंतसंयोगस्तस्मिन् अत्यंतसंयोगे निरंतर
संनिकर्षे कालाध्ववाचकाभ्यां तृतीया स्यात् फलप्राप्तौ सत्यां देवदत्तेनानुवाको ग्रंथविशेषो ऽन्हा दिनं यावन्निरंतरं क्रोशेन एकक्रोशं यावन्निरंतरं वाऽधी
तः कालाध्वनोरिति द्वितीया बाधिकेयं तृतीया अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया निषिद्धाचारे प्रतिपाद्ये दाणः प्रयोगे चतुर्थ्यर्थे तृतीया-
स्यात् दास्या संयच्छते कामी धर्मे तु भार्य्यायै संयच्छते इति तृतीया, नम आदियोगे चतुर्थी संबंधसामान्ये षष्ठ्यां प्राप्तायां तद्बाधिका चतुर्थी नारायणाय

फलप्राप्तौ कालाध्वनोरत्यन्तयोगे तृतीया अन्हा क्रोशेन वा ऽनुवाको ऽधीतः फलप्राप्तौ किम् मासमधीतो नायातः अशिष्टव्य
वहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया दास्या संयच्छते कामुकः धर्म्मे तु भार्य्यायै संयच्छति नम आदियोगे चतुर्थी नमो नारायणाय
एवं स्वस्ति स्वाहा स्वधा अलं वषट् योगे च उपपदविभक्तेः कारकविभक्तिर्बलीयसीति नमस्करोति देवान् प्रभ्वादियोगे षष्ठ्यपि भो
जनाय भोजनस्य वा प्रभुस्समर्थः शक्तः कृष्णाय कृष्णस्य वा मद्रं भद्रं कुशलं सुखमायुष्यमर्थः प्रयोजनं वा भूयात् ॥ ॥

हरये नमोस्तु प्रजाभ्यः स्वस्ति कल्याणं अग्नये स्वाहा पितृभ्यः स्वधा अलमिति समर्थार्थस्य ग्रहणं हरिर्दैत्येभ्यो अलं समर्थ इत्यर्थः इन्द्राय वषट् ननु नम
स्करोति देवानित्यत्र चतुर्थी स्यात् नमः संबंधसत्वादुच्यते उपपदविभक्तेः कारकविभक्तिर्बलीयसीति उपपदं निमित्तं यस्याः सा उपपदनिमित्ता सा चासौ
विभक्तिश्च उपपदविभक्तिः शाकपार्थिवादित्वान्मध्यपदलोपः क्रियान्वयित्वं कारकत्वं कारकनिमित्ता विभक्तिर्बलीयसी बलिष्ठेत्यर्थः क्रियान्वयित्वा
द्देवानित्यत्र द्वितीया प्रभ्वादियोगे षष्ठ्यपि प्रभुआयुष्यमद्रभद्रकुशलसुखार्थहितार्थकाः प्रभ्वादयः एषां योगे षष्ठी चतुर्थ्यौ भवतः तत्रायुष्यादियो-
गे आशीर्वादे र्थे एवं आशीर्वादे किं देवदत्तस्यायुष्यमस्ति ॥ ॥ छ छ छ

रुच्यर्थधातुयोगेप्रीयमाणेरुचिदीप्तावपिदीप्तिस्तत्रन विवक्षिताइत्यत्रउच्यते अन्यकर्तृकोऽभिलाषोरुचिः रुचिरर्थोयेषांतेरुच्यर्थाः रुच्यर्थाश्चतेधा
तवश्चरुच्यर्थधातवस्तेषांयोगः रुच्यर्थधातुयोगस्तस्मिन् प्रीयतेइतिप्रीयमाणः प्रीञ्तर्पणेअस्मात्कर्मणिशानप्रत्ययः तस्मिन्प्रीयमाणेचतुर्थीभवतिहरिं
प्रीणयतीत्यर्थेकर्मणिद्वितीयाप्राप्तौचतुर्थीहरिनिष्ठप्रीतेर्भक्तिः कर्त्रीभक्तिरात्मविषयमभिलाषंहरेरुत्पादयतीत्यर्थः प्रीयमाणेकिं देवदत्तायरोचतेमोद
कः पथिश्लाघह्नुङ्स्थाशपांप्रयोगेबोधयितुमीप्से श्लाघृकत्थने ह्नुङ् अपनयनेष्ठागतिनिवृत्तौशपउपालंभेएषांप्रयोगेबोधयितुंज्ञापयितुमिष्टेवांछितेचमि
तुर्थीस्यात् गोपीस्मरात्कंदर्पात् कृष्णायश्लाघतेकृष्णंस्तौतीत्यर्थः सर्वत्रकर्मणिद्वितीयाप्राप्तौचतुर्थीकृष्णाय ह्नुतेसपत्नीभ्यो ह्नुतमर्थंकृष्णंबोधयतीत्यर्थः

रुच्यर्थधातुयोगेप्रीयमाणे हरयेरोचतेभक्तिः श्लाघह्नुङ्स्थाशपांप्रयोगेबोधयितुमिष्टे गोपीकृष्णायश्लाघते
ह्नुतेतिष्ठतेशपतेवा धारेरुत्तमर्णे भक्तायधारयतिमोक्षंहरिः स्पृहयतेरीप्सिते पुष्पेभ्यस्स्पृहयति ॥ ॥ ॥

कृष्णायतिष्ठतेस्थित्यास्वाभिप्रायंकृष्णंबोधयतीत्यर्थः स्वाभिप्रायाविष्करणेत्रात्स्थ्यायामिति तिष्ठतेरात्मनेपदं
कृष्णायशपतेउपालंभेनस्वाभिप्रायंकृष्णंबोधयतीत्यर्थः धारेरुत्तमर्णेधृङ् अवस्थानेण्यंतः धारयतेः प्रयोगेउत्तमर्णेचतुर्थीस्यात् उत्तमर्णोधनस्वा
मीअत्रोत्तमर्णोभक्तः हरिस्त्वधमर्णः अधमर्णस्तुग्राहकइतिभक्तेनपूर्वंभक्तिर्दत्तातदर्थंहरिर्मोक्षंधारयतिधृङोऽकर्मकत्वाद्गतिबुद्धीतिसूत्रेणाण्यं
तावस्थाकर्तुर्ण्यंतावस्थायांकर्मत्वंअत्रचषष्ठीप्राप्तौचतुर्थीविधीयतेउत्तमर्णेकिंदेवदत्तायशतंधारयतिग्रामेस्पृहयतेरीप्सितेस्पृहयतेः प्रयोगेईप्सिते
वांछितेचतुर्थीस्यात्स्पृहईप्सायांचुरादावदंतः कर्मणिद्वितीयाबाधिकेयंमैत्रः पुष्पेभ्यः स्पृहयति पुष्पाणि स्पृहयतीत्यर्थः प्रकर्षविवक्षायां द्वितीया
पि ॥ ॥ छ छ छ छ छ छ

क्रुध द्रुह ईर्ष्याऽसूयार्थानांक्रुधद्रुहेर्ष्याऽसूयार्थानांप्रयोगेयंप्रतिकोपादयस्तत्र चतुर्थीक्रुधक्रोधेद्रुहजिघांसायांईर्ष्यईर्ष्यायांअसूयेतिकंड्वादियगंतो
धातुःएषामर्थइवार्थोयेषांधातूनांतेषांप्रयोगेयंप्रतियस्मिन्कोपादयःक्रियंतेतत्र चतुर्थीस्यात्क्रोधोऽमर्षःजिघांसाऽपकारःईर्ष्यापरसंपत्त्यसहनंअसूयागु
णेषुदोषाविष्करणंक्रुधद्रुहोरकर्मकत्वात्तद्योगेषष्ठीप्राप्तौचतुर्थीईर्ष्याऽसूययोस्तुसकर्म्मकत्वात्द्वितीयाप्राप्तौचतुर्थीयंप्रतिकोपादयःकिमुभार्यामीर्ष्यतिमैना
मन्योऽद्राक्षीदितिहेतोः चतुर्थीबलिहितसुखरक्षितैः एभिर्योगेचतुर्थीस्यात्बलिःपूजोपहारकःब्राह्मणायबलिः हितंसुखंरक्षितंवाचशब्दादन्येप्यनुक्त
प्रयोगाज्ञेयाःइतिचतुर्थी॥ ऋतेआदियोगेपचमीज्ञानादृतेविनामुक्तिर्न ऋतेयोगेद्वितीयापिऋतेद्वितीयाचेतिचांद्रसूत्रोक्तत्वात् गृहादन्योविहारो वनं

क्रुधद्रुहेर्ष्यासूयार्थानांयम्प्रतिकोपार्थादयस्तत्र हरयेक्रुध्यतिद्रुह्यति ईर्ष्यति असूयति इत्यादि ऋते आदियोगे पञ्च
मी ऋतेज्ञानान्नमुक्तिः अन्योगृहाद्विहारः आराद्वनात् इतरोग्रामात् भिन्नः कृष्णात् पूर्वो ग्रामात् प्राग्ग्रामात् दक्षि
णाग्रामात् विनापृथक् नानावा विनाकृष्णात् विद्यास्वीकारे पञ्चमी उपाध्यायादधीते जनिकर्त्तुः प्रकृतिः जायमानस्य
कार्य्यस्योपादानमपादानसंज्ञंस्यात् ब्रह्मणः प्रजाः प्रजायन्ते यतश्चाध्वकालयोर्निर्माणन्तत्र पंचमी पञ्चमीयुक्तादध्व
नः प्रथमासप्तम्यौकालात्सप्तमी ॥ ॥

वनादारात् आराद्दूरसमीपयोरित्यमरः दूरांतिकयोगे षष्ठ्यपीति प्राप्ते पं
चमीग्रामादितरः इतरस्त्वन्यनीचयोरित्यमरः नीचार्थस्येतरस्य ग्रहणंन कृष्णाद्भिन्नोन्य इत्यर्थः एवंपूर्वदक्षिणा दक्षिणाहियोगेअंचूत्तरपदयोगेच
पंचमी विनापृथक्नानावा विनापृथक् नानाभिर्योगेद्वितीया तृतीयापंचम्यो भवंतिहिरुक् नानाचवर्ज्जनेइत्यमरः विद्यास्वीकारे पंचमी विद्यास्वीकान
रेवक्तुः पंचमीभवति यथाउपेत्यस्माद धीयतेइत्यपादानेघञ्उपाध्यायादधीतेशिष्यः निःसरंतंशब्दंततोगृण्हातीत्यर्थः जनिकर्तुः प्रकृतिःउत्पद्य
मानस्यकार्यस्यहेतोः पंचमी यथा ब्रह्मणोधातुःप्रजाःप्रजायंतेउत्पद्यंते इत्यर्थः ततउपक्रामंतिनिर्गच्छंतीत्यर्थो वाब्रह्माहिरण्यगर्भः सचहेतुरेवन
तुनरुपादानं प्रजास्यात्संततौजनेइत्यमरः यतश्चाध्वकालयोर्निर्माणं तत्र पंचमीयतश्चाध्वकालयोःपरिच्छेदः क्रियतेतस्मात्पंचमीभवतिअध्ववाचकश

द्वात्तु प्रथमासप्तम्यौ कालवाचकात्तु सप्तम्येव वनात् ग्रामो योजनं योजने वा अग्रे हायनं यस्याः सा अग्रहायणी स्वार्थे ऽण् कार्तिक्याः पूर्णमास्या आग्रहाय
णी मासे ऽस्ति वर्जने ऽपपरिभ्यां पंचमी वर्जनार्थयोरपपर्योर्योगे पंचमी यथा अपहरेः परिहरेः संसारः हरिं वर्जयित्वेत्यर्थः मर्यादार्थकाङ् योगे पंचमी यथा आ
मुक्तेः संसारः मुक्तिं मर्यादीकृत्येत्यर्थः एवमभिविध्यर्थकाङ्योगे ऽपि पंचमी यथा आबालेभ्यो हरिभक्तिः बालानभिव्याप्येत्यर्थः प्रतिः प्रतिनिधिप्रतिदा
नयोः एतयोरर्थयोर्यः प्रतिस्तस्य योगे पंचमी स्यात् मुख्यस्याभावे तत्सदृशो यउपादीयते स प्रतिनिधिः दत्तस्य प्रतिनिर्यातनं प्रतिदानं षष्ठीबाधिका पंच
मी यं कृष्णात् प्रतिकृष्णस्य सदृश इत्यर्थः तिलेभ्यः प्रति तिलानामादानेन मैत्रो माषान् यच्छति ददातीत्यर्थः भयहेतौ पंचमी भयार्थानां त्राणार्थानां च प्रयोगे भयहेतोः

वनाद्ग्रामो योजनं योजने वा कार्तिक्या आग्रहायणी मासे वर्ज्जने ऽपपरिभ्यां पंचमी अपहरेस्संसार ः परिहरेस्संसार ः आमुक्तेस्सं
सारः प्रतिः प्रतिनिधिप्रतिदानयोः यतः प्रतिनिधिः प्रतिदानं तत्र प्रतियोगे पंचमी प्रद्युम्नः कृष्णात्प्रति तिलेभ्यः प्रतियच्छ
ति माषान् हेतौ तृतीया पंचम्यौ जा ड्याज्जाड्येन वा बद्धः स्तोकात्स्तोकेन वा मुक्तः दुरान्तिकयोर्योगे षष्ठ्यपि ग्रामस्य दूरादन्ति
काद्वा इत्यादि निर्द्धारणे षष्ठीसप्तम्यौ क्रियागुणजातिसं ज्ञाभिस्समुदायात्पृथक् करणं निर्द्धारणं यतस्ततः षष्ठीसप्तम्यौ क्रियाप
राणां क्रियापरेषु वा भगवदाराधकः श्रेष्ठः गवां गोषु वा कृष्णा सम्पन्नक्षीरा नृणां नृषु वा ब्राह्मणः श्रेष्ठः छात्राणां छात्रेषु वा मैत्रः
पटुः स्वाम्यादियोगे षष्ठीसप्तम्यौ गवां गोषु वा स्वामी अधिपतिः ईश्वरः दायादः प्रसूतः प्रतिभूर्वा ॥ ॥ ॥

पंचमी स्यात् षष्ठीबाधिकेयं मैत्रश्चौराद्बिभेति चौरात् त्रायते हेतौ तृतीया पंचम्यौ गुणे वर्तमानात् हेतुवाचकशब्दादस्त्रीलिंगात्तृतीया पंचम्यौ स्तः जडस्य
भावो जाड्यं तेन तस्माद्वा बद्धः स्तोकेन स्तोकाद्वा अनायासेन मुक्त इत्यर्थः गुणवाचकात् किं धनेन कुलं अस्त्रीलिंगात्किं बुद्ध्या मुक्तः तृतीया प्राप्तौ पक्षे पं
चमी विधीयते दूरांतिकयोगे षष्ठ्यपि अनयोर्योगे षष्ठी भवति अपिशब्दाद्दूरांतिकार्थकेभ्यो नामार्थमात्रे द्वितीया तृतीया पंचमी सप्तम्यो भवंतीत्यर्थः ग्राम ७६
स्य दूरं दूरेण दूरात् दूरे वा अंतिकं अंतिकेन अंतिकात् अंतिके वा इति पंचमी ॥ निर्धारणे षष्ठीसप्तम्यौ निर्द्धारणादियोगे षष्ठीसप्तम्यौ जातिगुणक्रियासंज्ञाभिः

समुदायादेकदेशस्यपृथक्करणंनिर्द्धारणंतदस्तिसाध्यत्वेनास्येतिसनिर्द्धारिणः अइकावित्यप्रत्ययः श्रेष्ठत्वादिहेतुरित्यर्थः तथाचनिर्द्धारणादियोगेनि-
र्द्धारणाश्रयान्नाम्नः षष्ठीसप्तम्यौस्तः यतोनिर्धार्यते ततएवेत्यर्थः इतिषष्ठीस्वाम्यादियोगेषष्ठीसप्तम्यौस्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैर्यो
गेषष्ठीसप्तम्यौस्तः षष्ठीप्राप्तौपाक्षिकसप्तम्यर्थंवचनंदायादौ सुतबांधवावित्यमरः गोषुप्रसूतः गाएवानुभवितुंजातइत्यर्थः प्रतिभूः साक्षीअनादराधि-
क्येक्रियालक्षणेषष्ठीसप्तम्यौ केवलभावलक्षणेसप्तम्येवअनादराधिक्येतुषष्ठीसप्तम्यौस्तः रुदतोवामैत्रः प्राव्राजीत् रुदंतंपुत्रादिकमनादृत्यसंन्यस्तवा
नित्यर्थः आयुक्तकुशलाभ्यांयोगेषष्ठीसप्तम्यौतात्पर्येतत्परस्यभावः तात्पर्यंतस्मिन् तात्पर्येऽर्थेआभ्यांयोगेषष्ठीसप्तम्यौस्तः हरिपूजनेहरिपूजनस्यवाआयु
क्तोव्यापारितइत्यर्थः तात्पर्येकिंआयुक्तोगौः शकटेईषद्युक्तइत्यर्थः साधुनिपुणाभ्यांपूजायांसप्तमी निपुणंशुभेकर्म्मणिअस्मान्नास्युपधादितिकः नि

अनादराधिक्येक्रियालक्षणेषष्ठीसप्तम्यौरुदतिरुदतोवा प्राव्राजीत् आयुक्तकुशलाभ्यांयोगेषष्ठीसप्तम्यौ तात्पर्येआ
युक्तः कुशलोवाहरिपूजनस्यहरिपूजनेवा साधुनिपुणाभ्यांपूजायांसप्तमी मातरिसाधुर्निपुणोवा प्रसितोत्सुकाभ्यांयो
गेतृतीयासप्तम्यौ प्रसितउत्सुकोवाहरिणाहरौवा साध्वसाधुप्रयोगेसप्तमी साधुः कृष्णो मातर्य्यसाधुर्म्मातुले निमित्तात्क
र्मयोगेसप्तमीचर्म्मणि द्वीपिनंहंति दन्तयोर्हन्तिकुंजरम् ॥ केशेषुचमरींहंति सिम्नि पुष्कलकोहतः ॥ १ ॥ ॥

पुणः साधुशब्दप्रयोगेतुपूजांविनासाध्वः साधुप्रयोगेसप्तमीभवत्येवपूजायामाभ्यांयोगेसप्तमीस्यात् पूजायां किंनिपुणोराज्ञोभृत्यः इहतत्वकथ-
ने तात्पर्यं प्रतिपर्यनुयोगेनसप्तमीसाधुर्निपुणोवामातरंप्रतिपर्यनुवा प्रसितोत्सुकाभ्यांयोगेतृतीयासप्तम्यौ तत्परेप्रसितासक्तावित्यमरः उत्सुकसाहचर्या
त्प्रसितस्तत्परार्थक एवगृह्यतेतेनप्रकर्षेणसितः शुक्लइत्यर्थेन साध्वसाधुप्रयोगेसप्तमी यत्रपूजानविवक्षिता किंतुतत्वकथनं तत्रापिसप्तमीभवतिएत
दर्थंसाधुग्रहणंसाधुनिपुणाभ्यामितिसूत्रेसाधुग्रहणंतुपूजायांविवक्षितायांप्रत्यादियोगेसप्तमीनिवृत्यर्थमिति निमित्तात्कर्मयोगेसप्तमी कर्मणोयो
गः संबंधः कर्मयोगस्तस्मिन्कर्मयोगेनिमित्तात्सप्तमीस्यात् निमित्तशब्देनफलमुच्यते तु जाड्येनबद्धइत्यादावव्यतिप्रसंगः स्यादित्यर्थः अत्रहे

तु तृतीया तादर्थ्ये चतुर्थी च प्रासा तन्निवारणार्थमिदं मैत्रो द्वीपिनं चित्रकं हंति चर्मणि चर्मफलार्थं चर्मद्वीपिनोः समवायः संबंधः कुंजरं हंति दंतयोर्दं
तफलार्थे दंतकुंजरयोः समवायः संबंधः चमरीं गां हंति केशेषु केशफलार्थं केशचमर्योः समवायः संबंधः मैत्रेण पुष्कलको गंधमृगो हतः सीम्नि अंडकोश
फलार्थं अथवा पुष्कलकः शंकुर्हतो निहितो निखात इत्यर्थः सीम्नि सीमज्ञापनार्थं सीमपुष्कलकयोः संयोगः संबंधः अथ पुष्कलको गंधमृगे क्षपणकी
लयो सीमाघाटस्थितिक्षेत्रेष्वंडकोशेषु च स्त्रियामिति मेदिनी ॥ ७ ॥ क्तस्येन्विषयस्य कर्मणि इन्नंतस्य क्तस्य कर्मणि सप्तमी स्यात्
द्वितीयाबाधिका सप्तमी अधीतमनेनेत्यधीती व्याकरणे भावे क्तप्रत्ययस्ततः इष्टादिभ्य इति कर्तरीन् प्रत्यये कृते पश्चाद्गुणभूतक्रियया संबध्यमानं
व्याकरणमनुक्तं कर्म इति सप्तमी पुनश्चतुर्थीमाह तादर्थ्ये चतुर्थी तस्मै कार्याय इदं तदर्थं तदर्थस्य भावस्तादर्थ्यं भावे तत्यण इति यण् कृत्तद्धितसमा

क्तस्येन्विषयस्य कर्म्मणि अधीती व्याकरणे तादर्थ्ये चतुर्थी संयमाय श्रुतं धत्ते नरो धर्म्माय संयमम् धर्म्मं मोक्षाय मेधावी
धनं दानाय भुक्तये तुमोऽप्रयुक्तस्य कर्म्मणि फलेभ्यो याति क्यब्लोपे कर्म्मण्याधारे च पञ्चमी हर्म्यात्प्रेक्षते आसनात्प्रेक्षते ॥

सेभ्यः संबंधाभिधानं भावप्रत्ययेनेति सिद्धांतस्ततो यण् प्रत्ययेन संबंध उच्यते स च संबंधोऽनेकधा न तु कार्यकारणभाव एव तेन ब्राह्मणाय दधीत्यादौ
चतुर्थी सिद्ध्यति मैत्रः श्रुतं शास्त्रं धत्ते कस्मै संयमाय संयमं धत्ते कस्मै धर्माय मेधास्ति यस्य स मेधावी बुद्धिमान् धर्म्मं धत्ते कस्मै मोक्षाय धनं धत्ते क-
स्मै दानाय त्यागाय भुक्तये भोगाय चेति तुमोऽप्रयुक्तस्य कर्मणि क्रियावाचकप्रकृतिकसुपपदं यस्य तस्याप्रयुज्यमानस्य तुमंतस्य कर्मणि चतुर्थी भ
वति द्वितीयाबाधिकेयम् फलेभ्यो याति फलान्याहर्तुं यातीत्यर्थः एवं स्वयंभुवे नमस्कृत्य स्वयंभुवमनुकूलयितुमित्यर्थः पुनः पंचमीमाह क्यब्लोपे क
र्मण्याधारे पंचमी क्यबंतस्य गम्यमानार्थत्वात् प्रयोगे कर्म्मणि आधारे च पंचमी स्यात् क्यब्ग्रहणमिह क्यबर्थपरं तेन क्त्वापि गृह्यते प्रासादात्प्रेक्षते प्रासा ७७
दमारुह्य आसनात्प्रेक्षते आसने उपविश्येत्यर्थः आसने स्थित्वा वा पुनः षष्ठीमाह ॥ ॥ ७ ॥ ॥ ॥

कर्तृकार्ययोरक्तादौकृतिषष्ठीकृद्योगेकर्तरिकर्मणिचषष्ठीस्यात् क्तादीन् विनाकृष्णेनक्रियतेइतिकृष्णस्यकृतिः क्तिरिति स्त्रियांभावेर्थे क्तिःज
गत् करोतिइतिजगतः कर्तावुण्वुणाविति कर्तरि तृप्रत्ययः कर्तृकार्ययोः किंशस्त्रेणभेत्ताऽत्रकरणेमाभूत् कृतिकिं कृतपूर्वीकटमत्र तद्धितेमाभूत् कृ
तंपूर्वमनेनेतिकारकादितिकर्तरीनिः गुणकर्म्मणिवाअमुख्यकर्म्मणिवाषष्ठीस्यात् अक्तादौकृतिनेताऽश्वस्यग्रामंग्रामस्यवाकर्तरितृप्रत्ययः ग्राममितिगौण
कर्मउभयप्राप्तौकृतिकर्तरिषष्ठीनउभयोःकर्तृकर्म्मणोःप्राप्तिर्यस्मिन् सउभयप्राप्तिस्तस्मिन्नुभयप्राप्तौकृत्प्रत्ययेकर्तरिषष्ठीनस्यात् कर्तृषष्ठीनिषेधकामि
दंकर्मणिषष्ठीतुकर्तृकार्ययोरनेनैव अगोपेनगावोदुह्यंतेदोहः इतिभावेघञ् स्त्रीप्रत्ययोरकाकारयोर्योगेनोक्तं स्त्रियांक्तिरित्यधिकारेकृतयोरकाकारयोर्यो
गेकर्तरिकर्म्मणिचोभयत्रषष्ठीस्यात् कर्तरिषष्ठीनेतिपूर्वोक्तंनप्रवर्ततइत्यर्थः भेदनभेदिकाधात्वर्थनिर्देशेवुण्वक्तव्यइतिवुण्युवोरनाकावित्यकादेशः

कर्तृकार्य्ययोरक्तादौकृतिषष्ठी कर्त्तरिकार्य्येचषष्ठी क्तादिवर्ज्जितेकृति प्रयुज्यमाने कृष्णस्यकृतिः जगतःकर्ताकृ
ष्णः गुणकर्म्मणिवानेताश्वस्यग्रामंग्रामस्यवाउभयप्राप्तौकृतिकर्तरिषष्ठीन आश्चर्य्योगवांदोहोऽगोपेनस्त्रीप्रत्यययोरका
कारयोर्योगेनोक्तम् भेदिकाबिभित्सावारुद्रस्यजगतः शेषेकृतिवाशब्दानामनुशासनमाचार्य्येणाचार्य्यस्यवा वर्तमाना
धारार्थक्तस्ययोगेषष्ठीसज्ञांमतःबुद्धःपूजितोवाइदमेषांशायितम् क्तादौतुकुर्वन्कुर्वाणः ॥ ॥ ॥

स्त्रियामाबतइत्याप् काप्यतइतीत्वं भेत्तुमिच्छाबिभित्साभिदेःसप्रत्ययेनानिटिसेइतिनगुणःप्रत्ययांतात् स्त्रियामङित्यङ् ततआप् रुद्रेणजग
त् भिद्यते इति भेदिकारुद्रस्यजगतःभावेवुण् रुद्रेणजगत् बिभित्स्यतेइति बिभित्सारुद्रस्यजगतःभावेऽङ् शेषेकृतिवाशेषेऽकाऽकारभिन्नेकृन्मात्र
प्रत्ययेउभयप्राप्तौकर्तरिषष्ठीवास्यात् आचार्येणशब्दाअनुशिष्यंतेऽनेनेतिशब्दानामनुशासनमाचार्य्येणाचार्यस्यवासाधनाधारयोरितिकरणेल्युट्
वर्तमानाधारार्थक्तस्ययोगेषष्ठीवर्तमानार्थस्याधिकरणवाचिनश्चक्तस्ययोगेकर्तरिषष्ठीस्यात् अक्तादाविति निषेधस्यापवादोयंविधिः राज्ञांमतः भि
नामितिमतिबुद्धिपूजार्थेभ्योवर्तमानेकर्म्मणिक्तःपूजितोयःसुरासुरैरित्यादौतुभूतेक्तोबोध्यः इदमेषांशायितमासितंभुक्तंवास्येयेगतिभक्षणार्थे

भ्यः इत्यधिकरणेक्तः क्तादयउच्यंते कर्तृकर्मणोः षष्ठीबाधकाः हरिः सुखंकुर्वन् कुर्वाणः शतृशानौ तिप्तेवदितिशतृशानौ ॥ ७ ॥ चकृवान् चक्रा
णः क्वसुकानौ णवे वदिति क्वसुकानौ आदृतः किर्द्धिश्च भूते इति किः मैत्रो हरिं दिदृक्षुः सांता आशंसभिक्षिभ्य उरित्युः अलंकरिष्णुः इष्णुस्नुक्नु इति शीले
इष्णुः हरिर्दैत्यान् घातुकः षाको कण इत्युकण् कृल्कर्तरीति कर्त्तरि प्रत्यया एते जगत् सृष्ट्वा पूर्वकाले क्त्वेति क्त्वा सुखं कर्तुं तुमुन् तदर्थायां भविष्यतीति तुमुन् वि
ष्णुना दैत्या हताः हरिर्दैत्यान् हतवान् क्तक्तवतू इति क्तक्तवतुप्रत्ययौ हरिणा प्रपंचः ईषत्करः ईषद्दुःसुषु खल् इति खल् मैत्रः सोमं पवमानः आत्मानं मंड
यमानः मडि भूषायां ताच्छील्यवयोवचनशक्तिषु चानश् इति चानश् मैत्रो वेदमधीयन् इङ् धार्योः शत्रकृच्छ्रिणि कर्तरि शि शतृ इति शतृप्रत्ययः हरिर्लोकान् कर्त्ता शी
ले तृन् इति तृन् द्विषः शतुर्वा द्विष अप्रीतौ इत्यस्मात् द्विषः शतावितिसूत्रेण विहितो यः शतृप्रत्ययस्तस्य योगे कर्म्मणि वा षष्ठी स्यात् क्तादि त्वान्नित्यं सेनिषे-

चकृवान् चक्राणः चक्रिर्वा सुखं हरिः हरिं दिदृक्षुः अलंकरिष्णुर्वा दैत्यान् घातुको हरिः जगत्सृष्ट्वा सुखं कर्त्तुम् विष्णुना
हता दैत्याः दैत्यान् हतवान् हरिः ईषत्करः प्रपंचो हरिणा सोमं पवमानः आत्मानं मंडयमानः वेदमधीयन् कर्त्ता लोकान् द्विषः
श शतुर्वा मुरस्य मुरं वा द्विषन् भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थस्येनश्च योगे षष्ठी न सतः पालकोऽवतरति व्रजं गामी शतं
दायी ॥ ॥ धेप्रासे विकल्पार्थमिदं अक्तादावित्ययं निषेधस्तु कारकषष्ठ्या एवानंतरस्य विधिर्वा प्रतिषेधो वेति न्यायात् संबंधे षष्ठी तु स्यादेव
ब्राह्मणस्य कुर्वन् नरकस्य जिष्णुरित्यादि एवंच आश्चर्यो गवां दोहोऽगोपेनेत्यत्र संबंधविवक्षायां कर्तर्यपि षष्ठी भवतीति बोध्यं भविष्यत्यकस्य भविष्यदा
धमर्ण्यार्थस्येनश्च योगे षष्ठी न तुमर्थे वुण् इति भविष्यत्यर्थेपि वुण्प्रत्ययो भवति युवोरनाकावित्यकादेशः तस्य भविष्यदर्थकस्याकस्य योगे कर्मणि षष्ठी
न स्यात् यस्तु कालसामान्ये तृण्वुणावितिवुण् उक्तस्तत्र न निषेधः यथा ओदनस्य पाचकः देवानां दर्शकः आवश्यकाधमर्ण्ययोर्णिनिरित्यादिना इनिप्रत्ययो
भविष्यत्यर्थे आधमर्ण्यार्थे च भवति तस्य योगे च कर्म्मणि षष्ठी न सत इति शतृप्रत्ययांतं सज्जनान् पालयिष्यतीति पालकः भविष्यत्यर्थे वुण् गमिष्यतीति ७८
गमी भविष्यत्यर्थे णिनिः ददातीति दायी अधमर्णो ग्राहकः अधमर्णस्य भाव आधमर्ण्यं तस्मिन् आधमर्ण्ये णिनिः कृत्यानां कर्तरि वा षष्ठी कृत्यसं

ज्ञकप्रत्ययानांयोगेकर्तरिषष्ठीवास्यात् कर्तृकार्ययोरितिनित्यंप्राप्तेर्विकल्पार्थमिदं हरिर्मयाममवासेव्यः षेवृसेवायामस्मात् ऋहलोर्ण्यत् इति कर्मणिण्यत् कर्तरिकिंमाणवकः साम्नांवेदानांगेयः स्वराद्यइतिकर्त्तरियप्रत्ययविधानादनुक्तंकर्म तव्यानीयण्यत्यक्यप् एतेपंचकृत्यप्रत्ययाः छ उभयप्राप्तौकृत्येषष्ठीनकर्तरिकर्मणिचप्राप्तौसत्यांकृत्यप्रत्यययोगेउभयत्रषष्ठीनस्यात् उभयप्राप्तौकर्मणीतिसूत्रेणकर्तरिषष्ठीनिषेधेसिद्धे कर्मणिषष्ठीनिषेधार्थमिदं गुणकर्मणिवेतिसूत्रंउभयप्राप्तिरहितस्थलेनेताग्रामंग्रामस्यवाश्वस्येत्यादौचरितार्थंबोध्यं दूरनिकटार्थयोगेषष्ठीपंचम्यौषष्ठ्यांप्राप्तायांपक्षेपंचम्यर्थवचनं द्यूतार्थस्यक्रयविक्रयरूपव्यवहारार्थस्यचदिवःकर्मणिषष्ठीद्यूतमर्थोयस्यसद्यूतार्थस्तस्यद्यूतार्थस्यक्रयश्चविक्र

कृत्यानांकर्तरिवाषष्ठीमयाममवासेव्योहरिः उभयप्राप्तौकृत्येषष्ठीन नेतव्याव्रजंगावः कृष्णेन दूरनिकटार्थयोगेषष्ठीपंचम्यौ दूरंनिकटंवाग्रामस्यग्रामाद्वादूरनिकटार्थेभ्योनामार्थमात्रेभ्योद्वितीयातृतीयापंचमीसप्तमीग्रामस्यग्रामाद्वादूरंदूरेणदूरात्दूरेनिकटंवा द्यूतार्थस्यक्रयविक्रयरूपव्यवहारार्थस्यचादिवः कर्मणिषष्ठीशतस्यदीव्यति वोपसर्गस्य शतस्य शतंवाप्रतिदीव्यति षष्ठीहेतुप्रयोगे अन्नस्यहेतोर्वसति सर्वादेर्हेतौद्योत्ये चतृतीयाषष्ठ्यौ केनहेतुना वसति कस्यहेतोः॥

यश्च क्रयविक्रयौक्रयविक्रयोरूपं यस्यसः क्रयविक्रयरूपः क्रयविक्रयरूपश्चासौव्यवहारश्चक्रयविक्रयरूपव्यवहारः क्रयविक्रयरूपव्यवहारोऽर्थोयस्यस क्रयविक्रयरूपव्यवहारार्थस्तस्य क्रयविक्रयरूपव्यवहारार्थस्य चादिवधातोः कर्मणिषष्ठीस्यात् द्यूतार्थे सादि किंब्राह्मणंदीव्यतिस्तौतीत्यर्थः वोपसर्गस्यत्रोपसर्गपूर्वकस्य दिवः कर्म्मणिवाषष्ठीस्यात् पूर्वसूत्रापवादः षष्ठीहेतुप्रयोगे हेतुशब्दप्रयोगेषष्ठीस्यात् हेतुशब्देचहेतौ तृतीयायांप्राप्तायामनेनषष्ठी सर्वादेर्हेतुप्रयोगे हेतौद्योत्ये तृतीयाषष्ठ्यौ सर्वादिगणात्तृतीयाषष्ठ्यौ तेनहेतुशब्दप्रयोगेतु तृतीयाषष्ठ्यौच ॥ छ ॥ छ छ

छ छ छ छ छ छ छ छ

निमित्तपर्यायप्रयोगेसर्वासांविभक्तयोः सर्वादेस्तृतीयादयः सर्वादेर्निमित्तपर्यायप्रयोगेसर्वाविभक्तयः स्युः असर्वादेस्तुप्रथमाद्वितीयेनस्तः अन्याःस्यु
षष्ठीहेतुप्रयोगेसर्वादेर्हेतुप्रयोगेइतिचसूत्रद्वयंगतार्थंबोध्यंअन्योक्तेप्रथमाकार्येद्वितीयास्यात् अन्योक्तेकार्येतु प्रथमाकर्तरितृतीयाअन्योक्तेकर्तरिप्रथ
माकरणेतृतीयाअन्योक्तेकरणेप्रथमासंप्रदानेचतुर्थीअन्योक्तेसंप्रदानेप्रथमा अपादानेपंचमीअन्योक्ते अपादानेप्रथमासंबंधेषष्ठीअन्योक्तेसंबंधेप्रथमा
अधिकरणेसप्तमीअन्योक्तेअधिकरणेप्रथमाआख्यातोक्तेयथाघटःक्रियतेमैत्रेणआद्रुवीतिकर्माण्यात् यक् चतुर्षितियक् हरिःसुखंकरोतिकर्तरिपंचे
तिकर्तरिपरस्मैपदंतनादेरुविरुद्धप्रकृदुक्तेयथा कृष्णःकंसंहतवान् क्तक्तवतूइतिकर्तरिक्तवतुः कृष्णेनकंसोहतःकर्मणिक्तः पच्यतेऽनेनेतिपचनोऽग्निःसा
धनाधारयोर्युडितिकरणेयुट्दीयतेऽस्माइतिदानीयःतव्यानीयाविविसंप्रदानेऽनीयः उपसमीपेगत्वाऽधीयतेस्मादित्युपाध्यायः संज्ञायामकर्तरिचेत्यपादाने

निमित्तपर्य्यायप्रयोगे सर्व्वादेस्सर्वविभक्तयोऽसर्वादेस्तृतीयादयः कोहेतुः किम्प्रयोजनम् कंहेतुम् केनहेतुनाज्ञानेननि
मित्तेनहरिःस्सेव्यः ज्ञानायनिमित्तायअन्योक्तेप्रथमा आख्यातकृत्समासतद्धितनिपातोक्ते कारकेसम्बंधेच प्रथमास्यात्
घटःक्रियतेहरिःकरोतिकृष्णःकंसंहतवान् कृष्णेनकंसोहतः पचनोऽग्निः दानीयोविप्रः उपाध्यायः पचनीस्थालीप्राप्तानन्दःऊढ
रथःउपहृतपशुःउद्धृतौदनापीताम्बरःवीरपुरुषःकौंकुमम् माथुरःधनवान् दृषद्वती विषवृक्षोऽपिसंवर्ध्यस्वयंच्छेत्तुमसांप्रतमिति
क्रमादमुन्नारद इत्यबोधिसः इतिविभक्त्यर्थाः ॥ ॥घञ् पच्यतेऽस्यामिति पचनीसाधनाधारयोरित्यधिकरणेयुट् स्थाली हंडिकासमा
सोक्तेयथाप्राप्त आनंदोयंसप्राप्तानंदःऊढोरथोयेनसऊढरथोऽनड्वान् वृषभःउपहृतःपशुर्यस्मैसउपहृतपशूरुद्रःउद्धृतमन्नंयस्मात्सउद्धृतान्नःक-
टाहःपीतमंबरंयस्यसपीतांबरोहरिःवीराःपुरुषायस्मिन् सवीरपुरुषोग्रामःतद्धितोक्तेयथाकुंकुमेनरक्तंवस्त्रंकौंकुमंतद्धितेनोक्तंकर्मअण्प्रत्ययः
मथुरायाआगतःमाथुरःअण्धनमस्यास्तीतिधनवान्मांतोपधाद्वत्विनौइतिवतुः दृषदउपलाःसंत्यऽस्यामिति दृषद्वतीभूमिः निपातोक्तेयथाविषवृक्षो ७१
पिसवर्द्ध्यस्वयंच्छेत्तुमसांप्रतमित्यत्रसंवर्द्ध्येतिभावेक्यप्क्यबंतस्यक्रियापदस्यविषवृक्षमितिद्वितीयांतंकर्मतत्रासाम्प्रतमित्यनेननिपातेनोक्तत्वात्प्रथमा

स्वयमालनाच्छेत्तुमसांप्रतं नयुज्यते इत्यर्थः क्रमादमुं नारदइत्यबोधिसः अबोधीत्यत्रदीपजनबुधेतिकर्तरीण्तस्यनारदमितिद्वितीयांतं कर्मतत्रइति
निपातयोगात्प्रथमा उक्तंच यस्मिन्नर्थेविधीयतेलकारास्तद्धिताः कृतः समासोवाभवेद्यत्रसउक्तः प्रथमाततः इतिकारकप्रक्रिया ॥ समासश्चान्वयेनाम्नां ना
म्नीचनामानिचनामानितेषांनाम्नांयद्यप्यविभक्तिनामेतिसंकेतितं तथाप्यत्रनाम्नामितिविभक्त्यंतानामेवग्रहणंसमासप्रत्ययोर्लुकक्वचिदित्यादिज्ञापका
त् अत्रविधिरितिशेषः प्रथमाद्यंतानांपदानांपदयोर्वाऽन्वयेसतियोविधिः ससमाससंज्ञोभवतिचकारस्त्वनुक्तसमुच्चयार्थः तेनपदानामन्वयेसत्येवकृत्तद्धित
धातुसंज्ञाप्रयोजकप्रत्ययाअपिभवंतिसमानिएकभूतानिपदानिअर्थोवाऽस्तेयस्मिन्ससमासः आसउपवेशनेअस्मादाधारेघञ् सममेकमर्थमासयंतिदी
पयंत्यस्मिन्ससमुदायेइतिवासमासः असदीप्तौअ्यंतादस्मात्स्वरादइत्याधारेऽप्रत्ययः संश्लिष्टानिएकीभूतानिपदानिअस्यंतेउच्चार्यंतेस्मिन्निति वासमासः आ

समासश्चान्वयेनाम्नाम् नाम्नामन्वयेसतिसमासोभवति चकारात्कृत्तद्धितधातुसं ज्ञाप्रयोजकप्रत्ययाअपि ॥ ॥

धारेघञ् समानंसंश्लि
ष्टानांपदानामेकतामापन्नानामासनमुच्चारणमितिवासमासः भावेघञ् समसनंसमासोवा संपूर्वादस्यतेर्भावेघञ् अनेकपदस्यएकपदीभवनमित्यर्थः
समस्यतेइतिवासमासः संज्ञायामकर्तरिचेतिकर्मणिघञ् अनुअंतर्मध्येयंतिपदार्थायस्मिन्नर्थेइत्यन्वयः इण्गतावस्मात्स्वरादइत्यप्रत्ययः अनुअंतःपदार्थानामय
नंगमनमितिवाऽन्वयः एकार्थीभावः अनुसहान्येनयंतिसंबंधंलभंतेपदानियस्मिन्नितिवान्वयः स्वरादइत्याधारेऽप्रत्ययः अनुसहान्येनईयंतेसम्बन्धंप्राप्यंते पदान्यस्मि
न्नितिवान्वयः व्यपेक्षालक्षणइतिसोन्वयोद्विधाव्यपेक्षालक्षणः एकार्थीभावलक्षणश्चेति तत्रव्यपेक्षालक्षणेविग्रहवाक्यमेवएकार्थीभावलक्षणेतुवृत्तिरेवतत्र
स्वार्थपर्यवसायिनांपदानामाकांक्षासंनिधियोग्यत्वेषुसत्सुयः परस्परसंबंधः सव्यपेक्षालक्षणः विशिष्टकार्यरूपः एकार्थीभावलक्षणः विशेषेणगृह्यते ज्ञायतेवृत्त्य
र्थोऽनेनेतिविग्रहः विग्रहस्यवाक्यंविग्रहवाक्यम् विग्रहवाक्यमपिद्विधालौकिकमलौकिकंचेतिप्रयोगार्हंपरिनिष्ठितंसाधुलौकिकंयथाराज्ञः पुरुषइतिव्यपेक्षालक्ष

णः संबंधोत्यत्रैव अपरिनिष्ठितंप्रयोगानर्हमसाधुअलौकिकंयथाराजन् ङस् पुरुष सु इतिसमाससंज्ञादिकंचास्मिन्नेव प्रवर्तते इति परार्थाभिधानं वृत्तिः
परः स्वार्थादन्योयोऽर्थः सपरार्थः अथवास्वस्मात् परस्यशब्दस्य योऽर्थः सपरार्थः तस्याभिधानंप्रतिपादनंपरार्थाभिधानंसावृत्तिःकृत्तद्धितसमासैकशेषय-
ङ्नाद्यंतधातुरूपाइतिपंचवृत्तयः वृत्तिरपिद्विधाजहत्स्वाऽर्थाऽजहत्स्वार्थाचेति जहतिस्वार्थं पदानियस्यांसाजहत्स्वार्था उक्तंच वृत्तौवर्तिपदानामानर्थक्यंपदेवर्णी
वदितियथा वृषभइत्यत्रवृषशब्दः सुकृतादेर्वाचकः भशब्दस्तुनक्षत्राणांवाचकः वृषभपदंतुबलीवर्देशक्तंशक्तावयवानामानर्थक्यंएवंकवलशब्दे कोवा
द्यादेर्वाचकः वोवरुणवाचकः लः पृथिवीवाचकः कवलपदंग्रासेशक्तंशक्तौ तेषामानर्थक्यं तथाराजपुरुषशब्दयोः पृथक्शक्तयोरपिराजसंबंधिनिपु
रुषेशक्तिः तत्रराजपुरुषशब्दयोरानर्थक्यंतदन्याजहत्स्वार्थापूर्वेऽव्ययेऽव्ययीभावःअव्ययेपूर्वपदेसतिपदयोर्योऽन्वय एकार्थीभावलक्षणःसोऽव्ययीभावसं

पूर्वेऽव्ययेऽव्ययीभावः अव्ययपूर्वपदेसति योऽन्वयस्सोऽव्ययीभावसञ्ज्ञकस्समासो भवतिसमासप्रत्यययोः समासेव
र्तमानायाविभक्तेःप्रत्ययेपरेलुग्भवतिनामत्वात्स्यादिः सनपुंसकम् अव्ययीभावोनपुंसकलिङ्गो भवति नपुंसकस्येति-
ह्रस्वः ॥ ॥

ज्ञकः समासोऽस्ति पूर्वग्रहणादेवाव्ययस्य पूर्वनिपातो व्ययीभावे अ
न्यथाऽव्ययेइत्येव सिद्धे किं तेनसमासप्रत्यययोःप्रतीयते कर्तृकर्माद्यर्थोऽनेनेतिप्रत्ययः इण् गतावस्मात्स्वरादच् इत्यप्रत्ययः अथवा अय गतावस्मात्सचा
द्यच् प्रत्यये प्रत्ययतेप्रत्याययत्यर्थमितिप्रत्ययः अंतर्भावितण्यर्थः समासश्च प्रत्ययश्चसमासप्रत्ययौ तयोः भावेसप्तमीयं समासेसतिप्रत्ययेच सतिवर्त
मानायाः स्यादिरूपाया विभक्तेर्लुक् स्यात् ततः कृत्तद्धितसमासाश्चेति नामसंज्ञायां स्याद्युत्पत्तिर्भवतीत्यर्थः सनपुंसकं तच्छब्देन संनिहितोऽव्य
यीभावः परामृश्यते स्त्रीचपुमांश्च स्त्रीपुंसौन स्त्रीपुंसाविति नपुंसकं स्त्रीपुंस शब्दस्य पुंसकभावः सहादित्वान्निपात्यते नपुंसकत्वान्नपुंसकस्ये-
ति ह्रस्वविधानम् ॥ ॥ ७ ७ ७ ७ ७

अव्ययीभावात् ननु अनव्ययमव्ययं भवतीत्यव्ययीभावः अभूततद्भावे इति च्विः ज्वलादेर्ण इति भवतेर्णप्रत्ययः अथवा अनव्ययस्य अव्ययत्वेन भवनमस्मि
न्नेकार्थीभावे इति अव्ययीभावः भावे आधारे वा घञ् एवमन्वर्थसंज्ञा विज्ञानात् अव्ययादितिलुक्प्राप्तिरस्त्येव किमर्थमेतत् मैवं तत्पुरुषादिसंज्ञावद
स्या अन्वर्थत्वाभावात् तर्हि तु योगविभागो मास्तु अव्ययीभावादतो मनतइत्येकयोग एवास्तु लुक् तु अव्ययादित्यनेन सिद्ध एव अतो योगविभाग एवज्ञा
पयत्यत्रान्वर्थसंज्ञा नास्तीति अस्माद्विभक्तेर्लुक् स्यात् अथ पाणिनिसूत्रम् अव्ययविभक्तिसमीपसमृद्धिव्युद्ध्यर्थाभावाऽत्ययासंप्रतिशब्दप्रादुर्भवि
पश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यांतवचनेषु विभक्त्यादिष्वर्थेषु विद्यमानमव्ययमन्वये सति सुबंतेन नाम्ना सह समस्यते विभक्त्यर्थेऽव्य
येयथा स्त्रियामित्यधिस्त्रि लौकिकविग्रहवाक्यमिदं सप्तम्यर्थस्य द्योतकोऽधिः स्त्री ङि अधि इत्यलौकिकविग्रहवाक्यं अत्र निपातेनोक्ते व्यधिकरणे समा

अव्ययीभावात् विभक्तेर्लुक् अधिस्त्रि अतोऽमनतः अदन्तादव्ययीभावाद्विभक्तेरलुक् तं वर्जयित्वाऽमादेशः कुंभस्य स
मीपमुपकुम्भम् वाटाङ्योः अदंतादव्ययीभावाद्टाङ्योरम्वा उपकुम्भम् उपकुम्भेन वा कृतम् उपकुम्भम् उपकुम्भे वा निधेहि अ
नतः किम् उपकुम्भात् मद्राणां समृद्धिस्सुमद्रम् यवनानां व्यृद्धिर्दुर्यवनम् ॥ ॥ सविधानसामर्थ्यात् सप्तमी अन्यैस्तु स्त्रियमधि
कृत्येति व्याख्यातं तदसत् अधिहरीत्यत्राधिकृत्येत्यर्थस्याप्रतीतेः क्रमादमुं नारद इत्यबोधि स इत्यादौ समासो न इति शब्दस्य प्रकृतपरामर्शकत्वेन कर्मत्वमा
त्राऽनभिधायकत्वात् एवं च विभक्तिशब्दः सप्तम्यां पर्यवस्यति समीपार्थेऽव्यये यथा कुम्भस्य समीपमिति उपकुम्भम् समया ग्रामं निकषा लंकां आरादिनादि
त्यत्र तु नाव्ययीभावो विनादियोगे द्वितीयेति क्रन्ते आदियोगे पंचमीति च विधानसामर्थ्यात् अतोऽमनतः विशेषणत्वात्तदंतविधिः अदंतादव्ययीभावा
त् अनत इति षष्ठी न अत् अनत् तस्या अनतो विभक्तेरमादेशः स्यात् वाटाङ्योः कुत्रचिद्भवति कुत्रचिन्न भवतीयं व्यवस्थितविभाषा तस्या आश्रयणात्
सुमद्रं उन्मत्तगंगमित्यादौ सप्तम्या नित्यमेवाऽम् समृद्ध्यर्थे यथा ऋद्धेराधिक्यं समृद्धिः मद्राणां देशविशेषाणां समृद्धिः सुमद्रं उत्तरपदार्थप्राधान्ये तु नसु
रूपोपि भवति समृद्धा मद्रा इति सुमद्रा वृद्ध्यर्थे यथा विगताऋद्धिर्व्यृद्धिः यवनानां व्यृद्धिरिति दुर्यवनं इति तेषामृद्ध्यभावे समासः ॥ ॥ ६९

अर्थाभावेयथामक्षिकाणामभावइतिनिर्मांक्षिकंसंसर्गाऽभावेऽयं समासः अत्ययेयथा हिमस्यात्ययोध्वंसइति अतिहिमं असंप्रत्यर्थेयथासंप्रतीत्यव्य
यामिदानीमित्यर्थेयुजिक्रियांतभावेण नञ्समासः सौत्रे बोध्यः निद्रासंप्रतिनयुज्यतेइत्यतिनिद्रम् शब्दप्रादुर्भावेयथा हरिशब्दस्यप्रकाश इति इति हरि
षष्ठ्यंतेन हरिशब्देनसहप्रकाशार्थस्येति शब्दस्यसमासः विष्णोः पश्चादिति अनुविष्णुपश्चाच्छब्दस्यतु नायमव्ययीभावोभवति ततः पश्चात् स्रंसते इ-
तिभाष्यप्रयोगात्सतिचात्राव्ययीभावेपश्चाच्छब्दस्यपूर्वनिपातः स्यादित्यर्थः यथार्थेयथायोग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः तत्रानुरू
पतायोग्यतारूपस्ययोग्यामितिअनुरूपंपदार्थानांव्याहुमिच्छावीप्सा अर्थमर्थंप्रतीति प्रत्यर्थंसमासेवीप्सायाअंतर्भावान्नाद्विः वीप्सार्थकप्रतियोगे द्वितीया

मक्षिकाणामभावोनिर्म्मक्षिकम् हिमस्यात्ययोऽतिहिमम् निद्रासम्प्रतिनयुज्यते इत्यतिनिद्रम् हरिशब्दस्यप्रकाशइतिह
रि विष्णोः पश्चादनुविष्णु रूपस्ययोग्यमनुरूपम् अर्थमर्थम् प्रतिप्रत्यर्थम् शक्तिमनतिक्रम्यकरोति यथाशक्ति हरेस्सादृश्यंस
हरि सहादेस्सादिरिति सहस्य सः ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठंचक्रेणयुगपत्सचक्रम् सदृशस्सरव्या ससरिव क्षत्राणांसंपत्तिस्सक्ष
त्रम् तृणमप्यपरित्यज्यसतृणमत्ति अग्निग्रन्थपर्य्यन्तमधीतेसाग्नि ॥ ॥

विधानात् वाक्यमपि पदार्थाऽनतिक्र
मः पदार्थानतिवृत्तिः शक्तिमनतिक्रम्येतियथाशक्तिहरेः सादृश्यमिति वक्ष्यमाणेनसहादेः सादिरित्यनेन सहस्य सादेशः सहरिआनुपूर्व्यार्थेयथाअनुपू
र्वस्य भावइत्यानुपूर्व्यंभावेतत्ययणइतियण् ज्येष्ठस्यानुपूर्व्येणेति अनुज्येष्ठंयौगपद्येयथा चक्रेणयुगपत्समकालमिति सहादेरित्यनेन सहस्यसः सचक्रंसा
दृश्येयथायथार्थत्वेनैवसिद्धेपुनः सादृश्यग्रहणंगुणभूतेऽपिसादृश्येयथास्यादित्येतदर्थंसदृशः सरव्या इतिसहादेरित्यनेनसहस्यस ः ससरिवसंपत्तौयथ-
थाअनुरूपआत्मभावः संपत्तिः क्षत्राणांसंपत्तिरिति सहादेरित्यनेनसहस्यसः सक्षत्रम्साकल्येयथा तृणमप्यऽपरित्यजेति सहादेरिति सहस्यसः सतृ
णं साकल्येनात्तिइत्यर्थः अन्तवचने यथाउच्यते तद्वचनंअंतस्यवचनंअंतवचनंतस्मिन्अग्निशब्दोअग्निप्रतिपादिकग्रंथेवर्ततेअस्वपदविग्रहोनित्यस ८१
मासोयंअग्निग्रंथपर्य्यंतमितिसाग्निअधीते ॥ ॥ ७ ७ ७ ७

यथाऽसादृश्ये असादृश्ये एव यथाशब्दः समस्यते सादृश्ये इति यथार्थे इति वा प्राप्तं निषिध्यते यथाहरिस्तथाहरः यथाशब्दो हरे रुपमानत्वं द्योतयति
अवधारणार्थे यावति च यावच्छब्दस्याव्ययत्वादेव सिद्धे नियमार्थमिदं अवधारणे एव यावदव्ययं समस्यते नाऽन्यस्मिन्नर्थे यावत्तावच्च साकल्येऽवधौ मा
नेऽवधारणे इत्यमरः यत्परिमाणं येषां ते यावन्तः एतत् किं यत्तद्भ्य इति वतुः यत्तदेतदामित्यात्वं तत्परिमाणं येषां ते तावंतः तद्धितांतेन विग्रहः समासस्त्वऽव्य
येनैवाऽस्वपदविग्रहोयं अवधारणे किं यावद्दत्तं तावद्भुक्तं नावधारयामि कियन्मया भुक्तमिति क्वचिदनव्ययपूर्वपदेऽप्यव्ययीभावः अन्यपदार्थे स्याद्यं
तं नदीवाचिभिः सह नित्यं समस्यते संज्ञायां उन्मत्तागंगा यस्मिन् पुंवद्भावः ततः उन्मत्तगंगम् देशः बहुव्रीह्यर्थेऽव्ययीभावो नित्यसमासो यं लेशा-

यथाऽसादृश्ये यथाशब्दस्सादृश्ये न समस्यते यथाहरि स्तथाहरः अवधारणार्थे यावति च अवधारणार्थे यावच्छब्दे प्रयु
ज्यमाने योऽन्वयस्सोऽव्ययीभावसञ्ज्ञकस्समासो भवति यावन्तश्श्लोकास्तावन्तोऽच्युतप्रणामा यावच्छ्लोकम् क्वचिदन
व्ययपूर्वपदेऽप्यव्ययीभावः उन्मत्तागङ्गा यस्मिन्देशे इत्युन्मत्तगङ्गम् शाकस्य लेशः शाकप्रति अक्षेण विपरीतं वृत्तमक्षपरि
शलाकया विपरीतं वृत्तं शलाकापरि एकपरि क्वचिद्वा अपविष्णोः अपविष्णु परिविष्णोः परिविष्णु बहिर्वनात् बहिर्वनम् प्रा
ग्वनात् प्राग्वनम् ॥ ॥

र्थे प्रतिना सह स्याद्यंतं नित्यं समस्यते लवलेशकणाणवः इत्यमरः शाकस्य ले
शः इति शाकप्रति अक्षशलाकासंख्याः परि णा नित्यं समस्यंते द्यूतव्यवहारे पराजये एवार्थे अक्षेण विपरीतं वृत्तमिति अक्षपरि पूर्वं यथा वृत्तं तथा न वृ
त्तमित्यर्थः शलाकया विपरीतं वृत्तमिति शलाकापरि एकेन विपरीतं वृत्तमिति एकपरि एते नित्यसमासाः अथ वैकल्पिकाः समासाः क्वचिद्वा अपप
रिबहिरंचूत्तरपदाः पंचम्या सह समस्यंते वा अपपरी वर्जनार्थकौ ग्राह्यौ बहिर्योगे तु कृते आदित्वात् पंचमी सा सर्वत्र न करस्य करभो बहिः इत्यमरोक्तेः अञ्चु
धातुरुत्तरपदं यस्य सोंचूत्तरपदो यथा प्राग्वनमिति निगर्यादाभिविध्यर्थकाङ् पञ्चम्यंते न वा समस्यते ॥ ॥ ७ ७ ७

आमुक्तिसंसारः आबालंहरिभक्तिः अभिप्रती आभिमुख्यार्थकौ चिन्हवाचिना सहवासमस्येते अभ्यग्नि शलभाःपतंति अत्र लक्ष्यलक्षणभावे विना
दित्वात् द्वितीयादैर्घ्यसमीपार्थको ऽनुश्चिन्हवाचिनापद्यंतेनसहवासमस्यते वनस्यसमीपमिति अनुवनंअशनिर्गतः लक्षणभूतस्यवनस्य समीपं गतइत्यर्थः
गंगाया अनु इति अनुगंगंसेनागंगादैर्घ्यसदृशदैर्घ्योपलक्षितेत्यर्थः समासाभावे गंगामनु विनादित्वात् द्वितीयेव समासेतु विध्यर्थत्वात्सप्तमी तिष्ठंति गावो यस्मि
न्काले सतिष्ठद्गुदो हनकालः गोरितिन्हस्वः निपातनाच्छत्रृप्रत्ययः आयंत्योगावो यस्मिन्काले सआयतीगवंसंध्या निपातनाद्वृप्रत्ययः वो ऽवित्यवृ पुंवद्भावा-
भावश्च खलेयवायस्मिन् कालेसखलेयवं सप्तम्या अलुग् निपातनात् इह बहुव्रीहि विषयेअव्ययीभावः पारमध्यशब्दौ षष्ठ्यंतेन वासमस्येते एदन्तत्वं
चानयो र्निपात्यते गंगायाः पारमिति पारेगंगं गंगायामध्यमिति मध्येगंगं पक्षेषष्ठी तत्पुरुषोपि गंगायाः पारमिति गंगापारं एवंगंगामध्यं वाक्यमपिगंगा-

आमुक्तेः आमुक्ति अभ्यग्निम् अभ्यग्नि प्रत्यग्निम् प्रत्यग्नि वनस्य समीपमुपवनम् गङ्गामनु अनुगङ्गम् तिष्ठन्ति गावो यस्मि
न्कालेसतिष्ठद्गु आयती गवम् पारे गंगायाः पारे गङ्गम् मध्येगङ्गायाः मध्येगङ्गम् इत्यादयो निपात्याः खले यवाः यस्मिन् काले
खलेयवम् द्वौमुनी वंश्यौ द्विमुनि त्रिमुनि व्याकरणस्य सप्तगङ्गास्समाहृताः सप्तगङ्गम् द्वियमुनम् ॥ ॥ ॥

याः पारंगंगायामध्यमिति वंश्यवाचिना सहसंख्यावासमस्यते वंशः संतानःस द्विविधो विद्यया जन्मनाच तत्रभवो वंश्यः द्वौमुनी वंश्यौ पाणिनिका
त्यायनाविति द्विमुनि त्रयोमुनयो वंश्याइति त्रिमुनिव्याकरणस्येति संबंधेषष्ठी अन्यपदार्थप्राधान्यविवक्षायान्तु त्रयोमुनयोवंश्या यस्मिन् त्रिमुनिबहु
व्रीहिरेवायं जन्मनावंश्यो यथा एकविंशति भारद्वाजवंश्याइति एकविंशतिभारद्वाजं नदीवाचिना सहसंख्यासमस्यते समाहारार्थे सप्तगंगाः समा-
हृताः सप्तगंगाइतिसप्तगंगंद्वेयमुनेसमाहृते इतिपुंवद्वेतिपुंवद्भावः द्वियमुनं द्विगोरपवादोयमव्ययीभावः अयसमासांतप्रत्ययानाह समासस्य समा ८२
सोत्तरपदस्यवाचरमाऽवयवाः समासांताइत्यर्थः ॥ ॥ ६९ ६९ ६९ ६९

टाडकाः टश्च अश्च डश्च कश्च ते टाडकाः समासे इत्यनुवर्त्तते टकार ईवर्थः अकारोदंतत्वफलकः डष्टिलोपार्थः कः श्रवणार्थः नत्विसंज्ञकः प्रयोजनाऽ
भावात् अव्ययीभावे शरदादिभ्यः प्रत्यय एव शरद् विपाश् अनस् मनस् उपानह् दिव् हिमवत् अनडुह् दिश् दृश् विश् चेतस् चतुर् त्यद् तद् यद् किम् एते-
शरदादयः शरदः समीपमिति उपशरदं टः विपाशं प्रतीति प्रति विपाशं विनादित्वात् प्रतियोगे द्वितीया विपाशा तु विपाट् स्त्रियामित्यमरः जराया जरस्
अव्ययीभावे जरा शब्दस्य जरसादेशः प्रत्ययश्च जरायाः समीपमिति उपजरसं टः प्रतिपरसमनुभ्योऽक्षि शब्दादव्ययीभावे टः अक्षि प्रतीति प्रत्यक्षं य-
स्येतीकारलोपः अक्ष्णः परविषय इति परोक्षं परस्य परसादेशे सस्य विसर्गे चकृते तोत्सुरित्युत्वं ओत्वे एदोतोत इत्यल्लोपः परोक्षं अक्ष्णा योग्यं इति स
मक्षं अक्ष्णः पश्चादिति अन्वक्षं अन्नंतादव्ययीभावाट्टः राज्ञः समीपमिति उपराज नोवेति टिलोपः आत्मनि इति अध्यात्मं वै कल्पिकं टप्रत्ययमाह

टाडकाः समासे सति ट अ ड क इत्येते प्रत्यया भवन्ति शरदस्समीपम् उपशरदम् प्रति विपाशं जराया जरस् उपजरसम् अ
क्षि प्रति प्रत्यक्षम् अक्ष्णः परम् परोक्षम् परशब्दस्य परस् परोक्ष इति ज्ञापकात् अन्वक्षम् उपराजम् क्लीबेवाऽनूल्लोपश्च
उपचर्म्मम् उपचर्म्म झसान्ताद्वा उपसमिधम् उपसमित् नद्यादिभ्योवा उपनदम् उपनदि इत्यव्ययीभावः अमादौ तत्पु
रुषः द्वितीयाद्यन्ते पूर्वपदे सति योऽन्वयस्स तत्पुरुषसंज्ञस्समासो भवति ग्रामं प्राप्तो ग्रामप्राप्तः ॥ ॥ अव्ययीभावेनांत नं-
पुंसकाद्विरि शब्दात् झभ प्रत्याहारांतात् नदी पौर्णमास्याग्रहायणीभ्यश्च वा टः चर्मणः समीपमिति उपचर्म्मं उपचर्म गिरेः समीपमिति उपगिरं उ
पगिरि समिधः समीपमिति उपसमिधं उपसमित् नद्याः समीपमिति उपनदं नपुंसकस्येति ह्रस्वे उपनदि पौर्णमास्याः स
मीपमिति उपपौर्णमासं उपपौर्णमासि आग्रहायण्याः समीपमिति उपाग्रहायणं उपाग्रहायणि इत्यव्ययीभावः अमादौ तत्पुरुषः अम् आदिर्यस्य सो
ऽमादिस्तस्मिन्नमादौ प्रत्यये सुप्पर्य्यंते प्रत्ययग्रहणे तदंतग्रहणमिति परिभाषया अमाद्यंते द्वितीयाद्यंते पूर्वे इत्यनुवर्त्तते पूर्वपदे सति योनाम्नोऽन्वयः स तत्पुरुषसं
ज्ञः स्यात् पूर्वे इत्युक्तत्वात् द्वितीयाद्यंतस्य पूर्वनिपातस्य श्रितातीतपतितगतात्यस्तप्राप्तापन्नगमिनूबुभुक्षुभिः सह द्वितीयांतं समस्यते श्रितादिषु आपन्नांतेषु
गत्यर्थादकर्मकादिति कर्त्तरि क्तः श्यादीनां गति विशेषवाचित्वात् ॥ ६९ ॥

कृष्णं श्रितइति कृष्णश्रितः अक्ताविति षष्ठीनिषेधः कर्म्मणि क्त प्रत्यये तु कृष्णः श्रितो येनेति बहुव्रीहिरेव तत्र च बहुव्रीहौ विशेषणसप्तम्यंतक्तान्तानां
मिति श्रितस्य पूर्वनिपाते समासांतक प्रत्यये च श्रितकृष्णक इति दुःखमतीत इति दुःखातीतः अतिपूर्वकादिणेः कर्तरिक्तः पतगतौ चुरादिरदंतोऽस्मात्क
र्तरिक्ते कूपपतितः ग्रामगतः तुहिनमत्यस्त इति तुहिनात्यस्तः अत्यासोव्यतिक्रमः सोपि गतिविशेष एवेति कर्तरिक्तः सुखमाप्तः दुःखापन्नः ग्रामं गमीति
ग्रामगमी गमेरनिरित्यौणादिको भविष्यत्काले इन् भविष्यत्यकस्येति सूत्रेण षष्ठीनिषेधात्कर्म्मणि द्वितीया अन्नंबुभुक्षुरिति अन्नबुभुक्षुः सांताशंसभिक्षि

कृष्णाश्रितः कूपपतितः ग्रामगतः खट्वारूढः मुहूर्त्तसुखम् दुःखातीतः ग्रामगमी अन्नबुभुक्षुः दात्रेणछिन्नम् दात्रछिन्नम्
मासेन पूर्वो मासपूर्वः मातृसदृशः पितृसदृशः माषोनम् वाक्कलहः आचारनिपुणः गुडमिश्रः मासावरः हरित्रातः नख
भिन्नः दध्योदनः गुडधानाः यूपायदारु यूपदारु अर्थस्य विशेष्यलिंगता द्विजायायं द्विजार्थः सूपः द्विजार्था शाटी द्विजार्थं
पयः भूतबलिः गोहितम् गोसुखम् गोरक्षितम् चौराद्भयम् चौरभयम् सुखापेतः दुःखापोढः व्याघ्रभीतिः राज्ञः पुरुषः राजपु
रुषः द्विजयाजकः देवपूजकः ॥ ॥

भ्य इत्युप्रत्ययः द्वितीयांतः खट्वाश
ब्दः कालवाची च क्तांतेन समस्यते खट्वारूढो जाल्मः नित्यसमासोयं जाल्मोऽसमीक्ष्यकारी स्यादित्यमरः मासं प्रमित इति मासप्रमितः माङ् माने क
र्तरिक्तः अत्यंतसंयोगे द्वितीयांतः कालवाची स्याद्यंतेन समस्यते मुहूर्तं सुखमिति मुहूर्तसुखं कालाध्वनोरिति द्वितीया तृतीयांतं तदर्थकृतगुणवचने ८३

नसहसमस्यते गुणमुक्त्का योद्रव्य मुक्तवान् सगुणवचनः कर्तरियुट् गुणश्चात्र सत्वे निविशते इत्यादिलक्षण लक्षितो गृह्यते छिन्नमस्यस्मिन्निति छि
न्नं दात्रेण छिन्नमितिदात्र छिन्नं करणे तृतीया छिदिर् द्वैधीकरणे अस्मा द्भावेक्ते छिन्नशब्दः क्रियारूपापन्ने गुणे वर्तित्वा पश्चात् छिन्नमस्यस्मिन्निति
छिन्नमित्यस्त्यर्थ लक्षणया तद्वति द्रव्ये वर्ततेइतिगुणवचनः तृतीयांतं पूर्वसदृशसमोनार्थकलहनिपुण मिश्र श्लक्ष्णावरैः सहसमस्यते तुल्यार्थै
योग इति समस दृशयोगे तृतीया अन्यैर्योगेतु समासविधान सामर्थ्यात् तृतीया हेतौ तृतीया वा मासेन पूर्व इतिमासपूर्वः मात्रा सदृश इति मा
तृसदृशः पित्रासमइतिपितृसमः माषेणऊनं इति माषोनं माषेण विकलइतिमाषविकलः वाचाकलह इति वाक्कलहः आचारेण निपुण इति-
आचार निपुणः गुडेन मिश्र इतिगुणमिश्रः आचारेण श्लक्ष्ण इत्याचार श्लक्ष्णः मासेन अवरोऽवर्गिति मासावरः तृतीयांते कर्तृकरणे कृदं
तेन सहबहुलं समस्येते हरिणा त्रात इति हरित्रातः कर्मणिक्तः कर्तरि तृतीया नरवैर्भिन्न इति नरवभिन्नः कर्म्मणिक्तः करणे तृतीया वातेन छेद्यं
इति वातच्छेद्यं तृणं शक्यार्थे यः काकेन पेयेति काकपेया नदी शक्यार्थे यः बहुलग्रहणात्कचिन्न दात्रेण लूनवान् हस्तेन कुर्वन् संस्कारक द्रव्यवाच
कं तृतीयांतम न्नेन सह समस्यते दध्ना उपसिक्त ओदन इति दध्योदनः उपसेकक्रियाद्वारान्वयः भिस्सा स्त्री भक्तमंधोन्न मोदनोस्त्रीत्यमरः गुडेन मि
श्रा धानाः गुडधानाः मिश्रणाक्रियाद्वाराऽन्वयः धानाभ्रष्टयवे स्त्रियां इत्यमरः तदर्थार्थबलिहितसरवरक्षितैःसह चतुर्थ्यंतं समस्यते यूपाय दारु
इति यूपदारु तादर्थ्ये चतुर्थी अर्थेन नित्यसमासो विशेष्यलिंगताच एतद्वार्तिकाभावे तु विकल्पाधिकारात् पक्षे द्विजायार्थ इत्यपिस्यात् द्वंद्वतत्पुरु
षयोः परपदस्यैवेति वक्ष्यमाणेन सर्वत्र पुंलिंगप्रयोगश्च स्यादर्थशब्दस्य पुलिंगत्वाद न इदमुक्तं भूतेभ्योबलिरिति भूतबलिः गोभ्यो हितमिति गोहि
तं गोभ्यः स्रुखमिति गोसुखं गोभ्योरक्षितमिति गोरक्षितं भयभी तभीति भीभिरपेता ऽ पोदमुक्तपतितापत्रस्तै श्च सह पंचम्यंतं समस्यते चौरा
द्भयमिति चौरभयं एवं वृकभीतः सिंहभीतिः राजभीः स्रुखादपेतइति स्रुखापेतः एवंकल्पना पोढः चक्रमुक्तः स्वर्गपतितः तरंगापत्रस्त इति
राज्ञः पुरुषइति राजपुरुषः संबंधे षष्ठी राजन् अस् पुरुष सि इत्यलौकिक विग्रहे समासे कृते समासप्रत्यययोरि ति विभक्तेर्लुकि अंतर्वर्तिनीं विभक्तिमाश्रित्यपद
त्वान्नाम्नोनोलोपः शिति नलोपः याजकादिभिः सह षष्ठ्यंतं समस्यते याजक धूजक परिचारक परिवेषक स्नातक अध्यापक उत्सादक होतृ पोतृ भर्तृ नस्तृ गणका
याजकादयः ॥ ॥

क्वचित्षष्ठीनसमस्यते निर्द्धारणेयाषष्ठीसानसमस्यते नृणांद्विज इत्यत्र क्रियागुणजातिसंज्ञाभिरिति षष्ठी पूरणगुण तृप्त्यर्थैः सहषष्ठ्यंतं न समस्यते पू
रणार्थेसतांषष्ठः षण्णां संख्यापूरणः षष्ठः षट्कतिकतिपयचतुर्भ्यथुक् इति थट् गुणार्थे काकस्यकार्ष्ण्यं कृष्णस्य भावः कार्ष्ण्यं अनित्योऽयं गुणेन नि
षेधः संज्ञाप्रमाणमर्थगौरवं बुद्धिमांद्यमित्यादिनिर्देशात् फलानांसुहितस्तृप्तः करणेषष्ठी तृतीयासमासस्तु स्यादेव अधिकरणवाचिनाक्तेनषष्ठी
नसमस्यते इदमेषामासितंगतं भुक्तंवा स्थैर्यगति भक्षणार्थेभ्य इत्यधिकरणेक्तः एषामिति कर्तरिषष्ठीवर्तमानाधारार्थक्तस्येत्यनेन कर्त्र्यर्थका-
भ्यां त्रकाभ्यांसहषष्ठीनसमस्यते अपांस्रष्टा ओदनस्य पाचकः तृज्वुणाविति कर्तरि तृज्वुण् प्रत्ययौ अपामिति ओदनस्येति कर्तृकार्ययोरित्यने
न कर्म्मणि षष्ठी कर्तृषष्ठ्यन्तमकेनसहनसमस्यते भवतः शायिका आधारे वुण् प्रत्ययोभवतीति कर्त्तरिषष्ठी वर्तमानार्थक्तेन सह षष्ठीनसमस्य-

क्वचित्षष्ठीनसमस्यते नृणांद्विजः सतांषष्ठः काकस्यकार्ष्ण्यम् फलानां सुहितः इदमेषां शायितम् अपांस्रष्टा ओद
नस्य पाचकः भवतश्शायिका क्वचिदमाद्यन्तस्य परत्वम् रायमतिक्रान्तोऽतिराः नावमतिक्रान्तोऽतिनौः पूर्वम्भूतो भू
तपूर्वः कायस्यपूर्वः पूर्वकायः अपरकायः अधरकायः उत्तरकायः अन्हो मध्यं मध्यान्हः सायान्हः मध्यरात्रः पश्चिमरात्र

ते राज्ञांमतोबुद्धः पूजितोवाराज्ञामिति कर्तरिषष्ठी क्वचिदमाद्यंतस्यपरत्वं तत्पुरुषे क्वचिदमाद्यंतस्य पदस्यपरनिपातो भवति रायमतिक्रान्त इतिअ
तिराः अत्यादयः क्रान्ताद्यर्थे द्वितीययेति समासः रैरस्मि त्यनेनाकारः पूर्वम्भूत इति भूतपूर्वः पूर्वाऽपराधरोत्तरावयवा एकसंख्याऽवयविनासम-
स्यंते कायस्य पूर्वइति पूर्वकायः कायस्यापरोदेशः अपरकायः कायस्याधरोदेशइति अधरकायः कायस्योत्तरोदेश इतिउत्तरकायः एकदेशः
कालवाचिनासमस्यते अन्होमध्यमिति मध्यान्हः राजाहः सखिभ्य इति टः नोवेत्युपधालोपः अन्हः पूर्वइति पूर्वाण्हः अन्हस्साय इतिसाया
न्हः स्यतेर्घञि अवसानवचनः सायशब्दः रात्रेर्मध्यमिति मध्यरात्रः रात्रेः पश्चिममिति पश्चिमरात्रः टाड का इत्यनेनाऽ प्रत्ययः नपुंसकोर्धश
ब्दोवयविना सह समस्यते पुंस्य र्धोर्धसमेंशके इत्यमरः ॥ ॥ ७ ७ ७ ७

८४

अर्द्धपिप्पल्याइति अर्द्धपिप्पली द्वंद्वतत्पुरुषयोरिति परलिंगत्वात् स्त्रीत्वं भाष्येतु अर्द्धपिप्पलीति कर्मधारये उक्तं समुदाये दृष्टाः शब्दा अवयवेष्वपि वर्तंते इतिन्यायात् क्वचिद्वा द्वितीय तृतीय चतुर्थतुर्याण्येकदेशिना समस्यंते अमाद्यंतस्य परनिपातश्च वा द्वितीयं भिक्षायाइति द्वितीय भिक्षाभिक्षाद्वितीयं तृतीयं भिक्षायाइति तृतीयभिक्षा भिक्षातृतीयं चतुर्थं भिक्षायाइति चतुर्थभिक्षा भिक्षाचतुर्थं तुरीयं भिक्षायाइति तुरीयभिक्षा भिक्षा तुरीयं द्वितीयां तस्य प्राप्तापन्नयोः परयोर्वापरनिपातः जीविकां प्राप्तइति जीविकाप्राप्तः प्राप्तजीविकः अन्यार्थइतिन्हस्वः द्विगुप्राप्तापन्नेति वक्ष्यमाणे नपरवल्लिंगं न कालवाचकस्य परिमाणवता सह समस्यते ३ माद्यंतस्यपरनिपातश्च तत्पुरुषे परिमीयते परिच्छिद्यते येन तत्परिमाणं परिमाणमस्यास्तीति परिमाणवान् तेनयस्यहि जननादूर्ध्वं मासोजातः समासजातउच्यते इह विग्रहे षष्ठीनिर्दिष्टस्य प्राधान्यं द्योतयितुं यस्येत्युक्तं यद्यपि मासो जातो यस्येति ब

अर्द्धपिप्पली क्वचिद्वा द्वितीयं भिक्षायाः द्वितीयभिक्षा भिक्षाद्वितीयम् तृतीयभिक्षा भिक्षातृतीयम् चतुर्थभिक्षा भिक्षाचतुर्थम् तुरीयभिक्षा भिक्षातुरीयम् जीविकाप्राप्तः प्राप्तजीविकः आपन्नजीविकः जीविकापन्नः परिमाणवता सह समस्यते अमाद्यंतस्य परनिपातश्च तत्पुरुषे समासे क्वचिदैकपद्यं णत्वहेतुः शराणां वनं शरवणम् आम्राणां वनमाम्रवणम् प्लक्षवणम् शूर्पणखा क्वचिद्वा माषवापिणौ माषवापिनौ व्रीहिवापाणि व्रीहिवापानि व्रीहिवापेण व्रीहिवापेन सुरापाणम् सुरापानम् अक्षेषु शौण्डो; क्षशौण्डः पात्रेसमितादयो निपात्याः पात्रेसमितः गेहेशूरः गेहेनर्दी ॥ ॥

हुव्रीहिणापि सिद्ध्यति बहुव्रीहौ क्वचिन्नेति-

क्तांतस्य पूर्वनिपातनिषेधात् तथापि जातवतो मासोयस्येति समास जातवानित्याद्यर्थमिदम् समासे क्वचिदैकपद्यं णत्वहेतुः एकपदस्य भाव ऐकपद्यं समासे कचितृ णत्वस्य हेतुरस्ति शराणां वनमिति शरवणं प्लक्षाणां वनमिति प्लक्षवणं आम्राणां वनमिति आम्रवणं शूर्पणखा अत्र संज्ञायां णत्वम् क्वचिद्वा क्वचित्समासे णत्वं वा भवति माषान् वारंवारं वपतीति माषवापी बहुलमाभीक्ष्ण्ये इति णिनिः व्रीहीन्वपतीति कार्येणित्यण् व्रीहिवापं तानि व्रीहिपाणि णत्वाभावे व्रीहिवापानीति व्रीहीन् वारं वारं वपतीति व्रीहिवापी तस्मै व्रीहिवापिणे शौंड धूर्त कितव व्याड प्रवीण संवीताधि अन्तर पटु पण्डित कुश ल निपुण सिद्ध शुष्क

पात्रेसमितादयश्च निपात्यन्ते भोज
पक्कबंधैः सहसमस्यं तं समस्यते अक्षेषुशौंडः प्रवीणइति अक्षशौंडः पात्रेसमितादयो निपात्याः पात्रेसमितादयः शब्दाः निंदार्थे निपात्यंते भोज
नसमये एवसंगता भवति नतु कार्य्ये पात्रेसमिताः सम्पूर्वादिणः क्तः गेहेनर्दी नर्दशब्दे अस्माण्णिनिः सप्तम्यालुगत्र एषां समासांतरे प्रवेशो न भवतीत्यर्थः ७
नञ् द्वौ नञौ प्रसज्यपर्युदासार्थकौ पर्युदासार्थकस्य नञ एकार्थीभावे समासः व्यपेक्षायां तु वाक्यमेव भवति प्रसज्यप्रतिषेधार्थस्य तु क्रियये वान्वयो न ना
न्नाअनन्वयेपि क्वापि नाम्ना समासः इणूतन्यकर्तरीति ज्ञापकात् कर्तरि न भवतीति तदर्थः तेनासूर्य्यंपश्याराजदारा इत्यादि सिद्धम् तदन्यतद्विरुद्धतदभा
वाइति त्रयो नञोर्थाः तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः १ इति केचित् यथा अब्राह्मणः अपापं अनश्वः अनु
दराकन्या अपशवः अधर्मः नञ्समासो हि अर्थाभावे ऽव्ययीभावेन सह विकल्पते अद्भुतायामसंहितमिति वार्तिकप्रयोगात् नासमासे नानञ् इति छेदः

नञ् नञ्पूर्वपदे सति यो ऽन्वयस्स तत्पुरुषसञ्ज्ञस्समासो भवति नासमासे नञो नस्यादेशः धर्म्मविरुद्धो ऽधर्म्मः
ज्ञानाविरुद्धमज्ञानम् अन्स्वरे समासे नञो नस्या ऽनृस्यात्स्वरे अश्वादन्यो ऽनश्वः संशयस्या ऽसम्भवो ऽसंशयः निरनुबन्धकस्य
तु नानौ नाकः नक्षत्रम् नक्रः नासत्यौ नैकधा चार्थेद्वन्द्वः ससमुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः तत्रैश्वरं गुरुं च भजस्वेति
प्रत्येकमेकक्रियाभिसम्बन्धः॥ आख्यातांते परेपि नञो ऽदादेशो भवति निंदार्थे अपचसित्वं जाल्मकुत्सितपचसीत्यर्थः अन्स्वरे अनश्वइ
त्यत्र ङ्णनोह्रस्वादिति द्वित्वं तु न अन पीतिनिर्देशात् निरनुबंधकस्य तु नानौ निरनुबंधस्य अश्व अनृ च आनौ तौ न भवतः सानुबंधकस्य तु भवत इत्यर्थः नभ्रा
णूनपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकनैकधाशब्देषु नशब्देनसमासः नभ्राजत इति नभ्राट् क्विवंतः नपातीति नपात् शत्रंतः
नवेत्तीति नवेदाः असुप्रत्ययांतः सत्सु साधवइति सत्याः यप्रत्ययः नसत्या असत्याः नअसत्याः नासत्याः नमुंचतीति नमुचिः नास्युपधात्किरिति किः नकुल
मस्येति नकुलः नखंछिद्रमस्येति नखः नस्त्रीपुंसौ इति नपुंसकः स्त्रीपुंसयोः पुंसकभावो निपातनात् नक्षरतीति नक्षत्रं क्षरसंचलने ष्वादिः निवासगत्योस्तु
दादिरनयोः क्षत्रमिति निपात्यते नक्रामतीति नक्रः डप्रत्ययः नअकमस्मिन्निति नाकः नएकधा नैकधा इति तत्पुरुषः चार्थेद्वंद्वः चस्यार्थश्चार्थः जातावेकवचनं
चार्थाश्चत्वारः प्रत्येकमेकक्रियाभिसंबंधः ७ ७

समुच्चयः एकमेकं प्रतीतिप्रत्येकं परस्यनिरपेक्षस्याऽनेकस्यैकक्रियायामन्वयइत्यर्थः त्वमीश्वरंगुरुंश्चभजस्वेत्यत्रभजनाक्रियायांईश्वरगुरुभ्यांप्रत्येक
संबंध स्तसमुच्चयः एकक्रियायामित्युपलक्षणं तेनपरस्परनिरपेक्षस्यानेकस्यैकस्मिन् सम्बन्धिन्यन्वयः समुच्चयइत्यर्थः राज्ञोगजश्चाश्वश्चात्र द्रव्यद्रव्य
योः समुच्चयःपटः शुक्लोरक्तश्चात्रद्रव्यगुणयोः समुच्चयः रक्तः पटः कम्बलश्चात्रगुणद्रव्ययोः समुच्चयः अनेकेएकस्मिन्समुच्चीयंतेइतिसमुच्चयः क्रमेण
क्रियाद्वयसंबंधोऽन्वाचयः परस्परनिरपेक्षस्यानेकस्यक्रियाद्वयेऽन्वयोऽन्वाचयः यदैकस्यप्राधान्यात्तदनुरोधेनान्वितरदन्वाचीयतेतदाऽन्वाचयः यथाभिक्षाम
टगाश्चानयेत्यत्रभिक्षाटनस्यप्रधानतागवानयनस्यत्वाऽनुषंगिकतामिलितयोर्मिलितानांवैकक्रियान्वयइतरेतरयोगः परस्परसापेक्षकस्यानेकस्यैकक्रिया
यामन्वयइतरेतरयोगः संहतिः समाहारः परस्परसापेक्षकस्यानेकस्यसमूहरूपेणान्वयः समाहारः इत्यर्थः चार्थेद्वन्द्वसमासोभवति द्वौद्वावर्थौअग्नि

समुच्चयः बटोभिक्षामटगांचानयेति क्रमेणाक्रियाद्वयसम्बन्धोऽन्वान्वयः मिलितयोरेकत्रान्वयइतरेतरयोगः संहितस्य
समाहारः तत्राद्ययोर्नसमासोस्त्यनन्वयात् द्वन्द्वेऽल्पस्वरप्रधानेकारोकारान्तानाम्पूर्वनिपातः पटुश्चगुप्तश्चपटुगुप्तौ अग्नि
श्चमरुच्चेअग्नामरुतौ भोक्तृभोग्यौधवखदिरौ इन्द्राश्वरथाः तापसपर्वतौ द्वंद्वेस्वराद्यदंतस्यपूर्वनिपातः ईशकृष्णौ ॥ द्वधात्सेकौ

स्मिन्निति द्वंद्वः बहूनामप्युपलक्षणमिदंननु द्वंद्वसञ्ज्ञायाः किंप्रयोजनंउच्यतेद्वंद्वतत्पुरुषयोः परपदस्यैवलिंगमितिद्वंद्वेऽल्पस्वरप्रधानेकारोकारान्तानां
पूर्वनिपातइतिक्रुतांद्वंद्वेपूर्वपदस्यात्वमित्यादिचप्रयोजनंआद्ययोः समुच्चयान्वाचययोः समासोनपरस्परसाहित्याऽभावात् अन्ययोः समाहारेतरेत
रयोगयोः समासोस्तिपरस्परसाहित्यसत्वात् इतरेतरयोगेसाहित्यंविशेषणंद्रव्यंविशेष्यंसमाहारेतुसाहित्यंप्रधानंद्रव्यंविशेषणंसाहित्यप्रधानत्वादेकव
चनं द्वंद्वेऽल्पस्वरप्रधाने कारोकारांतानांपूर्वनिपातः द्वंद्वेऽल्पस्वरशब्दस्यपूर्वनिपातः यथाधवश्चखदिरश्चधवखदिरौसमासेनोक्तार्थत्वाच्चशब्दाप्रयोगः द्वं
द्वेस्वराद्यदन्तस्यचपूर्वनिपातः स्वरआदिर्यस्यसस्वरादिः अत् अंतेयस्यसोऽदन्तः स्वरादिश्चासावदंतश्चस्वराद्यदंतस्तस्यईशश्चकृष्णश्चईशकृष्णौ बहूनां द्वन्द्वे
नियमोनइन्द्राश्वरथाः अश्वरथेन्द्रावाप्रधानस्यपूर्वनिपातौयथातापसश्चपर्वतश्चतापसपर्वतौभोक्ताचभोग्यश्चभोक्तृभोग्यौइकारोकारान्तानांपूर्वनिपातोयथा
पटुश्चगुप्तश्चपटुगुप्तौ अग्निमारुतौ ॥ ६१ ॥

देवताद्वंद्वेपूर्वपदस्याकारः इन्द्रश्चबृहस्पतिश्च इन्द्राबृहस्पती अग्निश्चविष्णुश्च अग्नाविष्णू क्वचिन्नदेवताद्वंद्वेपूर्वपदस्यात्वंनभवति क्वचित् अग्निवा
यूवायुश्चग्नीवाईदग्नेःसोमवरुणयोः आत्वस्यापवादोयंदेवताद्वंद्वेपूर्वपदस्यअग्नेरीत्स्यात्सोमवरुणयोःपरयोः अग्न्यादेःसोमादीनांसस्यषःअग्नी
षोमौ आदिशब्दात् अग्निःस्तूयतेऽस्मिन्नित्यधिकरणेक्विप्अग्निष्टुत्यज्ञविशेषःअग्नीनांस्तोमइतिअग्निष्टोमःसोमयज्ञस्यसंस्थारवांद्यसंस्थाज्यो
तिष्टोमःअयःष्टोमःअंगुलिषंगः भीरुष्ठानमित्यादिप्राणितूर्यसेनांगानांद्वंद्वएकवत्प्राणितूर्यसेनानामंगानिप्राणितूर्यसे नांगानितेषांअंगशब्दः
प्रत्येकमन्वेतिद्वंद्वांतेश्रूयमाणत्वात्प्राण्यंगानांप्राण्यंगैःसहसेनांगानांसेनांगैःसहयोद्वंद्वःसएकवद्भवतिएकेनद्वंद्वेत्वेकवद्भावोनयथामार्दंगिकाश्वारो

देवताद्वन्द्वे पूर्वपदस्याकारः इन्द्राबृहस्पती अग्नाविष्णू क्वचिन्न अग्नि-
वायूईदग्नेस्सोमवरुणयोःअग्न्यादेस्सोमादीनांसस्यषःअग्नीषोमौ अग्नी-
वरुणौ ॥ ॥

हौप्राण्यंगेदन्ताश्चओष्ठौचदन्तोष्ठं तूर्यांगेमृदंगवादनंशिल्पमस्येत्यर्थेइकप्रत्ययः णितोवेतिवृद्धिः प्रणुवंतिस्तुतिंकुर्वंत्यनेनेतिपणवोगायनपटहःणुस्तु
तौअस्माद्स्वरादइत्यप्रत्ययःसोपसर्गस्यनिपातनाद्रेफलोपेनस्यणत्वेचपणवइतिपणववादनंशिल्पमस्येतीकप्रत्ययःमार्दंगिकश्चपाणविकश्चमार्दंगिकपाण
विकम् सेनांगेरथेनचरतिइतिरथिकाःचरतीत्यर्थेइकःरथिकाश्चअश्वारोहाश्चतेषांसमाहारोरथिकाश्वारोहं ननुसमाहारस्यैकत्वादेकत्वेसिद्धेकिमर्थमिदंउच्यते ८६

प्राण्यंगादीनां प्राण्यंगादिभिः समाहार एवयथास्यादिति नियमार्थमिति प्राणिवर्जजातिवाचिनां क्षुद्रजंतूनांच द्वंद्वे एकवत् धानाश्चशष्कुल्य
श्चतासांसमाहारोधानाशष्कुलि प्राणिनांतुविट्शूद्राः द्रव्यजातिरेवात्रग्राह्या तेनरूपरसावित्यादौन यूकाश्च लिक्षाश्च यूकालिक्षम् विभाषावृक्ष
मृग तृणधान्यव्यंजनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम् वृक्षादिसप्तानांभेदकानां पर्यायाणामश्ववडवेत्यादीनांत्रयाणांचद्वंद्वः एकवद्वा भूता
श्चअशोकाश्चतेषांसमाहारोभूताशोकम् भूता शोकाः रुरवश्चपृषताश्चतेषांसमाहारोरुरुपृषतंरुरुपृषताः कुशाश्चकाशाश्चतेषांसमाहारः कुशका
शंकुशकाशाः व्रीहयश्चयवाश्च तेषांसमाहारोव्रीहियवंव्रीहियवाः दधिचघृतंचतयोः समाहारो दधिघृतंदधिघृते गावश्चमहिषाश्च तेषांसमाहारो गो
महिषंगोमहिषाः शुकाश्चबकाश्चतेषांसमाहारः शुकबकंशुकबकाः अश्वश्चवडवाचतयोः समाहारोऽश्ववडवमश्ववडवौअश्ववडवयोर्द्वंद्वः पूर्वाचअपराच
तयोः समाहारः पूर्वापरं पूर्वापरेअधराचउत्तराचतयोः समाहारोऽधरोत्तरंअधरोत्तरे फलसेनावनस्पतिमृगशकुनिक्षुद्रजंतुधान्यतृणानां बहुप्रकृति
द्वंद्व एकवत् एषांबहुवचनांतामकृतिः कारणंयस्यसबहुप्रकृतिर्द्वंद्वे एकवद्भवतीतिनियम्यते बदराणिच आमलकानिचेतिबदरामलकं प्राणिव
र्जजातीत्यनेनएकवद्भावेप्राप्ते नियमः रथिकाश्चाश्वारोहाश्चेतिरथिकाश्वारोहं सेनांगत्वान्नित्ये एकवद्भावे प्राप्ते नियमः प्लक्षाश्चन्यग्रोधाश्चेतिप्ल
क्षन्यग्रोधंविभाषा वृक्षेति वैकल्पिके एकवद्भावे प्राप्ते नियमः रुरवश्चपृषताश्चेतिरुरुपृषतं शुकाश्चबकाश्चेति शुकबकं विभाषेति वैकल्पिके एकव
द्भावे प्राप्ते नियमः नकुलपर्यंताः क्षुद्रजंतवः यूकाश्च लिक्षाश्चेति यूकालिक्षम् क्षुद्रजंतूनामित्येकवद्भावे प्राप्ते नियमः व्रीहयश्चयवाश्चेति
व्रीहियवं कुशाश्च काशाश्चेति कुशकाशं अत्रापि विभाषेतिवैकल्पिके एकवद्भावे प्राप्ते नियमः द्विप्रकृतौ एकवचनांतयोर्द्वयोः प्रकृत्योर्द्वंद्वेना
स्त्येक वद्भावइत्यर्थः बदरामलके रथिकाश्वारोहौ प्लक्षन्यग्रोधौरुरुपृषतौ शुकबकौ यूकालिक्षे व्रीहियवौ कुशकाशा वितिक्रतां द्वंद्वे पूर्वपदस्य
त्वमितिवक्ष्यमाणेनात्वं ऊद्वातृनप्तृ इत्यनेनाऽऽरहोतापोतारौ पंचसुइत्यनेनार् मातापितरौ पुत्रेचेति वक्ष्यमाणेनात्वं पितापुत्रौ मातरपितरौ निपात्यौ
मातृशब्दस्यारङादेशो निपात्यते उदीचामाचार्याणां मतेत्यदादीनि शिष्यंतेसर्वैः सहोक्तौसर्वैः शब्दैः सहोक्तानित्यदादीनि शिष्यंते ऽन्यानि पदानि
लुप्यानिलुप्यंते द्वंद्वेइत्यर्थः॥ ॥

समाहारे एकवद्भावः एकवद्भवनमित्येकवद्भावः एकत्वे द्विगुद्वंद्वौ एकत्वे वर्तमानौ द्विगुद्वंद्वौ नपुंसकलिंगौ भवतः एकत्वे किं पंचकपालाः पुरोडाशाः परत्व
द्विगोपवादोयं विधिः पाणी च पादौ च तेषां समाहारः पाणिपादम् मार्द्दंगिकश्च पाणविकश्च तयोः समाहारो मार्द्दंगिकपाणविकम् रथिकाश्च अश्वारोहाश्च
तेषां समाहारो रथिकाश्वारोहं पदान्यधीते इति पदकः क्रममधीते इति क्रमकः कप्रत्ययः पदकश्च क्रमकश्च तयोः समाहारः पदकक्रमकं बदराणि च आम-
लकानि च तेषां समाहारो बदरामलकम् शशाश्च कुशाश्च पलाशाश्च तेषां समाहारः शशकुशपलाशं अथ समासांतप्रत्ययः चवर्गान्तात् दषहान्ताच्च टः समाहा
रे वाक्‌त्वचं वाक्स्रजं शमीदृषदं वाक्‌त्विषं छत्रोपानहं समाहारे किं प्रावृट्‌शरदौ अहः पूर्वाद्रात्रिशब्दात् समाहारे अहश्च रात्रिश्च तयोः समाहारो ऽहोरात्रः
रात्रान्हाहाः ता इति पुंस्त्वं इति द्वंद्वः संख्यापूर्वो द्विगुः संख्यापूर्वा यस्य स संख्यापूर्वः समासो द्विगुसंज्ञो भवति समाससंज्ञाफलं समासप्रत्यययोरिति द्वि

समाहारे एकवद्भावः एकत्वे द्विगुद्वन्द्वौ नपुंसकलिङ्गौ भवतः पाणिपादम् मार्दङ्गिकपाणविकम् रथिकाश्वारोहम् पदक-
क्रमकम् बदरामलकम् शशकुशपलाशम् संख्यापूर्वो द्विगुः तद्धितार्थे पंचकपालः समाहारे ऽतई पृ द्विगुः समाहारे ऽर्थे द्विगु
स्समासो भवति ततो कारान्ता दीप् प्रत्ययः दशानां ग्रामाणां समाहारो दशग्रामी पञ्चाग्निः क्वचिन्न पञ्चपात्रम् ॥ ॥ गुसंज्ञा-

फलमेकत्वे द्विगुद्वंद्वाविति द्वौ गावौ शब्दौ यस्मिन्नित्यन्वर्थसंज्ञाबलात् द्वयोरेव द्विगुसमाहारो द्विगावेकवद्भावः तद्धितार्थे द्विगौ तु ने
कवद्भावः किंतु विशेष्यनिघ्नता पंचसु कपालेषु संस्कृतः पुरोडाशः संस्कृतार्थे ऽण् लुग्बहुलं क्वचिदित्यत्र क्वचिद्ग्रहणात् द्विगोर्लुगनपत्ये द्विगोर्निमित्तस्या-
ऽनपत्यार्थस्य स्वरादेस्तद्धितस्य लुग्वक्तव्य इत्यर्थो बोध्यः पंचकपालः समाहारे ऽतई पृ द्विगुः समाहरणं समाहारः भावे घञ् समाहारे राशीकरणे ऽर्थे द्विगुः
समासो भवति अदंताद्विगोः स्त्रियामीप् दशानां ग्रामाणां समाहारो दशग्रामी यस्येत्यलोपः ननु विप्रकीर्णानामेकत्र राशीकरणम् समाहारार्थः स च दशा
नां ग्रामाणां न संभवति उच्यते एकक्रियायां समन्वयात् बुद्ध्या राशीकरणस्य संभवात् उदाहरणं पंच अग्नयः समाहृता इति पंचाग्निः क्वचिन्न क्वचिददंतात् द्वि ८७
गोरीप् न स्यात् पंचानां पात्राणां समाहारः पंचपात्रम् ॥ ॥ छ छ

चतुर्णांयुगानांसमाहारः चतुर्युगं त्रयाणांभुवनानांसमाहारः त्रिभुवनं समासांतान ग्रेवक्ष्यामि इतिद्विगुः बहुव्रीहिर न्यार्थेबहुव्रीहिरित्यस्यपूर्वो-
च्चारणसामर्थ्यादन्यपदार्थाऽभावेपिबहुव्रीहिः कुत्रचिद्भवतियथाद्वौवात्रयोवाद्वित्राः पंचषट्वापंचषाः द्वौवादशवाद्विदशाः त्रयश्चदशवात्रिदशाःइत्र
त्ययांतानेनानग्रेप्रवक्ष्यामिपदानांसमासविधानादन्यशब्देनपदंगृह्यतेअन्यस्यसमस्यमानपदाद्भिन्नस्यपदस्यार्थोअन्यार्थस्तस्मिन् अमादावित्यस्यानुव
र्तनात्द्वितीयाद्यन्तंविशेषणं कर्तव्यम् अत्रहि द्वितीयाद्यंतपदेनप्रकृत्यर्थोपसर्जनक प्रत्ययार्थः कर्मादिरिरभिधीयते प्रथमांते नतुप्रातिपदिकार्थमात्रंयद्य
पित्रिकपक्षेसंख्याप्रत्ययार्थस्तथापितस्याः प्रकृत्यर्थंप्रतिविशेषणत्वान्नप्रकृत्यर्थोपसर्जनकः प्रत्ययार्थः प्रथमांतस्यास्ति एवंचद्वितीयांताद्यर्थेइतिस्थि
तं तथापरिशेषात् समस्यमानंप्रथमांत नेवलब्धं अथाप्रथमाविभक्त्यर्थेबहुव्रीहिरितिसमानाधिकरणानामितिचफलितं अनेकंप्रथमान्तम प्रथमा-

चतुर्युगम् त्रिभुवनम् आबन्ताद्वा पंचखट्वी पंचखट्वं बहुव्रीहिरन्यार्थे अन्यपदार्थे योऽन्वयस्तबहुव्रीहिसञ्ज्ञः बहुव्री-
हौविशेषणसप्तम्यंतक्तांतसर्वादिसंख्यानांपूर्वनिपातः बहुधनंयस्यसबहुधनःअस्तिधनः लंबकर्णः कण्ठेकालः वहे
गडुः कृतकटः सर्वप्रियः द्विपुत्रः ॥ ॥

र्थेऽन्यार्थे वर्तमानंसमस्यतेसबहुव्रीहिः समस्यमानपदेतरपदार्थे समस्यमानपदानामन्वयोब
हुव्रीहिरित्यर्थः कण्ठेकालइत्यादिस्तु बहुव्रीहौ विशेषणसप्तम्यन्तक्तान्तानामितिज्ञापकाद्भवतीत्यर्थःअतः सद्विधासमानाधिकरणएव व्यधिकरण-
स्तुकुत्रचित्संभवतिसामा नाधिकरण्येवैयधिकरण्यस्यान्याय्यत्वमित्युक्तत्वात् किंच बहुव्रीहि तत्पुरुषयोर्विषयविभागोयथा विज्ञायेत एतदर्थंसू
त्रेऽन्यग्रहणं कृतं द्वितीयाद्यंतमन्यपदार्थंक्रमेणोदाहरतिप्राप्तमुदकंयमितिसमासोक्तत्वात् कर्मादौप्रथमाप्राप्तोदकोग्रामः ऊढोरथोयेनसऊढरथोऽन
ड्वान उपहृतः पशुर्यस्मैसउपहृतपशूरुद्रः उद्धृतओदनोयस्याःसाउद्धृतौदनास्थालीपीतमंबरंयस्यसपीतांबरः हरिः वीरः पुरुषोयस्मिन् सवीरपुरुषोग्रामइतिबहु-

व्रीहौ विशेषणससम्यन्तक्तान्तसर्वादिसंख्यानां पूर्वनिपातः बहुव्रीहौ विशेषणं सप्तम्यंतं क्तांतं च पूर्वं प्रयोज्यं विशेषणं यथा बहुधनः अस्तीति सत्तार्थे ऽव्ययं अस्ति धनं यस्य सोऽस्तिधनः लंबो कर्णो यस्य लंबकर्णः सप्तम्यंतं यथा कंठेकालः उरसिलोमा सप्तम्या अलुगत्र क्तांतं यथा कृतः कटो येन स कृतकटः सर्वादिसंख्या च बहुव्रीहौ सर्वादिगणः संख्या च पूर्वं प्रयोज्या सर्वः प्रियो यस्य स सर्वप्रियः द्वौ पुत्रौ यस्य स द्विपुत्रः त्रिपुत्रः ॥ क्वचिन्न बहुव्रीहौ क्वचिद्विशेषणसप्तम्यंतक्तांतानां पूर्वनिपातो न भवति चन्द्रः शेखरे यस्य स चन्द्रशेखरः पद्मं नाभौ यस्य स पद्मनाभः टाडकाइत्यनेनाप्रत्ययः दंता जाता यस्य स दंतजातः ऊरू भिन्नौ यस्य स ऊरुभिन्नः क्वचिद्वा बहुव्रीहौ क्वचिद्विशेषणसप्तम्यंतक्तांतानां वा पूर्वनिपातो भवति प्रियो गुडो यस्य स प्रियगुडः गुडप्रियो वा आहितः अग्निर्येन स आहिताग्निः अग्न्याहितो वा असिरुद्यतो येन स उद्यतासिः असूद्यतो वा नञ्दुःसुभ्यः प्रजामेधयोरसुक् नञादिभ्यः पराभ्यां प्रजामेधा-

क्वचिन्न चन्द्रशेखरः पद्मनाभः दन्तजातः ऊरुभिन्नः क्वचिद्वा प्रियगुडः गुडप्रियः आहिताग्निः अग्न्याहितः असूद्यतः उद्यतासिः नञ्दुस्सुभ्यः प्रजामेधयोरसुक् अप्रजाः दुर्मेधाः सुप्रजाः सुधर्म्मा रूपवती भार्य्या यस्य अन्यार्थे स्त्रीप्रत्ययान्तस्यान्यार्थे वर्तमानस्य ह्रस्वः ॥ ॥

भ्यामसुक् प्रत्ययः स्याद्बहुव्रीहौ न प्रजा यस्य सः नाइत्यनेनादादेशः असुक् प्रत्यये घस्य लोप इत्यलोपः अत्वसोरिति दीर्घः अप्रजाः दुःप्रजाः सुप्रजाः अमेधाः दुर्मेधाः सुमेधाः अल्पमेधस इति काशिका धर्मादनृ धर्मशब्दादन् प्रत्ययः स्यात् द्विपदबहुव्रीहौ सुष्ठु धर्मो यस्य स सुधर्मा ननु अकारो व्यर्थः नप्रत्ययेनैव रूपसिद्धेरिति चेत् उच्यते धर्मं करोत्याचष्टे वेति धर्मनाम्नोर्णिर्डिल्करणे इति ज्यतात् क्विपि धर्मिति यस्मा धर्मो यस्य एकदेशविकृतस्यानन्यत्वात् अनुसपरमधर्मा इत्याद्यर्थमकारोच्चारणं बोध्यं अन्यार्थे अन्यार्थे गौणत्वे वर्तमानस्य स्त्रीप्रत्ययांतस्य नाम्नो ह्रस्वो भवति स्त्रीप्रत्ययस्येति किम् अतिलक्ष्मीः अतिचमूः गौणत्वे किम् राजकुमारी ब्रह्मविद्या किंचन पुंसकात्स्यमोर्लुगित्यतो लुगित्यनुवर्त्य वाक्यभेदेन व्याख्येयं तथाहि अन्यतद्धितस्वार्थे वर्तमानं यत् स्त्रीप्रत्ययान्तं तदवयवस्य स्त्रीप्रत्ययस्य लुक् स्यात् यथा पंचभिः पट्टीभिः क्रीतः पंचपटुः पंचभिर्ब्राह्मणीभिः क्रीतः पंचब्रा-

ह्मणः पंचभिरिंद्राणीभिः क्रीतः पंचेंद्रः पंच अग्न्याख्यो देवता स्येति पंचाग्निः पंचमनाख्यो देवतास्येति पंचमनुः अत्रहि संख्यापूर्वो द्विगुरित्यनेन तद्धितार्थे द्विगुः ततोऽण् प्रत्ययः तस्य लुग्बहुलेकंचिदित्यनेन लुक् सतद्धितार्थे गौणस्य स्त्रीप्रत्ययस्यानेन लुक् क्रियते इत्यर्थः रूपवती भार्या यस्येति लौकिक विग्रहः ७ पुंवद्भा पूर्वस्य उक्तः पुमान् येन तदुक्तपुंस्कं तस्योक्तपुंस्कस्य स्त्रीवाचक प्रत्ययांतस्य नाम्नः पुंवाचकस्येव रूपं भवति समानाधिकरणे स्त्रीलिंगे समासस्य चरमावयवे रूढपदमुत्तरपदं तस्मिन्नुत्तरपदे सति एकविभक्त्यंतानां एकार्थेनिष्ठत्वं समानाधिकरणत्वं किंचयद्यत्र उक्तः पुमान् तदुक्तपुंस्कमित्युच्यते तर्हि कुटीभार्यः द्रोणीभार्य इत्यादावतिप्रसंगः स्यात् कुटीद्रोणीशब्दाभ्यामर्थांतरे पुल्लिंगस्याप्युक्तत्वात् तथाच कुटः कोटे शिलाकुट्टे घटे गेहे कुटी सुरा ॥ चित्रगु च्छे कुम्भसादौ कूटं पूर्द्वारयंत्रयोरिति हैमः द्रोणः पार्थगुरौ काके माने द्रोणी तु नीवृति नौभेदे शैलसंधौ चेति हैमः उक्तपुंस्कस्येति किं छाया द्वितीयः गंगाभार्या यस्य स गंगाभार्यः अत्रानयोर्नित्यस्त्रीत्वं अलौकिक विग्रहे रूपवतीस् भार्यासु इति अन्यार्थे इत्यनेन ह्रस्वः पुंवद्भ इत्यनेने पानिवृत्ति ऊप्रत्ययांतस्य न उक्तपुं

पुंवद्भा पूर्वस्य समासे समानाधिकरणे स्त्रीलिंगे परे पूर्वस्योक्तपुंस्कस्य स्त्रीलिङ्गस्य पुल्लिंगस्येव रूपम् रूपवद्भार्य्यः उक्तपुंस्कस्य किम् छायाद्वितीयः गंगाभार्य्यः ऊप्रत्ययान्तस्य न वामोरूभार्य्यः पूरणार्थप्रत्ययान्ते प्रियादौ च न कल्याणीपंचमीयासां रात्रीणां ताः कल्याणीपंचमाः रात्रयः कल्याणीप्रियः ॥ ॥

स्कस्य ऊप्रत्ययांतस्य स्त्रीलिंगस्य पुंवद्भावो न भवति समानाधिकरणे स्त्रीलिंगे परे वामोरूः भार्या यस्य स वामोरूभार्यः संहितशफलक्षणवामसहितसहादेरित्यूप्रत्ययः पूरणार्थ प्रत्ययान्ते प्रियादौ च न उक्तपुंस्कस्य स्त्रीलिंगस्य पुंवद्भावो न भवति समानाधिकरणे स्त्रीलिंगे पूरणार्थप्रत्ययांते प्रियादौ च परे अलौकिकविग्रहे कल्याणीस् पंचमीस् इति अन्यार्थे इत्यनेन ह्रस्वः पूरणार्थे पंचादेर्मट् इति मट् प्रत्ययः पूरणार्थ प्रत्ययांते इत्यनेन कल्याणी इत्यत्र पुंवद्भावो न ततः समासांत प्रत्ययः यस्येतीकारलोपे ततः स्त्रियामाप् कल्याणीपंचमा प्रियामनोज्ञाकल्याणीसुभगादुर्भगाभक्तिः सचिवास्वसाकांताक्षांतासमाचपलादुहितावामाअबलातनया षोडशप्रियादयः कल्याणीप्रियाय-स्य स कल्याणीप्रियः ॥ ७ ७ ७ ७ ७

तरतमप्चरट्कल्पदेश्यदेशीयरूपपाशादौपुंवत् एषुपरेषुस्त्रियाःपुंवद्भवतिअतिशयेनदर्शनीयेतिदर्शनीयतरादर्शनीयतमातरतमेयस्त्विष्ठाइतित
रतमौभूतपूर्वादर्शनीयेतिदर्शनीयचरीभूतपूर्वेचरडितिचरट्ष्टित्वात्ङीपूईषदसमाप्तादर्शनीयेतिदर्शनीयकल्पादर्शनीयदेशीयाःईषदसमाप्तौकल्पदेश्य
देशीयाइतिकल्पदेशीयौप्रशस्तादर्शनीयेतिदर्शनीयरूपाप्रशंसायांरूपइतिरूपःकुत्सितादर्शनीयेतिदर्शनीयपाशाकुत्सायांपाशइतिपाशःआदिश
ब्दात् त्रतस् जातीय धाथ्यादयोज्ञेयाःबह्वीषुबहुत्रबहुतःपट्वीप्रकारवतीपटुजातीयाप्रकारेजातीयइतिजातीयप्रत्ययःबहुधाकिंसर्वादिबहुभ्यः
प्रकारेधाअजाभ्योहिताअजथ्याअजाविभ्यांथ्यंइतिथ्यप्रत्ययःशाशिबह्वल्पार्थस्यबह्वल्पार्थस्यस्त्रीप्रत्ययांतस्यपुंवद्भावोभवतिशसिबह्वीभ्य

तरतमप्चरट्कल्पदेश्यदेशीयरूपपाशादौपुंवत् दर्शनीयतरा दर्शनीयतमा दर्शनीयचरी दर्शनीयपाशा शसिबह्वल्पार्थ-
स्यपुंवत् बह्वीभ्योदेहि बहुशःअल्पशःत्वतलोर्गुणवचनस्यशुक्लायाभावःशुक्लत्वम् शुक्लताकुक्कुट्यादीनामण्डादिषुकुक्कु
ट्याअण्डंकुक्कुटाण्डम्मृगपदम्मृगक्षीरम्काकशावःसर्वादेस्समासादौपुंवत् दक्षिणस्याःपूर्वस्याअन्तरालंमध्येयादिक्
सादक्षिणपूर्वासर्वाप्रधानमस्येतिसर्वमयःसर्वांकरोतिसर्वंकरः॥ ॥

इतिबहुशःअल्पाभ्यइत्यल्पशःबह्वल्पार्थात्कारकादितिश
स् त्वतलोर्गुणवचनस्यगुणवचनस्यशब्दस्यपुंवद्भावोभवतित्वतलोःपरयोःकुक्कुट्यादीनामंडादिषुकुक्कुट्यादीनांपुंवद्भावोभवत्यंडादिषुपरतःकुक्कु-
ट्याअंड मितिकुक्कुटांडम् मृग्याःपदमितिमृगपदंमृग्याःक्षीरमितिमृगक्षीरंकाक्याःशावइतिकाकशावःसर्वादेःसमासादौपुंवत् सर्वादेर्गणस्यपुंवद्भावो
भवतिसमासादौआदिशब्दात्कृत्तद्धितयङाघंतधातुषु चसमासेयथादक्षिणस्याःपूर्वस्याश्चदिशोर्मध्येयादिक्सादक्षिणपूर्वातद्धितेयथासर्वाप्र-
धानमस्येतिप्राचुर्यविकारप्राधान्यादिषुमयडितिमयट्सर्वमयःकृतियथासर्वांकरोतीतिसर्वंकरःइरवरवीतिरवःखितिपदस्येतिमुम् यङाघंतधातुषु ८१
यथासर्वमिच्छतीतिकाम्यश्चेतिकाम्यप्रत्ययःसर्वकाम्यः॥ ७२ ७२ ७२ ७२

यङ्मानिनोश्च पुंवत् एतयोः परतः स्त्रीलिंगस्य पुंवद्भवति एनीवाचरतीति कर्तुर्यङिति यङि ईपो निवृत्तौ तन्निमित्तकस्य नत्वस्यापि निवृत्तिः येइति
दीर्घः एतायते दर्शनीयां मन्यते इति मनेः कर्तरि णिनिः दर्शनीयमानी प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणमिति स्वभिन्नां कांचिद्दर्शनीयां मन्य
ते या सा दर्शनीयमानिनी इहापि पुंवत् नणई प् अकतद्धिताभ्यां कोपधस्य न अकतद्धितप्रत्ययाभ्यां कृत्वा कोपधस्य स्त्रीलिंगस्य पुंवद्भावो न भवति पच
तीति ण्वुल्तृचौ इति ण्वुल् युवोरनाकौ इत्यकादेशे आबतइत्याप् प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुप इतीत्वं पाचिका भार्या यस्य स पाचिकाभार्य्यः अन्यार्थे इति ह्रस्वः रसोऽस्त्यस्या इति अत इ
नीठनौ मत्वर्थे इतीकः रसिका भार्या यस्येति रसिकाभार्यः अन्यार्थे इति ह्रस्वः एवं मद्रेषु भवा मद्रिका भ वार्थे कः आप् प्रत्ययस्थ इतीत्वं मद्रिकेवाचरतीति मद्रि
कायते मद्रिकां मन्यते इति मद्रिकामानिनी अत्र यङ्मानिनोरिति पुंवद्भावे प्राप्ते निषेधः संज्ञापूरणार्थप्रत्यययोर्न अनयोः पुंवद्भावो न भवति दत्ता भार्या यस्ये

यङ्मानिनोः पुंवत् एनीवाचरति एतायते दर्शनीयां मन्यते दर्शनीयमानी चैत्रः अकतद्धिताभ्यां कोपधस्य न पाचिकाभार्य्यः
रसिकाभार्यः संज्ञापूरणार्थप्रत्यययोर्न दत्ताभा र्यः पंचमीभार्य्यः वृद्धिहेतोस्तद्धितस्याऽरक्तविकारार्थस्य न माथुरीभा-
र्य्यः अरक्ते किम् कषायेण रक्ता कन्या काषायी काषायी कन्था यस्य स काषायकन्थः विकारे किम् हेम्नो विकारो हैमी मुद्रिका
यस्येति हैममुद्रिकः ॥ ॥ ति दत्तां मन्यते इति स्त्रियां पुंसि च संज्ञाभूतोयं दत्तशब्दो भाषितपुंस्कोस्ति दत्ताभार्यः दत्तामानिनी पंचमीभार्या यस्ये
ति कुत्सिता पंचमीति पंचमीभार्यः पंचमीपाशा पंचादेर्मडिति संख्यापूरणे मट् पंचमीपाशेत्यत्र तरतमेति प्राप्ते निषेधः वृद्धिहेतोस्तद्धितस्याऽरक्तविकारार्थस्य
न आदिस्वरस्येति सूत्रेण विहिता या वृद्धिस्तस्या हेतुर्यस्तद्धितोऽरक्तविकाराववर्थो यस्य सोऽरक्तविकारार्थस्तस्यारक्तविकारार्थस्य तद्धितस्य पुंवद्भावनिषे
धो न भवति मथुरायाम्भवा माथुरी भवार्थेऽण् आदिस्वरस्येति वृद्धिः नणइतीप् माथुरी भार्या यस्य स माथुरीभार्यः माथुरीवाचरतीति माथुरीयते कर्तुर्य
ङिति यङ् माथुरीं मन्यते इति माथुरीमानिनी अत्र पुंवद्भावो न वृद्धिहेतोरिति किं मध्ये भवा मध्यमा मध्यान्म इति भवार्थे मः मध्यमा भार्या यस्य स मध्यमभा
र्यः तद्धितस्येति किं काण्डं लुनातीति काण्डलावी कार्येऽणित्यण् कृदयं कांडलावी भार्या यस्य स कांडलावभार्यः आदिस्वरस्येति विहिता वृद्धिरिति किं

तत्परिमाणमस्याअस्तीतितावती एतत्किंयत्तदभ्यइतिवतुःयत्तदेतदामित्याकारः तावतीभार्यायस्यसतावद्भार्यः अरक्तविकारार्थस्येतिंकिंकषायेणर-
क्ताकाषायीकारकात् क्रियायुक्तेइतितेनरक्तमित्यर्थेऽण् त्रणइतीप् काषायकंथः पुंवद्भावादीपोनिवृत्तिः हेम्नोविकारोहैमी विकारार्थेऽण् त्रणइतीप् हैमी
मुद्रिकायस्यसहैममुद्रिकः पुंवद्भावः ध्युटिसतिपुंवत्वृद्धिहेतोस्तद्धितस्याऽरक्तविकारार्थस्यस्त्रीप्रत्ययांतस्यपुंवद्भावोभवतियुडागमेकृतेसतिव्याकर
णमधीतेवेत्तिवाइत्यर्थे अण्नसंधिय्वो रितियुट् पश्चाद्वृद्धिः त्रणइतीप् वैयाकरणीभार्यायस्यसवैयाकरणभार्यः सुष्ठुअश्वोयस्यसस्वश्वः स्वश्वस्यापत्यं
स्त्रीऊठ्वृद्धीसौवश्वीभार्यायस्यससौवश्वभार्यः स्वांगादीपोऽमानिनिचस्वांगात्परस्यईप्प्रत्ययस्यपुंवद्भावोनभवतिमानिन्शब्देपरे तुपुंवद्भावोभवतीत्य
र्थः सुष्ठुकेशायस्याः सास्वांगाद्वेतीप्सुकेशीभार्यायस्यससुकेशीभार्यः स्वांगात्किं पट्वीभार्यायस्यसपटुभार्यः ईपूइतिकिंनविद्यंतेकेशायस्याः साअके-

युटिसतिपुंवत् वैयाकरणभार्य्यः स्वाङ्गादीपोऽमानिनिन सुकेशीभार्य्यायस्यस सुकेशीभार्य्यः मानिनितुसुकेशमानि
नीजातिवाचिनस्त्रीप्रत्ययान्तस्यनशूद्राभार्य्यः ब्राह्मणीभार्य्यइत्यादिगोः गोशब्दस्यान्यार्थेवर्तमानस्यह्रस्वोभवतिपं
चगावोयस्यसपंचगुः संख्यासुव्याघ्रादिपूर्वस्यपादशब्दस्यान्तलोपः ॥ ॥

शासहनञीतिङ्इनिषेधः अकेशाभार्यायस्यसअकेशभार्यः पुंवद्भावः सुकेशीमन्यतेयः ससुकेशमानीस्त्रीतु सुकेशमानिनी जातिवाचिनः स्त्रीप्रत्य
यांतस्यनजातिवाचिशब्दात्परस्यस्त्रीप्रत्ययस्यपुंवद्भावोनभवतिशूद्राभार्यायस्यसशूद्राभार्यः अजादेरित्याप्ब्राह्मणीभार्यायस्यसब्राह्मणीभार्यः जा
तेरितीप् गोः अन्यार्थेवर्तमानोयोगोशब्दस्तदंतस्यनाम्नोह्रस्वोभवतिपंचगावोयस्यसपंचगुः पंचभिर्गोभिः क्रीतः सपंचगुः क्रीतार्थेइकस्यलुक् वाअन्यार्थेकिं
अतिशयितोगौरतिगौः संख्यासुव्याघ्रादिपूर्वस्यपादशब्दस्यांतलोपः संख्यासुपूर्वस्यव्याघ्रादिपूर्वस्य चपादस्यांतस्यलोपः स्यात्बहुव्रीहौसमासांतो १०
यमादेशोऽलोपः अन्यथासमासांतः कः प्रसज्येत् ॥ ७ ७ ७ ७

सहस्त्रं पादायस्यस सहस्त्रपाद् शसादौस्वरे तद्धितयस्वरयोरीपी कारेच पदादेशः पादशब्दस्य पदादेशः स्यात् शसादौ स्वरे सहस्त्रपदः ईपि द्विपदी पादोवेतीपू ईकारे व्याघ्रपदी कुले तद्धितयस्वरे वैयाघ्रपद्यः ण्ययुटौ तद्धितस्वरे वैयाघ्रपदः अण् युटौ अन्यपदार्थाभावे समानाधिकरणाऽभावे च क्वचि द्बहुव्रीहिर्भवति यथा पुत्रेण सह वर्ततेयः ससपुत्रः सह इत्यस्य तृतीयांतेन समासः संख्येयार्थया संख्यया सहाऽव्ययासन्नादूराधिकसंख्याः सम स्यंते स बहुव्रीहिर्भवति दशानां समीपेयेसंति तेउपदशाः नव एकादश वेत्यर्थः उपशब्दो हि समीपे समीपिनि च वर्तते समीपेऽव्ययीभावः समीपिनि तु बहु व्रीहिर्भवतीति आसन्नाविंशतेर्येसंतिते आसन्नविंशाः डप्रत्ययः विंशतेस्तिलोपो डितीतिलोपः अदूरास्त्रिंशत इति अदूरत्रिंशाः अधिकाश्चत्वारिंशत इति अधिकचत्वारिंशाः द्वौवात्रयोवा द्वित्राः चार्थेऽयं बहुव्रीहिः दक्षिणपूर्वा तेषु गृहीत्वा इदं युद्धं प्रवृत्तमित्यर्थे तेन प्रहृत्येदं युद्धं प्रवृत्तमित्यर्थे च स-

भय॰

सहस्त्रं पादायस्यस सहस्त्रपात् शसादौस्वरे तद्धितयस्वरयोरीमी कारेच पदादेशः सहस्त्रपदः व्याघ्रपदीकुले वैयाघ्रपदः वैया घ्रपद्यः द्विपाद् द्विपादौ द्विपादः सुपात् व्याघ्रपात् दाडकाः मध्यान्हः पूर्वाह्णः ॥ ॥

सप्तम्यंतयोस्तृतीयांतयोश्च पदयोः समासो भव- ति क्रियाव्यतिहारे द्योत्ये स बहुव्रीहिः अत्र पूर्वपदस्य दीर्घः वक्ष्यमाणः समासांत इप्रत्ययः इप्रत्ययांतस्याऽव्ययसंज्ञा च केशेषु केशेषु गृहीत्वाइ दं युद्धं प्रवृत्तमिति केशाकेशि दंडैश्च दंडैश्च प्रहृत्येदं युद्धं प्रवृत्तमिति दंडादंडि मुष्टिभिर्मुष्टिभिः प्रहृत्येदं युद्धं प्रवृत्तमिति मुष्टीमुष्टि बाहुषु बाहुषु गृहीत्वाइदं युद्धं प्रवृत्तमिति बोऽवृयस्वरे इत्यवादेशः बाहूबाहवि अथ समासांत प्रत्यया उच्यंते पूरणार्थप्रत्ययांतं यत् स्त्रीलिंगं तदंतात् प्रमाण्यंता- द्बहुव्रीहेरः कल्याणी पंचमारात्रयः अत्र संख्या पूरणे मट् पूरणार्थप्रत्ययांते ईर्इति पुंवद्भावे निषेधः स्त्री प्रमाणी यस्य स स्त्रीप्रमाणः नित्यस्त्रीत्वा न्नपुंवद्भावः प्रमाति अनयेति प्रमाणी करणे युट् प्रधानेकार्यसंप्रत्यय इतिन्यायात् प्रधाने पूरणार्थप्रत्ययांत स्त्रीलिंगे एवा प्रत्ययः पुंवद्भावनिषेधश्च रात्रिः पूरणार्थप्रत्ययवाच्याचेत्युक्तोदाहरणे मुख्या अन्यत्र तु कल्याणपंचमीकः पक्षः क एव नक्षत्रार्थे नेतृशब्दांताद् बहुव्रीहेरः मृगो मृगशीर्षनक्ष

द्विगवनाद
प्रा द्विदपण
विंप्रा ति
न्यस्य २५
प्रत्यपा यपि
बहुव्रीहि
दि क्ष्या मा
न्य त्वरहे
समस्य न्ते
स बहुव्रीहि-

त्रंनेतानायकोयासांताः मृगनेत्रारात्रयः अंतर्बहिःपूर्वपदाल्लोमन्नंता द्बहुव्रीहेरः अंतर्लोमः बहिर्लोमः नोवेति विलोपः नासिकांता द्बहुव्रीहेरः स्थूलपू
र्वात्तुनद्बुरिवनासिकायस्येतिसहादेरिति नासिकायानसूद्रुणसः खरानासिका यस्यसखरणसः उभयत्रसंज्ञायाम ः असंज्ञायां खुरखराभ्यां नासिका-
यावा अप्रत्ययः खुरणसः खुरणाः खरणसः खरणाः उपसर्गाच्च नासिकायांअः असंज्ञायाम् उन्नतानासिका यस्यसप्रणसः स्थूलपूर्वात्किंस्थूलना
सिकः सुप्रातसुश्व स्कदिव शारिकुक्षिचतुरस्रैणी पदाऽ जपदप्रोष्ठप दा अप्रत्ययांता निपात्यंतेबहुव्रीहौ शोभनं प्रातरस्येति सुप्रातः रनिवृ
त्तिनिपातनात् शोभनं श्वोऽस्येतिसुश्वः स्निवृत्तिर्निपातनात् शोभनं दिवाऽस्येति सुदिवः शारेरिव कुक्षिरस्येति शारिकुक्षः चतस्रोऽश्रयोऽस्ये
ति चतुरस्रः तालव्य शस्यदंत्यः सोनिपातनात् एण्या इव पादायस्येति एणीपदः अजपदः प्रोष्ठपदः निपातनात्सदादेशः नञ्दुः सुपूर्वपदाद्धलि
सकृथिशक्त्यंता द्बहुव्रीहेरोवा अहलः अहलिः असकृथः असकृथिः अशक्तः अशक्तिः ईदूदंतस्त्रीलिंगोत्तरपदाच्च बहुव्रीहेः कः कल्याणी पं
चमी रात्रिर्यस्मिन् स कल्याण पंचमीकः पक्षः बहवः कर्तारो यस्यस बहुकर्तृकः प्रासादः उरः प्रभृत्यंता द्बहुव्रीहेः कः व्यूढं विशाल मुरोयस्य-
स व्यूढोरस्कः प्रियंसर्पिर्यस्य स प्रियसर्पिष्कः वाचस्पत्या दित्वात् सषौ इहोरः प्रभृतौपुमान् अनड्वान् पयः नौःलक्ष्मीरित्याद्येकवचनांतादेव
कः द्विवचनबहुवचनांतेभ्यस्तु वैकल्पिकः कोभवतीति विवेकः यथा द्विपुमान् द्विपुंस्कः नञ्पूर्वादर्थात्कोबहुव्रीहौ अनर्थकः इन्नंता द्बहुव्री-
हेः कः स्त्रियां बहुदंडिका नगरी अनुक्तसमासांताद्बहुव्रीहेर्वा कः महायशस्कः महायशाः आबंतस्यवा-ह्रस्वः केबहुमालाकः बहुमाल
कः काभावे बहुमालः ईयसुप्रत्ययांतोत्तरपदाद्बहुव्रीहेर्नकः बहवः श्रेयांसोऽस्य सबहुश्रेयान् अन्यार्थ इति ह्रस्वे प्राप्ते ईयसुप्रत्य
यांतस्य स्त्रीलिंगस्यह्रस्वोनबहुव्रीहौ बह्व्यःश्रेयस्योऽस्यस बहुश्रेय सीबहुव्रीहौकिम् अतिश्रेयसिः संख्येयेबहुव्रीहेर्डो नतुबहुगणाभ्यां
उपदशाः बहुगणाभ्यां किम् उपबहवः उपगणाः स्वांगवाचिसकृथ्यक्ष्यंता द्बहुव्रीहेः षच्प्रत्ययः दीर्घसकृथिनीयस्य स दीर्घसकृथः जलजाक्षी
स्वांगवाचीति किम् दीर्घसकृथिशकटं स्थूलानि अक्षीणि पर्वाणि यस्याः सास्थूलाक्षा वेणुयष्टिः वक्ष्यमाणो डप्रत्ययः अंगुल्यंताद्बहुव्रीहेः षच्-
दारुण्यर्थे पंचांगुलयो यस्यतत्पंचांगुलं दारु अंगुलिसदृशावयवं धान्यादिविक्षेपकंकाष्ठंबहुव्रीहेरिति ॥

किंद्वे अंगुलीप्रमाणमस्या इति द्व्यंगुलायष्टिः तद्धितार्थे द्विगुः प्रमाणेद्वयसज्दघ्नज् मात्रच् इति मात्रच् तस्यलुक्च ततःसमासांतोऽप्रत्ययः दारूणि
किंपंचांगुलिर्हस्तः द्वित्रिपूर्वात्मूर्द्धांताद्बहुव्रीहेःषः द्विमूर्द्धः त्रिमूर्द्धः नोवेतिविलोपः सुहरितनृणसोमेभ्यःपराद् जंभादन्बहुव्रीहौ जंभोभक्ष्येचदंतेचेति
शोभनोजंभोयस्यससुजंभाहरितजंभातृणंजंभोभक्ष्यंयस्यतृणमिवजंभादंताअस्येतिवातृणजंभासोमजंभाव्याधयोगेदक्षिणेर्मेत्यन्नंतंनिपात्यतेब
हुव्रीहौदक्षिणेईर्मव्रणंयस्यसदक्षिणेर्मामृगःव्याधेनकृतव्रणइत्यर्थः क्रियाव्यतिहारेबहुव्रीहेरिः केशाकेशिमुशलामुशलिप्रहरणेर्थेद्विदंडिद्विमुशलि
उभाहस्तिउभयाहस्तिइतिइप्रत्ययांतानिपात्यंतेबहुव्रीहौद्वौदंडौयस्मिन्प्रहरणेतद्द्विदंडिद्विमुशलिउभाहस्तिउभयाहस्तिनिपातनाद्वाऽभयेति इतिबहुव्रीहिः
अथद्विगुतत्पुरुषकर्मधारयसमासांताः गोंताद्द्विगुतत्पुरुषकर्मधारयाट्टोनतुतद्धितलुकिपंचगवं तद्धितलुकि किंपंचभिर्गोभिः क्रीतइतिपंचगुः क्री
तार्थे इकस्तस्यलुक्चदेवगवीपरमगवीसंख्याव्ययादेरंगुल्यंताद्द्विगुतत्पुरुषकर्मधारयादः द्वेअंगुलीप्रमाणमस्येति द्व्यंगुलं दारु प्रमाणेद्वयसज्दिति
मात्रच् तस्यलुक्चनिर्गतमंगुलिभ्यइतिनिरंगुलं एकांगुलासर्वैकदेशसंख्यातपुण्यसंख्याऽव्ययेभ्योरात्रेरः द्विगुतत्पुरुषकर्मधारयेसर्वांचासौरात्रि
श्चेतिरात्रान्हाहांताइतिपुंस्त्वं सर्वरात्रः रात्रेः पूर्वमितिपूर्वरात्रः संख्यातरात्रः पुण्यरात्रः द्वयोः रात्र्योः समाहारइति संख्यापूर्वंरात्रमितिक्लीबता
द्विरात्रं अतिक्रांतोरात्रिमित्यतिरात्रः राजाहः सखिभ्यष्टो द्विगुतत्पुरुषकर्मधारयेकविराजः उत्तमाहः रात्रान्हाहांताइतिपुंस्त्वंपुण्याहं पुण्यसुदिनाभ्या
मितिक्लीबता कृष्णसखः पंचान्हं सुरव्यवाचिनउरसष्टः तत्पुरुषेअश्वानामुरइत्येवेत्यश्वोरसम् मुख्याऽश्वइत्यर्थः अनोऽश्माऽयःसरोभ्यष्टोजातिसंज्ञार्थे
तत्पुरुषकर्मधारयेउपानसम् अमृताश्मः कालायसः मंडूकसरसमितिजातिः महानसम् पिंडाश्मः लोहितायसं जलसरसमितिसंज्ञायामकौटा
भ्यां तक्ष्णष्टस्तत्पुरुषकर्मधारयेग्रामस्यतक्षाग्रामतक्षः साधारणइत्यर्थः कुट्यांभवःकौटः स्वतंत्रः कौटश्चासौ तक्षाचकौटतक्षः अतेःशुनष्ट
स्तत्पुरुषेश्वानमतिक्रांतोजवेनेत्यऽतिश्वोवराहः अतिश्वीसेनेत्यर्थः अप्राणिविषयकोपमानवाचिनः शुनष्टस्तत्पुरुषेआकृष्यतेऽनेनखलादि
गतंधान्यमित्याकर्षः काष्ठविशेषः आकर्षः श्वेवेतिआकर्षश्वः अप्राणि विषयकेतिकिंवानरः श्वेवेतिवानरश्वाउत्तरमृगपूर्वोपमानात् सक्थ्नष्टस्त
त्पुरुषेउत्तरसक्थंमृगसक्थंपूर्वसक्थंफलकसक्थंनौशब्दांतात् द्विगोष्टोनतुतद्धितलुकि द्विनावंत्रिनावंनतुतद्धितलुकीतिकिंपंचभिर्नौभिः

क्रीतइतिपंचनीः अत्रक्रीतार्थेइकस्तस्यलुक्च अर्द्धपूर्वान्नावस्तत्पुरुषेनावोऽर्द्धमित्यर्द्धनावं क्लीबत्वंलोकात् खारीशब्दांताद्द्विगोरर्द्धपूर्वात्खार्यं
तात् तत्पुरुषाच्चवाटः द्विखारंटाभावे द्विखारिक्लीबत्वंलोकात् अर्द्धखारंद्वंद्वतत्पुरुषयोरितिपरपदलिंगेअर्द्धखारीद्विगोद्वित्रिभ्यामंजलेष्टोवानतुतद्धित
लुकिद्व्यंजलंद्व्यंजलिनतुतद्धितलुकीति किम् द्वाभ्यामंजलिभ्यांक्रीतइतिद्व्यंजलि ःक्रीतार्थेइकस्तस्यलुक्च ब्रह्मशब्दांतात्तत्पुरुषाट्टोजानपदेदेर्थेसुराष्ट्रेब्र
ह्मासुराष्ट्रब्रह्मः कुमहद्भ्यांब्रह्मणष्टोवातत्पुरुषकर्मधारयेकुत्सितोब्रह्माकुब्रह्मः कुब्रह्मामहाब्रह्मः महाब्रह्माब्राह्मणपर्यायोब्रह्मन्शब्दः संख्यांतात्त
त्पुरुषाड्डः निर्गतानित्रिंशतइतिनस्त्रिंशानिवर्षाणिचैत्रस्यनिर्गतस्त्रिंशतोऽगुलिभ्यइतिनिस्त्रिंशः खड्गः इतिद्विगुतत्पुरुषकर्मधारयसमासांताः
अथसकलसमाससाधारणसमासांताः ऋक्पूरब्धूःपथामोऽक्षेयाधूस्तत्रतुनऋचोर्द्धमितिअर्द्धर्चः अर्द्धर्चादयइतिपुंस्त्वअनृचबह्वृचशब्दावध्येत
र्य्येवनेह अनृक्सामबह्वृक्सूक्तंवैकल्पिकः कप्रत्ययस्तुभवत्येव अनृक्कं बह्वृक्कमिति विष्णोः पूरितिविष्णुपुरं क्लीबत्वंलोकात् विमलापंसरः द्व्यंतरुप-
सर्गेभ्यः कृतसमासांतस्याऽपस्यादेरिः द्विर्गताआपोयस्मिन्निति द्वीपं अंतर्गताआपोऽस्मिन्निति अंतरीपं प्रतिकूलाआपोऽस्मिन्निति प्रतीपं संगता
आपोऽस्मिन्निति समीपं कथंतर्हिसमापोदेवयजनमितिसमाआपोयस्मिन्निति समापः देवाइज्यंतेऽस्मिन्निति देवयजनंयज्ञभूमिरितिज्ञेयं कृतसमा
सांतग्रहणान्नेह स्वपूसरः पूजनार्थेतिनिषेधात्समासांताऽभावः अवर्णांतादुपसर्गात्कृतसमासांतस्यापस्यादेरीर्वाप्रेपंपरेपं प्रापंपरापं अनोः कृतसमा
सांतस्यापस्यादेरुः अनुगताआपोऽस्मिन्निति अनूपोदेशः जलप्रायमनूपंस्यादित्यमरः राजधुराअक्षेइतिकिं अक्षधूः दृढधूरक्षः सखिपथोरम्यपथो
देशः प्रत्यऽन्वऽवपूर्वाभ्यांसामलोमभ्यामः प्रतिसामम् अनुसामं अवसामं प्रतिलोमं अनुलोमं अवलोमं बहुव्रीह्यव्ययीभावप्रादिसमासाअत्र कृ-
ष्णोदक्पांडुसंख्यापूर्वायाभूमेरः कृष्णभूमः उदग्भूमः पांडुभूमः द्विभूमः त्रिभूमः प्रासादः बहुव्रीहावेतेसंख्यायानदीगोदावरीभ्यामः पंचनदंस
प्तगोदावरं अव्ययीभावे एतौनाभेरः पद्मंनाभावस्येतिपद्माकारानाभिरस्येतिवा पद्मनाभः अचक्षुःपर्यायादक्ष्णोऽप्रत्ययः गवांकिरणानामक्षिरंध्र-
मिवेतिगवाक्षः ब्रह्महस्तिपल्यराजभ्योवर्चसोऽप्रत्ययः ब्रह्मवर्चसं हस्तिवर्चसं पलंमांसमर्हतीतिपल्योमांसभोजी पल्यवर्चसंराजवर्चसंषष्ठीतत्पुरुषोऽत्र ९२
अवसमंधेभ्यस्तमसोऽप्रत्ययः अवहीनंतमइति अवतमसं समंतातृतमइतिसंतमसंअंधयतीतिअंधंअंधदृष्ट्युपघातेचुरादिरस्मात्पचाद्यच्प्रत्ययः

अंधंगादं तमइत्यंधतमसं श्वस् शब्दादृसीयः श्रेयोर्थ्यागमःवसुशब्दः प्रशस्तवाचीतस्मादीयसुप्रत्ययेवसीयइतिश्वस् शब्दस्तुकालवाच्यप्यत्राशीर्विषयता
द्योतकोस्तिश्वोवसीयसंश्वःश्रेयसंकर्मधारयोऽत्रअन्ववतमेभ्योरहःशब्दादःरहइत्यनेनाऽप्रकाशमुच्यतेअनुगतंरहइत्यनुरहसंअवहीनंरहइत्यवरहसंअनुगतंरहो
ऽस्मिन्नित्यादिबहुव्रीहिर्वातप्तंचतद्रहश्चेतितप्तरहसंपरेणानधिगम्यमित्यर्थःप्रतेरुरस्शब्दादःउरसिइतिप्रत्युरसंसप्तम्यर्थेअव्ययीभावोयंअप्रत्ययांतमनुगवं
दीर्घत्वेनिपात्यते अनुगवंयानंगोदैर्घ्यसदृशदैर्घ्योपलक्षित मित्यर्थःउपसर्गादध्वशब्दादःप्रगतोऽध्वानमितिप्राध्वोरथःअचतुरविचतुरसुचतुरत्रिचतुरउपचतुर
स्त्रीपुंसधेन्वनडुहऋक्सामवाङ्मनसाऽक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाऽहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषऋग्यजुषजा
तोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाःअप्रत्ययांतानिपात्यंतेअविद्यमानानिचत्वार्यस्येतिअचतुरःविचतुरःसुचतुरःत्रयश्चत्वारोवेतित्रिचतुरःचतुर्णांसमीपेयेसं-
तितेउपचतुराःएतेपंचबहुव्रीहयःतेनतत्पुरुषेअचत्वारोविचत्वारइत्येवंभवतीतिभावःस्त्रीपुंसौधेन्वऽनडुहौऋक्सामेवाङ्मनसेअक्षिणीचभ्रुवौचअक्षिभ्रु
वंप्राण्यं गत्वादेकवद्भावःदाराश्चगावश्चदारगवंऊरूचअष्ठीवंतौचऊर्वष्ठी वंनिपातनाट्टिलोपःजानूरुपर्वाऽष्ठीवदऽस्त्रियामित्यमरःसक्थिक्लीबेपुमानूरुःइ
तिचामरःपदष्ठीवंनिपातनात्पादस्यपद्भाण्यंगत्वादेकवदुभयत्रनक्तंचदिवाचनक्तंदिवंरात्रौचदिवाचरात्रिंदिवंरात्रेर्मांतत्वंनिपातनात्अहनिचदिवाचेतिअहर्दि
वंवीप्सायांद्वंद्वोनिपात्यतेअहन्यहनीत्यर्थःएतेएकादशद्वंद्वाःरजःअपिअपरित्यज्येतिसरजसंसाकल्येऽव्ययीभावोयंबहुव्री हौतुरजसासहवर्ततेइतिसर
जसंपंकजमितिनिश्चितंश्रेयइतिनिःश्रेयसंतत्पुरुषएवायंबहुव्रीहौ तुन निश्चितंश्रेयोयेनेतिनिःश्रेयान्पुरुषःपुरुषस्यायुःपुरुषायुषंतत्पुरुषोयंद्व्यायुषं-
त्र्यायुषंएतौद्विगूऋ ग्यजुषंद्वंद्वोऽयंजातोक्षःमहोक्षःवृद्धोक्षःएतेत्रयःकर्मधारयाःशुनःसमीपंउपशुनंटिलोपाऽभावःसंप्रसारणंचनिपात्यतेव्ययीभा
वेगोष्ठेश्वेतिगोष्ठश्वःसप्तमीतत्पुरुषएवायंषष्ठीतत्पुरुषेतिनगोष्ठश्वापूजनार्थेस्वस्तिपूर्वकान्नाम्नःसमासांतानबहुव्रीहौतुभवंतिसुराजाअतिराजापूजना-
र्थेतिकिंगामतिक्रांतोऽतिगवःबहुव्रीहौकिंसुष्ठुसक्थिनीयस्यसःसुसक्थःसुष्ठुअक्षिणीयस्यसःस्वक्षःटप्रत्ययोऽत्रनिंदार्थेकिम्पूर्वान्नाम्नःसमासांतानकु
त्सितोराजाकिंराजाकिंसखाकिंगौःनिंदार्थक तिकिंकिंराजःकिंसखःकिंगवःनञ्तत्पुरुषात्समासांतानअराजाअसखातत्पुरुषात्किंनविद्यतेधूर्यस्यतत्अधुरंश
कटंनञ्पूर्वपथिशब्दाद्वासमासांतस्तत्पुरुषेअपथंअपंथाःअपथंतत्पुरुषेक्लीबमितिक्लीबत्वंतत्पुरुषेकिंअपथोदेशःबहुव्रीहिरत्रअपथंअर्थाभावेऽव्ययीभावोऽयमइ
तिसकलसमाससाधारणाःप्रत्ययाःअथप्रकृतमनुसराम[illegible]पूर्वमितिपूर्वाण्हःकवीनांराजेतिकविराजःकृष्णस्यसखेतिकृष्णसखः

सि॰ चं॰ राजाहःसखिभ्यष्टइतिटप्रत्ययः॥ ७ ॥नोवानांतस्यनाम्नः टेर्लोपस्तद्धितेयस्वरेचअत्रसमासांतास्तद्धितांतर्भूताज्ञेयाःअत्रवेतिव्यवस्थार्थंतेनक टी॰ सु॰
९३ चिट्टिलोपःक्वचिदुपधालोपःक्वचिन्नोभयंटिलोपोयथाउडुलोम्नोऽपत्यमितिऔडुलोमिःराज्ञःकर्मेतिराज्यंकविराजःउपधालोपोयथावृत्रघ्नोऽपत्यंवार्त्रघ्नःत पू॰
क्ष्णोऽपत्यंताक्ष्णःअन्हःपूर्वःपूर्वाण्हःनोभयंयथाब्रह्मणोऽपत्यंब्राह्मणइत्यादिदेवानांगौर्देवगवीपरमाचासौगौश्चपरमगवीगोंताद्द्विगुतत्पुरुषकर्म्मधा
रयाट्टइतिटःराजधुरंएकधुरंसर्वधुरःकर्मधारयेपुंवत्ऋक्पूरब्धूःपथामइत्यप्रत्ययःवाक्चमनश्चवाङ्मनसंअचतुरविचतुरेत्यनेनाप्रत्ययोद्वंद्वेदक्षिणाप
थःऋक्पूरब्धूःपथामइत्यप्रत्ययःअहश्चरात्रिश्चअहोरात्रःअहःपूर्वाद्रात्रिशब्दादःसमाहारेइप्रत्ययःरात्रान्हाहांतादइतिपुंस्त्वंद्वौवात्रयोवाद्वित्राःपंचवाष

नोवा नान्तस्यटेर्ल्लोपस्स्वरेयकारेचपरेवाग्रहणात्क्वचिन्न क्वचिदुपधालोपः कविराजः कृष्णसखः देवगवीपरमगवः रा
जधुरम् एकधुरम् सर्व्वधुरम् वाङ्मनसे दक्षिणापथः अहोरात्रः द्वित्राः पञ्चषाः बहुकर्तृकः बहुलक्ष्मीकः स्त्रीपुंसौऋ
क्सामे महोक्षः वृद्धोक्षः द्व्यायुषम् त्र्यायुषम् ग्रामतक्षः फलकसक्थम् मृगसक्थम् पूर्वसक्थम् अर्द्धखारम् अ-
र्द्धनावम् ॥ ॥

ट् वा पंचषाः संख्येयेबहुव्रीहेर्डइतिडः बहुकर्तृकः बहुलक्ष्मीकः ईदूदंतस्त्रीलिंगोत्तरपदाददंतोत्तरपदाच्चबहुव्रीहेः
कइतिकप्रत्ययः स्त्रीपुंसौऋक्सामेअचतुरविचतुरेत्यनेनद्वंद्वेडप्रत्ययः महोक्षः जातोक्षः वृद्धोक्षःअचतुरविचतुरेत्यनेनकर्मधारयेऽप्रत्ययः पुरुषायुषं
अचतुरविचतुरेत्यनेनतत्पुरुषेऽप्रत्ययः द्व्यायुषंत्र्यायुषंअचतुरेत्यनेनाद्विगावप्रत्ययः ग्रामतक्षः ग्रामकौटाभ्यांतक्ष्णष्टइतितत्पुरुषेटः फलकसक्थः मृग-
सक्थः पूर्वसक्थः उत्तरमृगपूर्वोपमानात्सक्थ्नष्टस्तत्पुरुषेइतिटप्रत्ययः फलकमिवसक्थिअस्येतिबहुव्रीहौतुस्वांगवाचिसक्थ्यःष्यंताद्बहुव्रीहेष्टइ ९३
तिटप्रत्ययोबोध्यः अर्द्धखारंखारीशब्दांताद्द्विगोरर्धपूर्वात्खार्यंनांत्तत्पुरुषाच्चवाटइतिटः अर्द्धनावंअर्द्धपूर्वान्नावष्टस्तत्पुरुषेइतिटः ॥ ७ ७

कर्मधारयस्तुल्यार्थे समस्यमानयोर्द्वयोः पदयोर्विशेषणविशेष्यधर्मयोर्यत्र परस्परं तुल्यार्थता तत्रैव समासो भवति नान्यत्र भ्रमरादि साधारणरूपेण प्रतिपन्नो नीलार्थः उत्पलार्थेन नीलोत्पले स्थाप्यते रक्तादिसाधारणरूपेण प्रतिपन्न उत्पलार्थोऽपि नीलार्थेन नीले स्थाप्यते इति भवति द्वयोस्तुल्यार्थता पदयोर्द्वयं पदद्वयं तस्मिन् एकस्मिन्नर्थे निष्ठा वृत्तिर्यस्य भिन्नप्रवृत्तिनिमित्तकस्य पदद्वयस्य तदेकार्थनिष्ठं तस्मिन् सति य एकार्थीभावः स कर्मधारयसंज्ञकः समासो भवति भिन्नार्थानामेकरूपेणैकत्रान्वयविवक्षायां द्वंद्वः भिन्नार्थयोर्विशेषणभावेनैकत्रान्वयविवक्षायां कर्मधारय इत्यर्थः विशेष्यते ऽनेनेति विशेषणं शिपूर्ल्ढविशेषणे करणे ल्युट् भेदनं व्यावर्तकमिति यत्साधारणाकारेण प्रतिपन्नं बहुप्रकारं वस्तु प्रकारांतरेभ्यो व्यवच्छिद्य एकस्मिन् प्रकारे व्यवस्थापयति तद्विशेषणं व्यवस्थाप्यमानं तु विशेष्यं भेद्यं प्रधानमिति अत्र लौकिकविग्रहे भेदद्योतकश्च शब्दो धर्मभेदद्योतनाय प्रयुज्यते धर्मभेदबोधनाय सर्वादिश्च द्रव्यगुणक्रियासन्निधाने द्रव्यवाचकस्यैव प्राधान्यमित्यतो द्रव्यस्य प्राधान्यात् गुणक्रिययोश्चाप्राधान्याद् गुणद्रव्ययोः क्रियाद्रव्ययोश्च समासे गुणक्रिययोरेव पूर्वनिपातो बोध्यः

कर्म्मधारयस्तुल्यार्थे पदद्वये तुल्यार्थे एकार्थनिष्ठे सति कर्म्मधारयस्समासो भवति कर्म्मधारये पूर्वस्सुप्स्वत् नीलमुत्पलम्-नीलोत्पलम् रक्तलता पुंस्को किलः ब्राह्मणभार्या दत्तभार्या सुकेशभार्य्या स्नातानुलिप्तः एकनाथः सर्वयाज्ञिकः जरन्नैयायिकाः पुराणमीमांसकाः ॥ ॥

यत्र तु गुणशब्दयोः क्रियाशब्दयोर्गुणक्रियाशब्दयोर्वा समासस्तत्रानियम एव खंजकुब्जः कुब्जखंजः याचकपाठकः पाठकयाचकः खंजपाचकः पाचकखंजः द्रव्यशब्दयोरुपनिपाते तु ननियमः शिंशपावृक्षः इह वृक्षत्वस्य व्यापकत्वात् प्राधान्यं शिंशपात्वस्य तु विपर्ययादप्राधान्यं इत्येवं सर्वत्र विशेषणस्य पूर्वनिपातो बोध्यः हसादिरिति निर्देशाद्विशेष्यस्यापि पूर्वनिपातश्च कर्मधारये पूर्वे पुंवत् स्त्रीलिंगमुक्तपुंस्कं पूर्वपदं पुंवद्भवति कर्म्मधारये पूरणार्थप्रत्ययांते प्रियादौ चनेत्यप्राप्तः पुंवद्भावो विधीयते महती चासौ नवमी चेति पंचादेरिति मद् पुंवद्भावे कृते सहादेरित्यात्वं महानवमी महाप्रिया तथा ऽकतद्धिताभ्यां कोपधस्य नेति १ संज्ञापूरणार्थप्रत्यययोर्नेति २ वृद्धिहेतोस्तद्धितस्याऽरक्तविकारार्थस्य नेति ३ स्वांगादीपोऽमानिनीति ४ जातिवाचिनः स्त्रीप्रत्ययांतस्य नेति ५ पंचसूत्र्या प्रतिषिद्धः पुंवद्भावोऽप्यत्र विधीयते क्रमेणोदाहरणानि यथा पाचकस्त्री

व्यापकता पकभावा पन्नयोर्मा पकत्वधि प्रोच्यतेन तथान्वान पन्नयोर

दत्त भार्या पंचमभार्यास्तुग्नेभवास्त्रौभीभवार्थेऽण्स्त्रौघ्नीचासौभार्याचस्त्रौघ्नभार्यासुकेशभार्या ब्राह्मणभार्या रक्ताचासौ लताचरक्तलतापुमांश्चासौ कोकिलश्चपुंस्कोकिलः ब्राह्मणीचासौभार्याचब्राह्मणभार्या दत्ताचासौभार्याचदत्तभार्यासुकेशीचासौ भार्याचसुकेशभार्यापूर्वस्नातः पश्चादनुलिप्तः स्नातानुलिप्तः एकश्चासौनाथश्चैकनाथः दिक्संख्येइतिनियमबाधनार्थमुदाहरणंयज्ञमधीयते विदंतिवाते याज्ञिकाः इकप्रत्ययः सर्वेचतेयाज्ञिकाश्चसर्वयाज्ञिकाः जरंतश्चतेनैयायिकाश्चेतिजीर्यतेरतृइतिभूतेर्थे, तृन्यायमधीयते विदंतिवातेनैयायिकाः जरन्नैयायिकाः जीर्णनैयायिकाइत्यर्थः युद्वृद्धिश्च मीमांसामधीयते विदंतिवातेमीमांसकाः केनेयेका इतिकप्रत्यये ह्रस्वत्वंपुराणाश्चतेमीमांसकाश्चपुराणमीमांसकाः पठंतितेपाठकाः तृवुणाविति वुण् नवशब्दः संख्यावाच्यत्र नगृह्यते दिक्संख्येइतिनियमात् नवाश्चतेपाठकाश्चनवपाठकाः व्याकरणमधीयतेविदंतिवावैयाकरणाः अण्युद्

नवपाठकाः केवलवैय्याकरणाः नाम्नश्चकृतासमासः प्रादेरुपसर्गस्य नाम्नश्च कृदन्तेन सह तत्पुरुषस्समासोभवति व्याघ्रः कच्छपः कुम्भकारः शाकपार्थिवादीनाम्मध्यमपदलोपः शाकप्रियः पार्थिवः शाकपार्थिव : देवपूजकोब्राह्मणो देवब्राह्मणः सहादेस्सादिः समासेसति सहादेस्सादिरादेशः सहपुत्रेणस पुत्रः सहाञ्चतीतिसध्र्यङ् समञ्चतीतिसम्यङ्तिरोञ्चतीति तिर्य्यङ् विष्वद्र्यङ् देवद्र्यङ् ॥ ॥

वृद्धिश्च केवलाश्चते वैयाकरणाश्चकेवलवैयाकरणाः इतिकर्मधारयः नाम्नश्चकृतासमासः पुनस्तत्पुरुषमाह स्याद्यंतस्य नाम्नः कृता कृत्प्रत्ययांतेनसहयोऽन्वयः सचपुनः प्रादेः कृतायोऽन्वयः सतत्पुरुषसंज्ञः स्यात् व्याजिघ्रतीतिव्याघ्रः उपसर्गेआदंतादितिकः घ्रशब्देनप्रादेः समासः कच्छेनपिबतीति कच्छपः नाम्निचेतिडः कच्छेनेतिनाम्नः कृदंतेन समासः कुंभं करोतीति कुंभकारः कार्य्येऽण् इत्यण्प्रत्ययः इहकुंभङस्कृकारसुइत्यलौकिकम्प्रक्रियावाक्यं अमितितुनोक्तं कृद्योगेषष्ठीविधानात् उपपदस्यकृतासमासः शाकपार्थिवादीनांमध्यमपदलोपः पृथिव्याईश्वरः पार्थिवः ईश्वरेऽर्थेऽण् शाकःप्रियोयस्य सशाकप्रियइत्यस्यपार्थिवशब्देनसमासेकृते प्रियइतिमध्यमपदस्यलोपः शाकपार्थिवः बहुव्रीहिगर्भकर्मधारयः देवानांपूजकइतिषष्ठीतत्पुरुषः तस्यब्राह्मणशब्देनकर्मधारयेपूजकइतिमध्यपदस्यलोपः देवब्राह्मणस्य सहादेःसादिः अ- ९४

न्नंताः सहादयोऽसहादयश्च प्रयोगानुसारेण बोध्याः बहुव्रीहेरवयवस्य सहस्य सो वा यथा पुत्रेण सह इति सपुत्रः सहपुत्रो वा बहुव्रीहि रयं सहांचतीति स-
हस्य सध्रिरादेशः क्विबंतेंऽचतौ परे सध्र्यङ् संगतमंचतीति संशब्दस्य समिरादेशः क्विबंतेऽचतौ तिर्यङ् विष्वगंचतीति विष्वग्देवयोरदसश्च टेरद्रिरादेशः
क्विबंतेंऽचतौ विष्वद्र्यङ् देवानंचतीति देवद्र्यङ् एते तत्पुरुषा बोध्याः लक्ष्मीर्जायाऽस्येति जायाया जानिरादेशो बहुव्रीहौ लक्ष्मीजानिः कुत्सि
तमन्नमिति कुशब्दस्य कत् स्वरादावुत्तरपदे तत्पुरुषे कदन्नं त्रिवदरथतृणेषु कुशब्दस्य कत् कुत्सितास्त्रयइति कत्त्रयः कद्रथः कद्वदः क त्तृणं ईषदर्थे कुश-
ब्दस्य कदादेशः ईषज्जलं का जलं कुत्सितः पंथा इति ऋक्पूरित्यः प्रत्ययः संख्याव्ययाभ्यामिति क्लीबता कापथं काक्षः अक्षशब्देन तत्पुरुषोऽक्षिशब्देन बहुव्री
हिर्वा समासः उष्णे परे कुशब्दस्य को कव कदादेशा ईषदर्थे कोष्णं कवोष्णं कदुष्णं द्यौश्च भूमिश्चेति देवताद्वंद्वे दिवः शब्दस्य द्यावा भूमी पृथिवी शब्दे दिवः श-

लक्ष्मीर्ज्जाया यस्य स लक्ष्मीजानिः कुत्सितमन्नं कदन्नम् ईषदुष्णम् कोष्णम् कवोष्णम् कदुष्णं द्यौश्च भूमिश्च द्यावाभूमी
जाया च पतिश्च जम्पती दम्पती मातरपितरौ कुपुरुषः कापुरुषः षष उत्वं दतृदशधासूत्तरपदादेष्टुत्वं षट् च दश च षोडश षट् दन्ता य
स्य षोडन् संख्यायाः प्रकारे धा षट् प्रकाराः षोढा षड्धा महान् ईश्वरो महेश्वरः महादेवः खरा नासिका यस्य स खरणसः खरणाः
खुरणसः खुरणाः उन्नता नासिका यस्य स उन्नसः प्रणसः ॥ ॥ ब्दस्य द्यावा दिवश्च द्यावापृथिव्यौ दिवस्पृथिव्यौ जाया च पति
श्चेति जायाया जंदं वा द्वंद्वे जंपती दंपती इति चांद्राः दाराः पुंसि बहुत्वे च दं कलत्रं नपुंसकमित्यमरमाला पत्न्यां जंदमलिंगत्वे इति नाम प्रपंचः माता च पिता
चेति मातुररङ् द्वंद्वे मातरपितरौ पुरुषे कुशब्दस्य वा चकः कुपुरुषः कापुरुषः षष उत्वं दतृदशधासूत्तरपदादेष्टुत्वं षट् च दश चेति दतृदशधा परस्य षष उत्वं
परस्य ष्टुत्वं च धा प्रत्यये वा षोडश षोढा षड्धा षट् प्रकारा अस्येति प्रकारे धेति धा प्रत्ययः षट् दंता अस्येति संख्यासुपूर्वस्य दन्तस्य दतृ वयोर्थे व्रितोनुमिति
नुम् षोडन् सुदन् स्त्रियां ङीपिति इति ङीप् सुदती महांश्चासौ ईश्वरश्चेति महत आकारोंतादेशः समानाधिकरणे उत्तरपदे जातीये च महेश्वरः महादेवः समानाधि
करणे किं महतः सेवा महत्सेवा महान् प्रकारो महाजातीयः खरा नासिका यस्येति खुरवन्नासिका यस्येति न नासिकाया नस् बहुव्रीहाव प्रत्यये खुरखराभ्यां

नासिकायानस् अप्रत्ययश्चवा खरणसः अप्रत्ययः पुंवद्वेतिपुंवत् अत्वसोःसावितिदीर्घेखरणाः खुरणसः अप्रत्ययः खुरणाः उन्नतानासिकाऽस्ये
तिउन्नसः अप्रत्ययः प्रगतानासिकाऽस्येतिप्रणसः अप्रत्ययःवेर्नासिकायाःग्रख्यौ विगतानासिकाऽस्येतिविग्रः विख्यः वेःखुरखग्राइति शाकटायनसू
त्राद्विखुर्विख्यो विग्रइतिरूपत्रयंचखरणाःस्यात् खरणसोविग्रोविखुर्विनासिकइतिरभसः चतस्रोऽश्रयोऽस्येतितालव्यस्थानेदं सोऽनिपात्यतेच-
तुरस्रः अप्रत्ययःप्रोष्ठोगौस्तस्येवपादावस्येतिपादस्यपद्निपात्यतेअप्रत्ययः प्रोष्ठपदः प्रसम्भ्यांजानुशब्दस्यज्ञुरुच्चवा बहुव्रीहौ प्रगते जानुनी यस्य
सप्रज्ञुः संज्ञुः ऊर्ध्वाद्वाज्ञु ऊर्ध्वज्ञुः ऊर्ध्वजानुः बहुव्रीहौधनुषोनङ् धनुरंतस्यबहुव्रीहेरनङ् संज्ञायांचवा शृंगस्यविकारः शार्ङ्गं अण् शार्ङ्गं धनुरस्ये
तिशार्ङ्गधन्वासंज्ञायां तुशतधन्वाशतधनुः उत्पूतिसुसुरभिभ्यःगुणवाचिनोगंधस्येकारांतादेशो बहुव्रीहौउद्गंधिः पूतिगंधिः सुगंधिः सुरभिगंधिः

विगतानासिकायस्यसविग्रहः विख्यः चतस्रोऽश्रयोयस्यसचतुरस्रः प्रोष्ठोगौस्तस्येव पादायस्यस प्रोष्ठपदः प्रगते जानु
नीअस्यप्रज्ञुः संज्ञुः ऊर्ध्वाद्वाज्ञुः ऊर्ध्वज्ञुः ऊर्ध्वजानुः बहुव्रीहौधनुषो नङ् अधिज्यधन्वाशार्ङ्गंधनुरस्यशार्ङ्गधन्वाउद्गन्धिः
सुगंधिः पूतिगंधिः सुरभिगंधिः द्विदन् चतुर्दन् अमुमञ्चतीति अमुमुयङ् अद मुयङ् अदन्द्यङ् कौमुदगंध्यायाः पुत्रः कौमुदगं
धीपुत्रः कौमुदगंधीपतिः समानंज्योतिरस्यसज्योतिः सनाभिः ॥ ॥

गुणवाचिनइति किं शोभनागंधाद्रव्याण्यस्यसुगंधआपणि
कः अल्पवाचिनोगंधस्येत्वंबहुव्रीहौसूपस्यगंधोलेशोयस्मिन् तत् सूपगंधिभोजनं घृतगंधिउपमानाद्गंधस्येकारांतादेशः पद्मस्येवगंधोऽस्यपद्मगं
धिः गंधस्तुसौरभेनृत्येगंधकेगर्वलेशयोः सएवद्रव्यवचनोबहुत्वेपुंसिचस्मृतइति द्वौदंतावस्येतिसंख्यासुपूर्वस्येतिदत् द्विदन् चतुर्दन् अमुमंचती-
ति अदस् अच् इति स्थिते विष्वग्गितिटेरद्रिः अदद्रि अच् इत्यत्रयत्वम् अदसोसेर्दादु दोमइत्यनेनदाभ्यां परयोरकाराकारयोरुकारोद्र कारयोश्च मकारौ
अमुमुयङ् अन्त्यबाधेऽत्यसदेश स्यादेशइतिवदतांमतेपरदकाररकारस्यैवमुत्वं अदमुयङ् त्यदाद्यत्वे एवमुत्वं नान्यत्रेतिपक्षेअद्द्र्यङ् कुमुदस्येवगं
धोयस्येति उपमानाद्गंधस्येतीकारादेशइति कुमुदगंधिः कुमुदगंधेरपत्यं स्त्रीकौमुदगंध्याअपत्येण्यः कौमुदगंध्यायाः पुत्रइतिकौमुदगंध्यायाः पति १५

रिति याइत्यस्यस्थाने ईत्वं निपात्यते कौमुदगंधीपुत्रः कौमुदगंधीपतिः समानंज्योतिरस्येति ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयो
वचनबंधुतीर्थ्येब्रह्मचारिषुसमानस्यसः सज्योतिः सनाभिः सनामासवयाः ब्रह्मवेदः तदध्ययनार्थंव्रतमपिब्रह्मब्रह्मचरतीतिब्रह्मचारीव्रते इति
णिनिः समानः ब्रह्मचारीतिसब्रह्मचारी समाने तीर्थेवसतीतिसतीर्थ्यः वसत्यर्थेण्यप्रत्ययः उत्तरपदादकस्योदः क्षीरोदः सुरोदः लवणोदः शुद्धोदः पृ
षतः उदरमिति तलोपः पृषोदरं वारिणो वाहक इति पूर्वपदस्यव ः उत्तरपदादेश्चलत्वं बलाहकः गूढोत्मा अत्राकारस्यस्थाने उत्वंभवेद्गूणागमाद्धंसः
सिंहोवर्णविपर्ययात् गूढोत्मावर्णविकृतेर्वर्णनाशात्पृषोदरं १ हंतेः पचादित्वादऽप्रत्ययेसगागमात् हंस इति हिंसेः पचादित्वादप्रत्ययेहकारसकार
योर्व्यत्ययात् सिंहइति दिक्शब्देभ्यस्तीरस्यतारोवासर्व्वादेः समासादावितिपुंवत्दक्षिणतारं दक्षिणतीरमित्यादि अलुक् क्वचित् समासप्रत्यय

सनामासवयाः स ब्रह्मचारीसतीर्थ्यः क्षीरोदः सुरोदः लवणोदः शुद्धोदः पृषोदरः वारिवाहकोबलाहकः गूढोत्मादक्षिणती
रम् दक्षिणतारम् इत्यादि अलुक् क्वचित् क्वचित्समासे तद्धितेचविभक्तेरलुक् कृच्छ्रान्मुक्तः स्तोकान्मुक्तः दूरान्मुक्तः निकटा
न्मुक्तः अप्सुयोनिः सरसिजम् उरसिलोमाहृदिस्पृक् कण्ठेकालः वाचोयुक्तिः दिशोदण्डः पश्यतोहरः खेशयः ग्रामेवासः ग्रा
मेवासी चौरस्यकुलम् ओजसाकृतम् सहसाकृतम् ॥ ॥ योरित्यस्यापवादः कृच्छ्रस्तोक दूरार्थनिकटार्थेभ्यः पंचम्या अलुक् उत्तरपदे

कृच्छ्रान्मुक्तः स्यात्कष्टं कृच्छ्रमाभीलमित्यमरः उत्तरपदेकिं निष्क्रांतः स्तोकादिति निःस्तोकः द्विवचनबहुवचनांतानां तुसमासो नेष्यते ऽनभिधानात् ते
न स्तोकाभ्यांमुक्त इत्यादौ वाक्यमेव अप्सुयोनिरुसन्तिर्यस्येति अपः सप्तम्या अलुक् योनिप्रचरमतिषु अप्सुयोनिः अप्सुजः अप्सुचरः अप्सुमतिः
हसांतादद्ंताच्च सप्तम्या अलुक् संज्ञायां सरसिजं अदंतात्तु अरण्येतिलकइत्यादिस्वांगात् सप्तम्या अलुक् अकामेपरे मूर्द्धमस्तकाभ्यां तुनउरसिलो
मा अकामेतिकिं मुखे कामोऽस्यमुखकामः मूर्द्धमस्तकाभ्यांनेति किम् मूर्द्धशिखः मस्तकशिखः हृदयंस्पृशतीति दिव्हृद्भ्यांसप्तम्या अलुक् हृदि
स्पृक् कर्मणोऽधिकरणत्वविवक्षायांसप्तमी एवंदिविस्पृक् कण्ठेकालः स्वांगात्सप्तम्या अलुगित्यलुक् वाच्दिक्पश्यद्भ्यः षष्ठ्या अलुग्युक्तिद-

ण्ड हरेषु वाचोयुक्तिः दिशोदण्डः पश्यतो हरः पश्यंतमनादृत्य हरतीत्यर्थः अनादराधिक्येइति षष्ठी अकारकात्सप्तम्या अलुग्वाशयवासवासि-
षु रवेशयः खशयः ग्रामेवासः ग्रामवासः ग्रामेवासी ग्रामवासी षष्ठ्या अलुगाक्रोशेऽर्थे चोरस्यकुलं आक्रोशे किम् ब्राह्मण कुलम् ओजसंभस्सह
स्तमसं जोऽभ्यस्तृतीयाया अलुक् ओजसाकृतं अंभसाकृतं तमसाकृतं अंजसाकृत आर्जवेन कृतमित्यर्थः पुंसोऽनुजेजनुषाधेच तृतीयाया अलु
क् यस्याऽग्रजः पुमान् स पुंसानुजः जनुषांधः जात्यंधइत्यर्थः जनुर्जननजन्मानीत्यमरः आत्मनस्तृतीयाया अलुक् पूरणार्थप्रत्ययांतेपरे आत्मनापंच-
मः पूरणार्थेकिं आत्मकृतं त्वचिसारः हसांतादद् तांच्च सप्तम्या अलुक् संज्ञायामित्यलुक् गोः सप्तम्या अलुक् स्थिरे गविष्ठिरः युधिष्ठिरः हसांतादिति
सप्तम्या अलुक् परशब्दादात्मशब्दाच्च तुर्थ्या अलुक् वैयाकरणाख्यायां परस्मैपदं परस्मैभाषा आत्मनेपदं आत्मनेभाषा तादर्थ्येचतुर्थ्या अलुगत्रमध्यां

अम्भसाकृतम् पुंसानुजः जनुषान्धः आत्मनापञ्चमः त्वचिसारः गविष्ठिरः युधिष्ठिरः आत्मनेपदम् आत्मनेभाषा मध्येगु-
रुः स्तम्बेरमः कर्णेजपः पूर्वाह्णेतरे पूर्वाह्णेतमे आमुष्यायणः आमुष्यकुलिका आमुष्यपुत्रिका मातृपितृभ्यांस्वसुस्सस्यषः
मातृष्वसा पितृष्वसा मातृपितृभ्यांवा मातुस्स्वसा मातुःष्वसा पितुस्स्वसा पितुःष्वसा होतुरन्तेवासी होतुःपुत्रः पितुरन्तेवासी पि-
तुः पुत्रः ॥ ॥

ताभ्यां सप्तम्या अलुग्गुरौपरेमध्येगुरुः अन्तेगुरुः तत्पुरुषे सप्तम्या अलुक् कृत् प्रत्ययांते बहुलं स्तंबेरमः स्तंबे तीरे रम
ते इति स्तंबेरमो हस्ती कर्णेजपः कर्णेजपस्सूचकः कालवाचकात्सप्तम्या अलुग्वा तरतमकालतनेषु पूर्वाण्हेतरे पूर्वाण्हतरे पूर्वाण्हेतमे पूर्वाण्हेका
ले पूर्वाण्हकाले पूर्वाण्हेतने पूर्वाण्हतने अदसः षष्ठ्या अलुगायनपुत्रिकाकुलिकासु अमुष्यापत्यं नडादित्वादायनण् आमुष्यायणः अमुष्यपुत्रस्य
भावः आमुष्यपुत्रिका अमुष्यकुलस्य भावः आमुष्यकुलिका भावार्थेकः ऋदन्तात्षष्ठ्या अलुग्वास्वसृपत्योः मातृपितृभ्यांस्वसुः सस्यषः स्यात्स
मासे मातृष्वसा पितृष्वसा मातृपितृभ्यांवा आभ्यांस्वसुः सस्यषोवास्यात् समासे मातुःष्वसा मातुःस्वसा पितुःष्वसा पितुःस्वसा विद्यासंबंधयोनिसंबं
धवाचिनऋदन्तात्षष्ठ्या अलुक् होतुरंतेवासी होतुःपुत्रः पितुरन्तेवासी पितुःपुत्रः ॥ ॥ छ छ छ

देवानांप्रियइति मूर्खेः येषष्ठ्या अलुक् अन्यत्रदेवप्रियः दिवोदासेपरे षष्ठ्या अलुक् दिवोदासः शुनः षष्ठ्याअलुक् शेफः पुच्छलांगूलेपुशेफः सकारांतः स्याल्लिंगंचिन्हशेफसोरित्यमरोक्तेः शिडः औणादिकेः प्रत्ययेपकारांनोपिशुनइवशेपमस्य शुनःशेफः शुनइवपुच्छमस्यसशुनःपुच्छः शुनइवलांगूलमस्यसशुनोलांगूलः बहुव्रीहयस्त्रयोप्यमीऋषिविशेषाणां संज्ञा इत्यलुक्समासः तरतमरूपकल्पचेलड्ब्रुवगोत्रमतहतेषुईवंतस्यानेकस्वरस्यह्रस्वोभाषितपुंस्कश्च अतिशयेनब्राह्मणीतिब्राह्मणितराब्राह्मणितमातरतमचरडितिपुंवद्भावोनजातिवाचिनः स्त्रीप्रत्ययांतस्येतिनिषेधात् तरतमेयस्त्विष्ठाः प्रकर्षेइति तरतमौप्रशस्ताब्राह्मणीतिब्राह्मणिरूपाप्रशंसायामितिरूपः ईषन्न्यूनाब्राह्मणीतिब्राह्मणिकल्पाईषद समाप्तौकल्पेतिकल्पप्रत्ययः चेलडादीनिवृत्तिविषये समासादौकुत्सनवाचीनिसन्तिकुत्सिताब्राह्मणी ङ्विंतइतीप्ब्राह्मणिचेलीउक्तपुंस्कस्येतिकिं आमलकीतरा कुवलीतरा आमलकीकुवलीशब्दौवृक्षेनित्यस्त्री-

देवानांप्रियइतिच मूर्खेदिवोदासः शुनश्शेफः शुनःपुच्छः इत्यादि तरतमरूप कल्पचेलड्ब्रुवगोत्रमतहतेषुईवन्तस्यानेकस्वरस्यह्रस्वोभाषितपुंस्कस्य ब्राह्मणितराब्राह्मणितमा ब्राह्मणिरूपा ब्राह्मणिकल्पा ब्राह्मणिचेली अनीबन्तस्य स्त्रीप्रत्ययान्तस्यैवन्तस्यैकस्वरस्यवाह्रस्वस्तरादौ ब्रह्मबन्धूतरा ब्रह्मबंधुतरा स्त्रीतरा स्त्रितरा ङ्वितः परस्यवा विदुषितरा विद्वत्तरा भवतितरा भवत्तरा पचतितरा पचत्तरा इष्टकेषीकामालानांचिततूलभारिषुह्रस्वः इष्टकचितम् पक्वेष्टकचितम् इषीकतूलम् मुञ्जेषीकतूलम् मालभारी उत्पलमालभारी ॥ ॥

लिंगौ अनीवंतस्यस्त्रीप्रत्ययांतस्य ईवंतस्यैकस्वरस्यवाह्रस्वस्तरादौ अनीवंतस्य स्त्रीप्रत्ययांतस्य वाह्रस्वः एकस्वरस्य ईवंतस्यचवाह्रस्वोभवतितरतमरूपकल्पचेलड्ब्रुवगोत्रमतहतेषुपरेषुउतऊरित्यूप्रत्ययः अतिशयेन ब्रह्मबंधूरितितरतमेयस्त्विष्ठाइतितरप्रत्ययः ब्रह्मबंधूतरा ङ्वितः परस्यवाउश्चआचतयोः समाहारः वृवृइत् यस्यसङ्वित् तस्मात् ङ्वृतः उकारेत ऋकारेतश्चपरस्य ईप्रत्ययस्य ह्रस्वोवाभवतितरादौ विदुषितरा ङ्वितइतीप् वसोर्वडरित्युक्तं ह्रस्वाभावेतरतमचरडितिपुंवद्भावः विद्वत्तरा विदुषीतरेत्यपिकैश्चिदुदाहृतं तन्निर्मूलम् इष्टकेषीकामालानांचिततूलभारिषुह्रस्वः इष्टकादीनांतदंतानांचह्रस्वोभवतिचितादिषु इष्टकाभिश्चितमितीष्टकचितं तदंते पक्वेष्टकचितं इषीकानां तूलमिषीकतूलं मालांबिभर्तिइतिमालभारीकर्तरिणिनिः हारिष्विति पाठांतरम् ॥ ॥

कारेसत्यागदस्यमुम् सत्यागदयोर्मुम् स्यात् कारे सत्यंकारः शपथकरणमित्यर्थः अगदंकारो वैद्यः अस्तोश्च अस्तु इत्यस्य मुम् स्यात् कारे अस्तु इत्या रव्यातप्रतिरूपकमव्ययम् अस्तुंकारः अभ्युपगम इत्यर्थः धेनोर्भव्यायां धेनुशब्दस्य मुम् स्याद् भव्यायां परस्यां धेनुश्चासौ भव्या चेति विग्रहः धेनुंभव्या भविष्यतीधेनुरित्यर्थः निपातनाद्भविष्यति कर्तरि कृत्प्रत्ययः लोकस्य पृणे लोकस्य मुम् स्यात् पृणे परे पृणधातुः प्रीणनार्थः लोकंपृणः सूर्यः इत्येऽनभ्याशस्य अनभ्याशस्य मुम् स्यात् इत्ये परे अभ्याशं समीपं अभ्याशं भिन्नमनभ्याशं एतिस्तु शासि ति इणः क्यप् अनभ्याशमित्यः दूरतः परिहर्तव्य इत्यर्थः भ्राष्ट्राग्न्योरिंधे अनयोर्मुम् स्यादिधे परे इंधी दीप्तौ कार्य्येऽणित्यण् भ्राष्ट्रमिंधः अग्निमिंधः नाम्न्यचकृतेति समासः गिले गिलस्य अगिलस्य गिलभिन्नस्य मुम् भवति गिले परे ति-

कारे सत्यागदस्य मुम् सत्यङ्कारः अगदंकारः अस्तोश्च अस्तुंकारः धेनोर्भव्यायाम् धेनुम्भव्या लोकस्य पृणे लोकंपृणः इत्येऽनभ्याशस्य मुम् अनभ्यासमित्यः भ्राष्ट्राग्न्योरिन्धे भ्राष्ट्रमिन्धः अग्निमिन्धः गिलेऽगिलस्य मुम् तिमिङ्गिलः गिलगिले च तिमिगिलगिलः उष्णभद्रयोः करणे उष्णंकरणम् भद्रंकरणम् रात्रेः कृति वा रात्रिञ्चरः रात्रिचरः रात्रिमटः रात्र्यटः नहिवृतिवृषिव्यधिरुचिसहितनिषु क्विबन्तेषु पूर्वस्य दीर्घः उपानत् नीवृत् प्रावृट् मर्म्मावित् नीरुक् अभीरुक् ऋतीषट् परीतत् मत्वर्थे बहुस्वरस्य अमरावती शरादेश्च शरावती अजिरादेर्न अजिरवती उपसर्ग्गस्य घञ्यमनुष्ये वा दीर्घः परिपाकः परीपाकः परिहासः परीहासः अमनुष्ये किम् निषादः ॥ ॥

मिंगलो मत्स्यः विशेषः गिरतेर्मूलविभुजादित्वात्क प्रत्ययः गिरते रेफस्य वालत्वमिति लत्वं गिल गिले च अगिलस्य मुम् भवति गिल गिले परे गिलगिलः तिमीनां गिल गिल इति तिमिंगिलगिलः उष्णभद्रयोः करणे उष्णभद्रयोर्मुम् स्यात् करणे परे रात्रेः कृति वा रात्रेर्मुम् वा स्यात् कृत्प्रत्ययान्ते परे आरविदर्थमिदं सूत्रं खिति प्रत्यये खितिपदस्येति नित्यमेव मुम् स्यात् अचादिविति टप्रत्ययः रात्रिंचरः नहिवृतिवृषिव्यधिरुचिसहितनिषु क्विबंतेषु पूर्वस्य दीर्घः क्विबंतेषु एषु परेषु पूर्वस्योपसर्गकारकस्य दीर्घः स्यात् णह बंधने वृतु वर्तने वृषु से चने व्यध ताडने रुच दीप्तौ षह मर्षणे तनु विस्तारे उपसमीपेन नह्यते इति उपानत् कर्मणि क्विप् निवृत्ते इति नीवृत् नीवृज्जनपदो देश इत्यमरः प्रवर्षतीति प्रा

वृद् मर्माण्यपि विध्यतीति मर्माविद् श्वानं विध्यतीति नाम्नो नो लोप शिति न लोपः श्वाविद् सहे ग्रहां किति चेति संप्रसारणं निरोचते इति नीरुक् ऋतिसह
त इति रितीषद् रिति र्जुगुप्सा कल्याणगानिस्वर्द्धास्वयोः ऋतु रिरिति हैमः परितनोतीति परीतत् क्विबंते घिनि किं परिणहनं उपसर्गकारकस्येति किंपदुरुक्
तिग्मरुक् मत्वर्थे बहुस्वरस्य बहुस्वरस्य दीर्घः स्यात् संज्ञाया मस्त्यर्थे परे अमराः संत्यस्या ममरावतीमांतोपधाद्व त्विनो इति वत् ङ्वि तद्दीप् संज्ञायामिति
किं वलवती बहुस्वरस्येति किं व्रीहिमती शरादेश्च शरादे र्दीर्घः स्यात् अस्त्यर्थे शराः संत्यस्यामिति शरावती अजिरादेर्न अजिरादेर्दीर्घो न भवति अस्त्यर्थे अ-
जिरमस्त्यस्यां सा अजिरावती अंगणं चत्व राजिरे इत्यमरः उपसर्गस्य घञ्यऽमनुष्ये वा दीर्घः उपसर्गस्य वा दीर्घः स्यात् घञंते परे न तु मनुष्ये श्रे अमनुष्ये किं नि

आदेश्च द्वन्द्वे द्वन्द्वे सित् क्वचिदादेर्लोपः माता च पिता च पितरौ श्वश्रूश्च श्वशुरश्च श्वशुरौ दुहिता च पुत्रश्च पुत्रौ स्वसा च भ्राता च भ्रात
रौ ऋतां द्वन्द्वे पूर्वस्यात्वम् मातापितरौ होतापोतारौ नेष्टोद्गातारौ पुत्रे च पितापुत्रौ गावश्च गावश्च गाव इमाः शुक्लश्च शुक्ला च शुक्लं च शु
क्लम् सच यश्च तौ यो वा दिक्संख्ये संज्ञायाम् दिग्वाचिनस्संख्यावाचिनश्शब्दास्समानाधिकरणेन सञ्ज्ञायामेव समस्य-
न्ते स कर्म्मधारयस्समासः दक्षिणाग्निः सप्तर्षयः सञ्ज्ञायां किम् पञ्च फलानि दिक्संख्ये किम् शूर्प्पणखा ॥ ॥

तस्मिन्नघ मित्यधिकरणे घञ् निषादः पुलिंदो मनुष्यजातिः आदेश्च द्वन्द्वे द्वन्द्व विषये भिन्नार्थानां तुल्यार्थानां च नाम्नामेत्योऽ वशिष्यते आदीनां च लो
पो भवतीत्यर्थः रामश्च रामश्च रामौ घटश्च कुंभश्च कुंभौ घटश्च कुंभश्च कलशश्च कलशाः मातृश्वश्रूभ्यां सहोक्तौ पितृश्वशुरौ वा शिष्येते माता च पिता चेति पि
तरौ माता पितरौ वा पितुर्दशगुणा माता गौरवेणातिरिच्यते इति स्मृतेर्मातुः प्रधानत्वात् पूर्वनिपातः ऋतां द्वंद्वे इति पूर्वस्यात्वं श्वशुरौ श्वश्रूश्वशुरौ वा स्वसृदु
हितृभ्यां सहोक्तौ भ्रातृपुत्रौ शिष्येते दुहिता च पुत्रश्च पुत्रौ स्वसा च भ्राता च भ्रातरौ ऋतां द्वंद्वे पूर्वपदस्यात्वं विद्यायोनिसंबंधवाचिनां ऋदंतानां यो द्वंद्वस्तत्र
पूर्वपदस्यात्वं भवति षष्ठीनिर्दिष्टत्वादंत्यस्यादेशः द्वयोर्द्वंद्वे एवात्वं माता च पिता चेति एकशेषाभावे मातापितरौ पुत्रो सादनेऽनयोर्योनिकृतः संबंधो त्र होता च

पोताचेति होतापोतारौ नेष्टाचोद्गाताचनेष्टोद्गातारौ इह होतादिरूपविद्याकृतः संबंध एकस्मिन् यज्ञ आर्त्विज्यरूपो बोध्यः पुत्रेचविद्यायोनिसंबंधवाचि
नां ऋदंतानामात्वं भवति पुत्रे परे पिताच पुत्रश्च पितापुत्रौ अनयोर्योनिकृतः संबंधो जन्यजनकभावलक्षणो ऽत्र ग्राम्यपशुसमूहेष तरुणेष्वनेकखुरेषु सहो-
क्तौ स्त्रीलिंगो ऽवशिष्यते गावश्च गावश्चेति गावः उभयत्र रूपस्य समानत्वात् स्त्रीलिंगे शेषस्य फलमाह इमा इति ग्रामेभ्य वाः ग्राम्याः यण् ग्रामेति किं रुरु
व इमे मृगविशेषा वनचारिण इत्यर्थः पशुग्रहणं किं ब्राह्मण्यश्च ब्राह्मणाश्च ब्राह्मणाः समूहेषु किं एतौ गावौ अतरुणेषु किं वत्सा इमे अनेकखरेषु किं अश्वा
इमे अश्वानामेक एव खुर इत्यर्थः अक्लीबेन सहोक्तौ क्लीब शिष्यते तच्च था एकवत् तल्लक्षण एव विशेषश्चेत् शुक्लः पटः शुक्ला पटी शुक्लं वस्त्रं तदिदं शुक्लं तानीमा
नि शुक्लानि त्यदादीनां मिथः सहोक्तौ परं पूर्वं च शिष्यते स च यश्च यौ तौ वा स्त्रिया सहोक्तौ पुमान् शिष्यते तल्लक्षण एव विशेषश्चेत् हंसी च हंसश्च हंसौ इह सर्व
त्र एकशेषे कृते ऽनेकाभावात् द्वंद्वसमासो न तेन शिरसी शिरांसि इत्यादौ प्राप्यं गत्वादेकवत्त्वा वा न पंथानौ पथान इत्यादौ समासांतप्रत्ययो न भवति इत्येकशेषः॥ पु

द्वन्द्वतत्पुरुषयोः परपदस्यैवलिङ्गम् कुक्कुटमयूर्य्याविमे मयूरीकुक्कुटाविमौ अर्द्धपिप्पली द्विगुप्राप्तापन्नालम्पूर्वप्रादिस-
मासेन पञ्चकपालः प्राप्तो जीविकां प्राप्तजीविकः आपन्नजीविकः अलंकुमार्य्यै अलंकुमारिः निष्कौशाम्बिः॥ ॥ ॥

नः कर्मधारयमाह दिक्संख्ये संज्ञायां दिक् च संख्या च दिक्संख्ये दिग्वाचिनः संख्यावाचिनश्च शब्दास्तुल्यार्थेन सह समस्यंते स कर्मधारयः कर्मधारय
स्तुल्यार्थे इत्यनेनैव सिद्धे नियमार्थमिदं संज्ञायामेवेति दक्षिणश्चासौ अग्निश्चेति दक्षिणाग्निः सप्त च ते ऋषयश्च सप्तर्षयः दक्षिणाग्निर्गार्हपत्याहवनीयौ
त्रयो ऽग्नय इत्यमरः द्वन्द्वतत्पुरुषयोः परपदस्यैव लिंगम् इतरेतरयोगद्वंद्वो ऽत्र गृह्यते न समाहारद्वंद्वः एकत्वे द्विगुद्वंद्वावित्युक्तत्वात् द्वंद्वतत्पुरुषयोरिति संबंधेष-
ष्ठी एतयोः परपदतुल्यं लिंगम् भवति कुक्कुटश्च मयूरी च कुक्कुटमयूर्यौ इमे इति स्त्रीलिंगनिर्देशः मयूरी च कुक्कुटश्च मयूरीकुक्कुटौ इमाविति पुल्लिंगनिर्देशः
पिप्पल्या अर्द्धमित्यर्थपिप्पली इयमिति स्त्रीलिंगनिर्देशः द्विगुप्राप्तापन्नालंपूर्वप्रादिसमासेन द्विगुसमासे प्राप्ता ऽपन्नालं पूर्वसमासे प्रादिसमासे च परप
दतुल्यं लिंगं न भवति पंचसु कपालेषु संस्कृतः तद्धितार्थे द्विगुः संस्कृतार्थे ऽण् तस्य लुक् च तद्धितार्थे द्विगुर्विशेष्यनिघ्नः पुरोडाश इत्यते इति दाश्टदाने कर्म १८

णि घञ् निपातनाद्ध्रस्य डः पुरोडाश ः प्राप्तजीविकः आपन्नजीविकः अलंकुमारिः तत्पुरुषाएते अन्यार्थेइतिन्हस्वः प्रादिसमासोयथाप्रादयोगताद्यर्थे प्रथमया प्रगतआचार्य्यः प्राचार्य्यः दुराचारः पुरुषोदुः पुरुषः प्रगतः पितामहः प्रपितामह इत्यादि अत्यादयः क्रांताद्यर्थे द्वितीयया अतिक्रांतोमालांअतिमालः अन्यार्थेइतिन्हस्वः अभिगतोमुखं अभिमुखः उद्गतोवेलांउद्वेलः प्रतिगतोऽक्षंप्रत्यक्षइत्यादि अवादयः क्रुष्टाद्यर्थे तृतीयया अवक्रुष्टः कोकिलयाअवकोकिलः अन्यार्थेइतिन्हस्वः परिणद्धोवीरुधापरिवीरुत् पर्य्यादयोग्लानाद्यर्थेचतुर्थ्यापरिग्लानोऽध्ययनायपर्यध्ययनः गुरुकुलवासादिनापरिग्लानोऽध्ययनायेत्यर्थः निरादयः क्रान्ताद्यर्थेपंचम्यानिष्क्रांतः कौशांब्याः निष्कौशाम्बिः अन्यार्थेइतिन्हस्व उत्क्रांता कुलात् उत्कुला निर्गतमंगुलिभ्योनिरंगुलंअस्वपदविग्रहेणनित्यसमासाएतेइतिप्रादिसमासाः ६९ अश्ववडवयोर्द्वंद्वः पूर्ववल्लिंगः सूत्रेद्विवचनमविवक्षितंबहुत्वेपिपुल्लिंगस्यदर्शनात्

अश्ववडवयोर्द्वन्द्वः पूर्ववल्लिङ्गः अश्ववडवान् रात्रान्हाहांन्ताः पुंस्येव अहोरात्रः पूर्वरात्रः पूर्वाह्णः द्व्यन्हः पूर्वाह्णः संख्यापूर्वरात्रंक्लीवम् द्विरात्रम् त्रिरात्रम् अपथन्तत्पुरुषेक्लीवम् अपथम् अर्द्धर्चादयः क्लीबपुंसोः अर्द्धर्चम् अर्द्धर्चः ध्वजम् ध्वजः तीर्थम् तीर्थः एवंशरीरमण्डपयूपदेहदेशअंकुशकलशाइति ॥ ॥

अश्वश्ववडवान अश्ववडवौनिपातनादापोनिवृत्तिः बहुले पुल्लिंगंदर्शयति अश्ववडवान् अश्ववडवैः विभाषावृक्षेतिपक्षेसमाहारद्वंद्वेऽश्ववडवंक्रियाव्ययविशेषणानांक्लीबत्वमेकवचनंच क्रियाविशेषणानाम-व्ययविशेषणानांचैकवचनंक्लीबत्वंचभवतिरात्रान्हाहांताः पुंस्येवपरवल्लिंगताऽपवादोप्ययंपरत्वात्समाहारनपुंसकतांबाधतेअप्रत्ययांतोरात्रिशब्दष्टप्रत्ययांतोहन्शब्दः एतदंताद्वंद्वद्विगुतत्पुरुषकर्मधारयाः पुल्लिंगेएवभवंतिअहश्चरात्रिश्चअन्हइतिनस्यसः अहोरात्रः अहः पूर्वाद्रात्रिशब्दादः समाहारेइत्यः प्रत्ययः रात्रेःपूर्वभागः पूर्वरात्रः सर्वैकदेशेत्यऽप्रत्ययः अन्हः पूर्वइतिपूर्वाह्णः राजाहः सखिभ्यइतिटप्रत्ययः नोवेत्युपधालोपः द्वयोरन्होस्समाहारइतिटः नोवेतिटिलोपःद्व्यहः संख्यापूर्वरात्रंक्लीबंद्वयोरात्र्योः समाहारः तिसृणांरात्रीणांसमाहारइतिसर्वैकदेशेत्यप्रत्ययः द्विरात्रंत्रिरात्रंअपथंतत्पुरुषेक्लीबंनञ्पूर्वः कृतसमासांतः पथशब्दः क्लीबेस्यात् नपंथाइत्यपथंऋक्पूरब्धूः पथामित्यप्रत्ययः तत्पुरुषेइतिकिम् अपथोदेशः कृतसमासांतनिर्देशात् नेहअपंथाः अत्रनञ्पूर्वात्सखिशब्दाह्वासमासांतस्तत्पुरुषेइतिविकल्पः प्रसंगादाहअर्द्धर्चादयः क्लीबपुंसोः अर्द्धर्चादयः शब्दाः पुंसिक्लीबेच स्युः ॥ ॥

आबंतोत्तरपदाद्विगोर्वेप् आबंतोत्तरपदो द्विगुर्वास्त्रियांपंचानांखट्वानांसमाहारः नपुंसकस्येतिन्हस्वे कृतेइदंप्रवर्ततेपंचखट्वं स्त्रियांतुसमाहारेङ्तइती
पपंचखट्वीअनोनलोपोद्विगोर्वेप् अनोनलोपोद्विगुर्वास्त्रियांइहवाशब्दः स्त्रियामित्यनेनसंबध्यतेनतुनलोपइत्यनेनअन्नंतस्यद्विगोर्न्नित्संनलोपोभवतिअन्नंतोद्वि
गुः स्त्रियांचवापंचानांतक्ष्णांसमाहारःपंचतक्षंस्त्रियांतुसमाहारेङतइतिईप्पंचतक्षीपुण्यसुदिनाभ्यामन्हः क्लीबताआभ्यांपरस्याहन्शब्दस्यक्लीबत्वंस्यात्पु
ण्यंचतदहश्चेतिराजाहःसखिभ्यइतिटःनोवेतिटिलोपःपुण्याहंसुदिनंचतदहश्चेतिसुदिनशब्दःप्रशस्तपर्यायःसुदिनाहंरात्राह्नाहांताःपुंस्येवेत्यस्यापवादो
यंसंख्याव्ययाभ्यांपरस्यपथस्यक्लीबताआभ्यांपरःकृतसमासांतःपथशब्दःक्लीबमित्यर्थः त्रयाणांपंथाइतिऋक्पूरब्धूरित्यप्रत्ययः त्रिपथंविरूपःपंथाइ

आबन्तोत्तरपदाद्द्विगोर्वेप् पञ्चखट्वी पञ्चखट्वम् अनोनलोपोद्विगोर्वेप् पञ्चतक्षम्पञ्चतक्षी पुण्यसुदिनाभ्यामन्हः
क्लीबतापुण्याहम् सुदिनाहम् संख्याव्ययाभ्याम्परस्यपथः क्लीबता त्रिपथम् विपथम् सामान्येनपुंसकम् मृदुपचतिप्रा
तः कमनीयम् उपज्ञोपक्रमान्तस्तत्पुरुषः क्लीबम् उपज्ञायमानोपक्रम्यमाणयोः प्राथम्यञ्चेदाख्यातुमिष्यते पाणिन्युपज्ञंग्रं
न्थः नन्दोपक्रमंद्रोणः छायान्तश्चपूर्वपदार्थबाहुल्येइक्षूणांछायाइक्षुच्छायम् ॥ ॥

ति विपथं कथं पुंस्त्वं व्यधोदुरध्वोविपथःक
दध्वाकापथः समाइत्यमरे उच्यते प्रमाद एवायमितिबहवः वस्तुतस्तु पथगतौ इत्यस्मात्पचाद्यप्रत्यये पथतिव्याप्नोतीतिव्युत्पादितः पथशब्दः तथाचत्रि
कांडशेषः वाटः पथश्चमार्गःस्यादिति अनेनसमासेपुंस्त्वमुपपन्नं कापथइत्यत्रकादेशस्तुईषदर्थेबोध्यः अथचपरवल्लिंगापवादत्वात्तत्पुरुषे एवेदंप्रवर्ततेना
न्यत्र विपथा नगरी बहुव्रीहिरयंपंथानमतिक्रांताअतिपथाइहापिनद्विगुप्राप्तापन्नालमितिपरपदलिंगप्रतिषेधात्इतिमाधवःसामान्येनपुंसकंअनिय त
लिंग विषयकमिदंतेनादिपचतीत्यादौपुंस्त्वमेवमृदुपचतिक्रियाविशेषणत्वात्द्वितीयांतमिदंधातूपात्तक्रियांप्रति हिफलांशःकर्मीभूतःफलसामानाधि
करण्येद्वितीयाउपज्ञोपक्रमांतस्तत्पुरुषःक्लीबंअनञ्तत्पुरुषाधिकारोयंउपज्ञांतउपक्रमांतश्च तत्पुरुषक्लीबंस्यात्उपज्ञायते इत्युपज्ञा षिद्भिदामङ्इतिकर्म्म-

ण्यङ् उपक्रम्यते इत्युपक्रमः कर्म्मणि घञ् मांतस्य सेटोन वृद्धिरिति वृद्ध्यभावः उपज्ञाच उपक्रमश्च उपज्ञोपक्रमौ उपज्ञोपक्रमौ अंतेयस्य सउपज्ञोपक्रमां तः उपज्ञा ज्ञान माद्यं स्यात् ज्ञात्वारंभ उपक्रम इत्यमरः उपज्ञायमानस्योपक्रम्यमाणस्य च प्रथमस्यभावः प्राथम्यं चेद्यदि आख्यातुं वक्तुमिष्यते वांछ्यते पाणिनेरुपज्ञेति कर्तरिषष्ठी नंदस्योपक्रम इतिनंदोपक्रमं छायांतश्च पूर्वपदार्थबाहुल्ये छायांतस्तत्पुरुषो नपुंसकं स्यात् पूर्वंच तत्पदंच पूर्वपदं पूर्वपदस्यार्थः पूर्वपदार्थः बहुलस्यभावो बाहुल्यं पूर्वपदार्थस्य बाहुल्यं पूर्वपदार्थबाहुल्यं तस्मिन् सेनासुराच्छायेत्यस्य विकल्प स्यापवादोयं ७ ७ राजपर्याय पूर्वोरक्षः पिशाचादिपूर्वश्च सभांतः क्लीबं राजपर्यायपूर्वः सभांतस्तत्पुरुषो रक्षः पिशाचादिपूर्वः सभांतस्तत्पुरुषश्च नपुंसकं स्यात् इनेश्वरशब्दौ राजपर्यायौ इनस्यसभा इनसभं ईश्वरस्यसभा ईश्वरसभं राजपर्यायपूर्वं इति किं राजसभा रक्षसः सभा रक्षःसभं पिशाचस्यसभा पिशाचसभं संघातार्थेसभां-

राजपर्य्यायपूर्वोरक्षःपिशाचादिपूर्वश्च सभान्तस्तत्पुरुषः क्लीबं इनसभं ईश्वरसभम् नेह राजसभा रक्षस्सभम् पीशाचसभम् संघातार्थे सभान्तः क्लीबं स्त्रीसभम् स्त्रीसंघात इत्यर्थः सेनासुराच्छाया शालानिशांन्तो वा ब्राह्मणसेनम् यवसुरम् कुड्यच्छायम् गोशालम् श्वनिशम् पक्षे ब्राह्मणसेनेत्यादि इतिसमासप्रक्रिया ॥ ॥

तः संघातार्था या सभा तदंतस्तत्पुरुषः क्लीबं स्यात् सेनासुराच्छायाशालानिशांतो वा एतदंतस्तत्पुरुषः क्लीबं स्याद्वा श्वनिशं कृष्णसेना अनञ् तत्पुरुष इत्यधिकारान्नेह दृढसेनो राजा दृढा सेना यस्येति बहुव्रीहिः असेना अविद्यमाना सेना इति नञ्पूर्वस्तत्पुरुषः अथ शेषमाह कृत्तद्धितसमासैकशेषयङाद्यंतधातुरूपाः पंचवृत्तयः पंचानां वृत्तिरिति पूर्वाचार्यसंज्ञा वृत्तिलक्षणमाह परार्थाभिधानं वृत्तिः परस्य शब्दस्य योऽर्थस्तस्याऽभिधानं शब्दांतरेण यत्र सा वृत्तिः यथा राजपुरुष इत्यत्र राजशब्देन वाक्यावस्थायामनुक्तः पुरुषार्थोऽभिधीयते विग्रहलक्षणमाह वृत्त्यर्थावबोधकम् वाक्यं विग्रहः सद्विधा लौकिकोऽलौकिकश्च परिनिष्ठितत्वात्साधुर्लौकिकः प्रयोगानर्होऽसाधुरलौकिकः यथा राज्ञः पुरुष इति लौकिकविग्रहः राजन् अस् पुरुष सु इत्यलौकिकविग्रहः नित्यसमासलक्षणमाह अविग्रहो नित्यसमासः लौकिकविग्रहरहितो नित्यसमासो ज्ञेयः लोके यस्य विग्रहो न प्रयुज्यते इति भावः अस्वपदविग्रहो वा समस्यमानयावत्पदैरघटितः अस्वपदविग्रहः ॥

समासः षड्विध इति प्रायोवादः अव्ययीभावतत्पुरुषद्वंद्वद्विगुबहुव्रीहिकर्मधारयाधिकारबहिर्भूतस्यापि नाम्नः सह सुपेति विधानात् तद्व्याख्याने तत्पुरुष इत्युक्तिस्तु प्राचामनुरोधेनेति ध्येयम् पूर्वपदार्थप्रधानोऽव्ययीभावः उत्तरपदार्थप्रधानस्तत्पुरुषः उभयपदार्थप्रधानो द्वंद्वः संख्यापूर्वान्यपदार्थप्रधानो द्विगुः अन्यपदार्थप्रधानो बहुव्रीहिः विशेषणपूर्वः कर्मधारयः उत्तरपदार्थप्रधानः विशेष्यपूर्वस्तु पूर्वपदार्थप्रधानः नतु सार्वत्रिकः सूपप्रति उन्मत्तगंगमित्याद्यव्ययीभावे अतिमालादौ तत्पुरुषे दंतोष्ठमित्यादौ द्वंद्वे द्वित्राइत्यादौ बहुव्रीहौ चाऽभावात् अनेकपदत्वं द्वंद्वबहुव्रीह्योरेव किंच सिपां सिपा तिङा नाम्ना धातुनाथ तिङां तिङा॥ सिबं तेनेति विज्ञेयः समासः षड्विधो बुधैः १ प्रायोभिप्रायः सिबंतानां सिबंतेन यथा राजपुरुषः सिबंतानां तिपा समासो वेद एव भवति नान्यत्र यथा पर्यभूषत् सिबंतानां नाम्ना प्रातिपदिकेन यथा कुंभकारः अत्र सिबुत्पत्तेः प्रागेवोपपदसमासः सिबंतानां धातुना यथा क्विब्विचिपृच्छ्याय तस्तु कटप्रुजुश्रीणामित्यादिनिपातनाद्धातुना समासः कटप्रूः अजस्रं तिपां तिपा समासो यथा क्रियासातत्ये आख्यातेन समस्यते अश्नीत पिबते त्येवं सततं यत्राभिधीयते सा अश्नीतपिबता पचत भृज्जत खादत मोदत तिङां सिपा यथा एहीडादयोऽन्यार्थे समस्यंते एहीईड इति यस्मिन् कर्मणि तत् एहीडं कृंतविचक्षणा इति यस्यां क्रियायां सा कृंतविचक्षणा इवेन नित्यसमासो विभक्त्यलोपश्च जीमूतस्येव इति सर्वसमासशेषः जात्याख्यायामेकस्मिन्बहुवचनं वा ब्राह्मणाः पूज्याः एकत्वे द्वित्वे चास्मदो बहुवचनं वा वयं ब्रूमः अहं ब्रवीमि आवां ब्रूवो वा उपमानानि सामान्यवचनैः समस्यंते घनश्यामः इह पूर्वपदं तत्सदृशे लाक्षणिकमिति सूचयितुं लौकिकविग्रहे इति शब्दः प्रयुज्यते उपमानस्य पूर्वनिपातार्थमिदं उपमेयं व्याघ्रादिभिः सामान्याप्रयोगे समस्यते विशेष्यस्य पूर्वनिपातार्थमिदं पुरुषो व्याघ्र इव शूर इत्यर्थः इति समासप्रक्रिया ॥ ॥ अथ तद्धिता निरूप्यंते तेभ्यः स्याद्यंतपदेभ्यो हितस्तद्धितः विभक्त्यंतनाम्न एव तद्धितोत्पत्तिर्भवतीत्यर्थः अपत्येऽण् षष्ठ्यन्तान्नाम्नोऽण् प्रत्ययो भवति अन्वये सत्यपत्यार्थे अन्वयस्तु एकार्थीभाव एव वृत्तौ वाक्ये तु व्यपेक्षालक्षणः आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे इत्यमरः ॥ ॥ ॥ ॥ ॥ ॥

अपत्येऽण् नाम्नोऽपत्येऽर्थेऽण् प्रत्ययः

आदिस्वरस्याञ्णितिवृद्धिःस्वरेषुआदिः आदिस्वरः निर्द्धारणार्थसप्तम्यासमासः क्वचिदमाद्यंतस्य परत्वमितिपरनिपातः निर्द्धारणषष्ठ्यातुनसमासःनिर्द्धा
रणेयाषष्ठीतिनिषेधात् यद्वावोव्यस्वरे इत्यतःस्वरेइत्यनुवर्त्यतच्चजातावेकवचनंनिर्द्धारणसप्तम्यंतं तथाचस्वरेषुयआदिस्वरस्तस्यवृद्धिरितिव्याख्यानेआदि
श्चासौस्वरश्चेतिकर्मधारयः ञ्चण्च्ञ्णौतौइतौयस्यसाञ्णित् तस्मिन् ञ्णितिप्रकरणात्तद्धितेइतिलभ्यतेइञ्छब्दस्तुप्रत्येकंसंबध्यते द्वंद्वांते श्रूयमाणत्वात् वोःव्य
स्वरेउश्च ओश्चानयोः समाहारोवोःएकत्वेद्विगुद्वंद्वावितिनपुंसकत्वेपिन ह्रस्वः अनुकार्यरूपस्यास्पष्टमतिपत्त्यर्थत्वात् यश्चस्वरश्चतयोःसमाहारःयस्वरं तस्मि
न् यस्वरे तद्धितसंबंधिनि अत्रौकारस्यस्वरेअ विसिद्धौयकारार्थंतद्ग्रहणंवस्तुतस्तुक्वचिद्यकारेःपिस्वरकार्यातिदेशादेवसिद्धिरित्यौग्रहणंव्यर्थमितिध्येयम्
गासुपगत इत्युपगुः नाम्नश्चेतिसमासः गोरितिन्ह्रस्वः यादवविशेषस्य उद्धवस्यपूर्वजकश्चित् उद्धवंप्रकृत्यौपगविर्जगामेतिभागवतात् उपगोरपत्यमिति अ

आदिस्वरस्याञ्णितिवृद्धिः स्वराणाम्मध्येयआदिस्वरस्तस्य वृद्धिर्ञिति णिति च तद्धिते वोः व्यस्वरे उवर्णस्यौतश्चाव् त-
द्धितस्य यकारे स्वरे च उपगोरपत्यमौपगवः वैदुषः वासिष्ठः गौतमः भार्गवः आंगिरसः बैदः और्वः वार्त्रघ्नः ऋउरणि संख्यासं
भद्र पूर्वस्य मातृशब्दस्य ऋत उर्भवत्यणि परे षाण्मातुरः साम्मातुरः भाद्रमातुरः ॥

णः प्रयोगे उक्तार्थानाम प्रयोग इतिन्यायादपत्यश
ब्दस्याः प्रयोगः वाठाज्योरित्यतोवेत्यनुवर्ततेतेनपक्षेषष्ठीसमासोपिउपगवःपत्यमितिसमासस्यवैकल्पिकत्वाद्वाक्यमपिऔपगवःस्त्रियांतुजातेरितीप्
औपगवीअन्वये किंवस्त्वमुपगोरपत्यं चैत्रस्यविदुषोपत्यंवैदुषः वसिष्ठस्यऋषेरपत्यंवासिष्ठः गौतमस्यऋषेरपत्यं गौतमः भृगोर्ऋषेरपत्यं भार्गवः अंगिरसऋ-
षेरपत्यंआंगिरसः बिदस्यापत्यंबैदः उर्वस्यापत्यंऔर्वः ऋउरणिसामान्यशब्दस्यापिलक्ष्यानुसारात् विशेषपरत्वंबोध्यं तेनसंख्यादिपूर्वस्यमातृशब्दस्य
लाभः षण्णांमातृणामपत्यमितितद्धितार्थेद्विगुसमासोयंनतुषण्मातृणामपत्यमितिविग्रहः दिक्संख्येसंज्ञायामितिनियमेनासंज्ञायां समासाऽभावात्
तद्धितांतस्यसंज्ञात्वे पिसमासस्यासंज्ञात्वात् आदिस्वरवृद्धिःषोड इतिडत्वंक्वचिज्जबस्यापिञ्नम् इतिडस्यणःउर् षाण्मातुरः द्वयोर्मात्रोरपत्यं द्वैमातुरः
द्वैमात्रेयश्च विनायकः संमातुरपत्यंसाम्मातुरः भद्रमातुरपत्यंभाद्रमातुरः ॥ ६९ ६९ ६९ ६९

शिवादेश्चाण् शिवादेरण् स्यादपत्येर्थे इञपवादोयं शिवस्यापत्यं शैवः लह्यस्यापत्यंलाह्यः गंगाया अपत्यंगांगः पक्षेगांगेयः एयण् शिवकुकुत्स्थवेतंडजरत्कारु विपाशतक्षन् विश्रवण रवण ऋषिषेणविरूपाक्षइत्यादिः अतइञः नृषेः ऋषिवाचकाददंतात्तुअणेवभवति अनृषिवाचकमदंतंयत्प्रातिपदिकं तत्प्रकृतिकात् षष्ठ्यंतादिञ् स्यादपत्येर्थे देवदत्तस्यापत्यंदैवदत्तिः श्रीधरस्यापत्यंश्रैधरिः दशरथस्यापत्यंदाशरथिः पुरंदरस्याऽपत्यं पौरंदरिः बाह्वादेश्च बाह्वादिभ्यइञ् स्यादपत्येर्थे बाह्वादिराकृतिगणोयं बाहोरपत्यंबाहविः उडूनीवलोमानियस्यसउडुलोमा तारकाप्युडुवास्त्रियामित्यमरः उडुलोम्नोऽपत्यंनोवेति टिलोपः औडुलोमिः बहुत्वेतस्मादणेव पितोवेत्सणित्त्वान्नवृद्धिः उडुलोमाः गर्गस्यापत्यंगार्गिः बिदस्यापत्यंबैदिः नडस्यापत्यंनाडिः कुंजस्यापत्यंकौंजिः बह्वादिर्यथा॰

शिवादेश्चाण् शैवः गाङ्गः अतइञ् नृषेः अकारान्तान्नाम्नोऽनृषिशब्दादपत्येऽर्थे इञ् दैवदत्तिः श्रैधरिः दाशरथिः पौरन्दरिः बाह्वादेश्च बाह्वोरपत्यम्बाहविः औडुलोमिः गार्ग्गिः बैदिः नाडिः कौञ्जिः सुधातृव्यासवरुडनिषादचण्डाल बिम्बानामकङ्च सुधातुरपत्यं सौधातकिः वैयासकिः वारुडकिः नैषादकिः चाण्डालकिः बैम्बकिः ण्यायनणेयणीयागर्गनडात्रिस्त्रीपितृष्वस्रादेः गर्गादेर्ण्यो नडादेरायनण् अत्र्यादेः स्त्रीप्रत्ययान्ताच्च एयण् पितृष्वस्रादेर्णीयोऽपत्येऽर्थे गार्ग्यः वात्स्यः कात्यः वातण्ड्यः आवट्यः माण्डूक्यः पौतिमाष्यः नाडायनः चारायणः गार्ग्यायणः वात्स्यायनः आमुष्यायणः आत्रेयः कापेयः नैधेयः गाङ्गेयः माहेयः गौधेयः नाटेयः कल्याण्यादेरिनङ्च काल्याणिनेयः कौलटिनेयः ॥ ॥

बिदउर्वकश्यप कुशिक भारद्वाज उपमन्यु विश्वानर परस्त्री परसुंच इत्यादि सुधातृव्यासवरुडनिषाद चंडाल बिंबानामकङ्च एषामकङनादेशः स्यात् इञ् प्रत्ययश्चापत्येर्थे ङित्वादंत्यस्य स्थाने कङ् सुधातुरपत्यं सौधातकिः वेदान् व्यसतीतिवेदव्यासः कार्य्येणित्यण् भीमोभीमसेनइतिवदेकदेशस्य ग्रहणं व्यासस्यापत्यमितिनसंधिय्वोर्युट्चेतिवक्ष्यमाणेनेडागमः ततोवृद्धिर्वैयासकिः वरुडस्यापत्यंवारुडकिः वरुडादयोजातिविशेषाः निषादस्यापत्यंनैषादकिः चंडालस्यापत्यंचांडालकिः बिंबस्यापत्यंबैंबकिः ॥ ७ ॥ १०१

न स्त्री पुंसाभ्यां नञ्स्नञौ इति वक्ष्यमाणत्वात्

णयायनणेयणीया गर्गनडात्रिस्त्रीपितृष्वस्रादेः ण्यश्च आयनण् च ण्यण् च णीयश्च ते ण्यायनणेयणीयाः गर्गश्च नडश्च अत्रिस्त्रियो च पितृष्वसा च एषां समाहारो गर्गनडात्रिस्त्रीपितृष्वसृ गर्गनडात्रिस्त्रीपितृष्वसृ आदिर्यस्य स गर्गनडात्रिस्त्रीपितृष्वस्रादिस्तस्मात् द्वंद्वांते श्रूयमाण आदिशब्दः प्रत्येकं संबध्यते स्त्रीशब्देन स्त्रीप्रत्ययस्य ग्रहणान्नादिशब्दप्रयोगः इह स्वरूपं ग्रहणं, [illegible] यथाक्रमेण गर्गादिभ्यो ण्यो ऽपत्ये ऽर्थे णपत्येर्थे अत्र्यादेः स्त्रीप्रत्ययांताच्च एयण् अपत्ये ऽर्थे पितृष्वस्रादेर्णीयो ऽपत्येऽर्थे इह आयनणेयणोरण्णंतत्वादीपूअंत णकारपाठसामर्थ्यादर्थव द्ग्रहणपरिभाषाया अनित्यत्वात् अन्यथा ण्यणीयवत् णायनेणेयावित्येव ब्रूयादिति गर्गादिर्यथा गर्गवत्सव्याघ्रपाद पुलस्ति बभ्रु मंडु वतंडक शकल कण्व अगस्त्य कुंडिनी यज्ञवल्क्य पराशर जमदग्नि इत्यादि नडादिर्यथा कुंज ब्रध्न शंख शकट इत्यादि अत्र्यादिर्यथा अत्रि शुभ्र मृकंड अम्बादिमातृ विधवा गोधा प्रवाहण पांडु इत्यादि गर्गादिशब्दास्तदपत्ये लाक्षणिकाः साक्षादपत्ये इञेव अनन्तरापत्ये गार्गिरित्युक्तत्वात् गर्गस्यापत्यमितीञोर्थः गार्गेरपत्यं गार्ग्यः वत्सस्यापत्यं वात्स्यः कतस्यापत्यं कात्यः वतंडस्यापत्यं वातंड्यः अवटस्याऽपत्यमावट्यः मंडूकस्यापत्यं मांडूक्यः पूतिमाषस्यापत्यं पौतिमाष्यः स्त्रियां तु नदादित्वादीप् हसान्तद्धितयस्येपीति यलोपः गार्गी वात्सी नदादित्वात् स्त्रियामायनणि गार्ग्यायणी कात्यायनी वातंडी वातंड्यायनी मांडूक्यायनी अजादित्वादाप्प्रत्यये आवट्या पौतिमाष्या नडस्यापत्यमितिञोर्थः नाडेरपत्यं नाडायनः चरस्यापत्यं चारायणः ण्यांतानामिञंतानां च नडादित्वं बोध्यं गार्ग्यस्यापत्यं गार्ग्यायणः वात्स्यस्यापत्यं वात्स्यायनः दाक्षेरपत्यं दाक्षायणः अमुष्यापत्यमामुष्यायणः षष्ठ्या अलुगत्र अत्रेरपत्यमात्रेयः कपेरपत्यं कापेयः कल्याण्यादेरिनङ् च एषामिनङादेशः स्त्रीप्रत्ययांतत्वादेयण्प्रत्ययः कल्याणी सुभगा दुर्भगा बंधकी परस्त्री कुलटा इत्यादि कल्याण्या अपत्यं ङित्त्वादंत्यस्थाने इनङ् आदिस्वरवृद्धिः यस्येत्यलोपः काल्याणिनेयः कुलान्यटति भिक्षार्थं हलादेरीषादावितिटेर्लोपः सा कुलटा सती भिक्षुकी अत्रेनङ् विधौ गृह्यते या तु व्यभिचारार्थं कुलान्यटति तस्या एरण् प्रत्यये कौलटेरः एयणि तु कौलटेयः सतीपक्षे तु इनङ् वा भवति कौलटिनेयः कौलटेयः अथ बांधकिनेयः स्याद्बंधुलश्चासतीसुतः कौलटेरः कौलटेयो भिक्षुकी तु सती यदि तदा कौलटिनेयोऽस्याः कौलटेयोपि चात्मज इत्यमरः सुभगाया अपत्यमिति क्वचिद्द्वयोरिति वक्ष्यमाणेनोभयत्र वृद्धिः इनङ् सौभागिनेयः ॥ ६९ ६९

नडादेराय न

गोधादेरारणेरणौ गोधादेरारणेरणौ प्रत्ययौस्तः अपत्येऽर्थे गोधायाअपत्यं गौधारः नट्याअपत्यंनाटारः यस्येतिलोपः पंडो नपुंसकस्तस्यापत्यंपांडारः
एरणितुगौधेरः नाटेरः पितृष्वस्रादेर्णीयः पितृष्वसेति मातृपितृभ्यांस्वसुरितिषत्वंपितृष्वसुरपत्यंपैतृष्वस्रीयः मातृष्वसुरपत्यंमातृष्वस्रीयः पितृष्वस्रादेरेयणि
टिलोपः पितृष्वस्रादेष्टेर्लोपः स्यादेयणिअत्र्यादित्वादेयण् पैतृष्वसेयः पांडोर्ड्यण्पाण्डुशब्दात् ड्यण् स्यादपत्येऽर्थे णित्करणं तुपांड्याभार्या इत्यत्र वृद्धिहे
तोस्तद्धितस्यारक्तविकारार्थस्येति पुंवद्भावप्रतिषेधार्थंपांडोरपत्यंपांड्यः चटका ऐरण् चटकाशब्दादैरण् स्यादपत्येऽर्थे प्रातिपदिकग्रहणे लिंगविशि-
ष्टस्यापिग्रहणमितिपरिभाषया स्त्रिया अपि चटकस्य चटकाया वा पऽत्यंचाटकैरः स्त्र्यपत्येलुक् चटकादैरणोलुक् स्यात् स्त्र्यपत्ये चटका अजादित्वादाप्

गोधादेरारणेरणौ गौधारः नाटारः पाण्डारः गौधेरः नाटेरः पाण्डेरः पैतृष्वस्रीयः मातृष्वस्रीयः पितृष्वस्रादेरेयणि
टिलोपः पैतृष्वसेयः मातृष्वसेयः पाण्डोर्ड्यण् पाण्ड्यः चटकादैरेरण् चटकस्यापत्यञ्चाटकैरः स्त्र्यपत्येलुक् चटका लु
ग्बहुत्वेक्वचित् प्रत्ययस्य गर्ग्गाः वसिष्ठाः भृगवः अङ्गिरसः वत्साः कुत्साः गोतमाः अत्रयः बिदाः अङ्गाः वङ्गाः कलिंगाः
विदेहाः स्त्रियामवन्तिकुन्तिकुरुशूरसेनादिभ्योऽबहुत्वेऽपि अवन्ती कुन्ती कुरूः शूरसेनी ॥

लुग्बहुत्वे क्वचित् क्वचिदपत्यप्रत्ययस्य
लुक् स्यात् तत्कृते बहुत्वे यञ्यस्य लुक् गर्गाः वत्साः तत्कृतेइति किं प्रियोगार्ग्यो येषांते प्रियगार्ग्याः स्त्रियांतु नगार्ग्यः स्त्रियः अणो लुक् वसिष्ठाः भृगवः अंगिरसः कु
त्साः गौतमाः बिदाः उर्वाः ण्यणो लुक् अत्रयः जनपदक्षत्रियवाचिनोऽपत्यप्रत्ययस्य लुक् स्यात् बहुत्वे अणो लुक् अङ्गाः वङ्गाः कलिङ्गाः विदेहाः तद्राजन्यर्थेष्वपत्यप्रत्य-
याभवंति इक्ष्वाकूणांराजेतिनिपातनाद्दिलोपः ऐक्ष्वाकः पंचालानांराजापांचालः बहुत्वे लुक् इक्ष्वाकवः पंचाला इत्यादि एवमं गानाराजाआंग इत्याद्यपिबोध्यम् स्त्रि
यामवन्तिकुन्तिकुरुशूरसेनादिभ्योबहुत्वेपि एभ्योऽपत्यार्थप्रत्ययस्य लुक् स्यात् स्त्रीप्रत्यये अवंतेरपत्यंआवंत्यः स्त्री अवंती कुंतेरपत्यंकौंतेयः स्त्री कुन्ती इतो मनुष्यजातेरि-
तीप् कुरोरपत्यंकौरव्यः स्त्री कुरूः ऊतऊरित्यूप्रत्ययः शूरसेनस्याऽपत्यंशौरसेनः स्त्री शूरसेनी मद्रस्यापत्यंमाद्रः स्त्रीमाद्री गौरादित्वादीप् ६२ ६२

मनुष्यवाचकेभ्यस्वरूप्यमयटौवास्तः ट ईवर्यः आगतमित्यर्थेसमात्मार्गादागतंसमरूप्यंसममयंपक्षेणीयः समीयंदेवदत्तादागतंदेवदत्तरूप्यंदे
वदत्तमयंदेवदत्तीयंणीयःदैवदत्तः अण् ७ ७ छगलिनोणेयिनः छगलिन्शब्दात्णेयिनः प्रत्ययः स्यात्प्रोक्तमधीते इत्यर्थे छगलिनाप्रोक्तं शास्त्रमधी
यते पठंति येते छागलेयिनः नोर्वेतिटिलोपः पाराशर्यशिलालिभ्यांभिक्षुनटसूत्रयोर्णिनिः आभ्यांणिनिःस्यात् इकारउच्चारणार्थः पाराशर्य्योव्यासः अनंतराप
त्येपिउपचाराद्गर्गादिभ्योण्यः यस्येत्यलोपेक्वचिद्यलोपइतिवक्ष्यमाणेनयलोपः पाराशरीणः शिलालिनाप्रोक्तं नटसूत्रमधीय तेयेने शैलालिनः कर्मंदकृशा
श्वादिनिः उक्तविषयेआभ्यामिनिः स्यात् कर्मंदेनप्रोक्तंभिक्षुसूत्रमधीयते येते कर्म्मंदिनोभिक्षवः कृशाश्वेन प्रोक्तं नदसूत्रमधीयते येते कृशाश्विनोन-

छगलिनोणेयिनः छगलिनाप्रोक्तमर्धीतेयः छागलेयिनः पाराशर्य्यशिलालिभ्याम्भिक्षुनटसूत्रयोर्णिनिः पाराशर्य्येण
प्रोक्तंभिक्षुसूत्रमर्धीयते पाराशरिणोभिक्षवः शैलालिनोनटाः कर्म्मन्दकृशाश्वादिनिः उक्तविषयेकर्म्मन्दिनः कृशाश्विनः
त्रपुजतुनोःषण्विकारेत्रापुषम् जातुषम् शम्याःष्लञ् शामीलीस्रुक् शक्तियष्ट्योरीकण् प्रहरणेशाक्तीकः याष्टीकः विंशा-
तित्रिंशद्भ्यांड्वुन्कोवाविंशकः विंशतेस्तिलोपोडितित्रिंशकः विंशतिकः त्रिंशत्कः कर्म्मणउकञ् कर्म्मणेप्रभवति
कार्म्मुकम् मनोर्जातावपत्येष्यषणौ मनोरपत्यम्मनुष्यः मानुषः जातौकिम् मानवः ॥ ॥

टाः भिक्षुनटसूत्रयोःकिं
पाराशर्यस्येदंपाराशरंशिलालिनइदंशैलालंकार्मंदंकाशाश्वंअण् त्रपुजतुनोःषण्विकारे आभ्यांषण् स्याद्विकारेत्रपुणोविकारःत्रापुषंजतुनोविकारःजातुषं
शम्याःष्लञ्शमीशब्दात्ष्लञ् स्यात्षित्त्वादीप् शम्याविकारः शामीलंभस्मस्त्रि तद्इतीप् शामीली शक्तियष्ट्योरीकण् प्रहरणेआभ्यामीकण्स्यात् शक्तिःप्रहर
णमस्य शाक्तीकः यष्टिः प्रहरणमस्ययाष्टीकः विंशतित्रिंशद्भ्यांड्वुन्कोवातेनक्रीतमित्यर्थेआभ्यांड्वुन्कौप्रत्ययौस्तः असंज्ञायामर्थेड्कः विंशते-
स्तिलोपोडितितिशब्दलोपः विंशकः त्रिंशकः संज्ञायांतुकः विंशतिकः त्रिंशत्कः कर्मणउकञ् कर्मशब्दादुकञ् स्यात् तस्मैप्रभवतीत्यर्थेसमर्थश्शक्तः
प्रभवतीत्युच्यते मनोर्जातावपत्येष्यषणौ मनुशब्दादेतौस्तः अपत्यत्वेजातौवाच्येसमुदायार्थोजातिःमनुष्यःमानुषः जातिशब्दावेतौ ७ ७

केनेयेकाः कश्चईनईयश्चइकश्च नेकेनेयेकाः क्रममधीतेक्रमकः क्रमपदशिक्षामीमांसाः क्रमादयः एभ्यःकः पूर्वस्यह्रस्वोनिपातनात् शिक्षकः मीमां
सामधीते मीमांसकः ग्रामेभवः ग्रामीणः ईनः ग्राम्येपिण्यः सध्र्यङे वसध्रीचीनः सम्यङे वसमीचीनः तिर्यङे वतिरश्चीनः सहांचतीतिसध्र्यङ् अंचत्यंतान्नाम्नः स्वा
र्थेईनोवादिशिनप्राक्प्राचीनं प्रत्यक्प्रतीचीनं अवाक्अवाचीनंअर्वाक् अर्वाचीनं अर्वतेअंचतीति अर्वाक् निकृष्टप्रातिकृष्टावरेफयाप्याः वमाः धमा इ-
त्यमरः दिशितुप्राचीदिक् अंचेरदीर्घश्चेति अलोपेपूर्वदीर्घः उदीचीदिक् तिरश्चादयइतिउदीचोदेशः कुलस्यापत्यमितिकुलीनः तदंतादपिमहच्चतत्कुलम्
चेतिसहादेः सादिरितिमहाकुलस्यापत्यंम हाकुलीनः आढ्यंचततृकुलंचआढ्यकुलं आढ्यकुलस्यापत्यमाढ्यकुलीनः क्वचिद्यलोपः क्वचिद्भसासरस्यय-

केनेयेकाः कारकात्कईनईयइक इत्येतेप्रत्ययाभवन्तिकर्त्तरिकर्म्मणिचोक्तवक्ष्यमाणेष्वर्थेषुच णितोवाक्रममधीतेक्रमकः प
दकः ग्रामादागत स्तत्रजातोवाग्रामीणः सध्रीचीनः समीचीनः तिरश्चीनः कुलस्यापत्यं कुलीनः महाकुलीनः आढ्यकुली
नः क्वचिद्यलोपः कन्यायाअपत्यंकानीनः कात्यस्येमेकातीयाः छात्राः गार्गीयाः रेवत्याअपत्यंरैवतिकः पुष्येणयुक्तापौर्णि
मासीपौषी तैषी क्षत्रस्यापत्यंक्षत्रियः शुक्रोदेवतास्यशुक्रियम् इन्द्रस्यलिंग मिंद्रियम् अक्षैर्दीव्यतीत्याक्षिकः कुद्दालैः खनति
कौद्दालिकः॥ ॥कारस्यलोपः स्यात्तद्धितेस्वरे नत्वाकारे कन्यायाअपत्यमितिण्यणोपवादईनः यस्येत्यालोपः ततोयलोपः णितोवेतिणित्त्वाद्वृद्धिः
कानीनोव्यासः कर्णश्च अविवाहितायाअपत्यमित्यर्थः कात्यस्येमे गर्गादिण्यांतातृणी येयलोपः कातीयाः गार्ग्यस्येमे गार्गीयाः यलोपः नत्वाकारे इति
किंगार्ग्यायणः इहनयलोपः रैवतिकः णितोवेतिणित्त्वाद्वृद्धिः रेवतीअश्वपालीमणिपालीद्वारपालीत्यादीरेवत्यादयः नक्षत्रेणयुक्तः कालः तृतीयांतनक्षत्रश
ब्दात्प्रत्ययात्युक्तः कालइत्यर्थेपुष्येणयुक्तंपौषमहः अण्स्त्रियांतुनणईप्तिष्यपुष्ययोर्नक्षत्राणीतियलोपः पौषी तिष्येणयुक्तातैषी क्षत्रशब्दाज्जातावि-
यः क्षत्रियः क्षात्रिरन्यः शुक्रियंहविः इयङ्इन्द्रस्यात्मनोलिंगंचिन्हमितिइंद्रियंतेनदीव्यतिखनतिजयतिजितंतेनेतितृतीयांतादिकोदीव्यत्यादिष्वर्थेषुणितोवेति १०५
णित्त्वाद्वृद्धिः अक्षैः पाशकैर्दीव्यत्याक्षिकः कुद्दालैः खनतिकौद्दालिकः गोदाहरणंतुकुद्दालः इतिहैमः अक्षैर्जयत्याक्षिकः अक्षैर्जितंआक्षिकम् ६९ ६९

हलंसीरंवहति हालिकः इकः तेनेनितृतीयांतादिकः संस्कृते ऽर्थे दध्नासंस्कृतं दाधिकम् मरिचैः संस्कृतंमारिचिकं शब्दं करोतिशाब्दिकः प्रकृति प्रत्यय विभा
गेनशब्दंव्युत्पादयतीत्यर्थः दर्दुरं करोति दार्दुरिकः इहदर्दुरशब्दः वाद्यभांड वाची कुलालइत्यर्थः धर्म्मंचरतीति धार्मिकः सद्वृत्तइत्यर्थः अधर्मंचरत्याधर्मिकः
असद्वृत्तइत्यर्थः पक्षिणोहंतिनोवेतिटिलोपः इकः पाक्षिकः शकुनं हंतिशाकुनिकः तित्तिरं हंति तैत्तिरिकः मत्स्यंहंतिमात्सिकः मीनंहंतिमैनिकः मृगंहंति मा-
र्गिकः सारंगंहंतिसारंगिकः मयूरंहंतिमायूरिकः पुराणमधीते पौराणिकः इतिहासमधीतेवेत्तिऐतिहासिकः वेदमधीतेवेत्तिवावैदिकः णितोवेति णित्वाद्वृद्धिः
पील्वादिक र्णादिभ्यः कुणजाहौ पाकमूलयोः पील्वादिभ्यः कर्णादिभ्यश्चकुणजाहौ प्रत्ययौस्तः पाकमूलयोरर्थयोः पाकः परिणामः मूलमुपक्रमः पीलु

हलम्वहतिहालिकः शब्दंकरोतिशाब्दिकः दार्दुरिकः धर्मञ्चरतिधार्म्मिकः आधर्म्मिकः पक्षिणोहन्तिपाक्षिकः शाकुनिकः तै
त्तिरिकः मात्सिकः मैनिकः मार्ग्गिकः सारङ्गिकः पुराणमधीतेपौराणिकः ऐतिहासिकः वैदिकः पील्वादिकर्णादिभ्यः कुणजाहौपा
कमूलयोः पीलूनां पाकः पीलकुणः कर्णस्यमूलं कर्णजाहम् पक्षात्तिर्म्मूले पक्षस्यमूलं पक्षतिः चञ्चुचणौवित्ते विद्यया वित्तो विद्या
चञ्चुः विद्याचणः वेःशालशंकटौस्वार्थेविस्तृतंविशालंविशंकटम् विसम्प्रोदःकटः विकटम् संकटम् प्रकटम् उत्कटम् अलाबूतिलोमाभङ्गाभ्योरज
सिअलाबूनांरजोऽलाबूकटम् तिलकटम् उमाकटम् भंगाकटम्॥ कर्कन्धुः शमीकरीरकुबुलबदरखदिरपील्वादयः कर्णअक्षिनखमुखकेशपादगुल्फभ्रू
शृंगदंत ओष्ठपृष्ठ कर्णादयः पक्षात्तिर्मूले पक्षशब्दात्तिप्रत्ययः स्यात् मूलेर्थे पक्षतिः प्रतिपत् चञ्चुचणौवित्ते चंचुचणौ प्रत्ययौस्तो वित्तेर्थे वित्तोभोग्य
प्रतीतयोरितिनिपातनात् दस्तस्येति नत्वं न वेः शालशंकटौ वेः स्वार्थे एतौस्तः विस्तृतंविशालं विशंकटं विनञ्भ्यांनानञौनसह असहार्थे पृथग्भावेवर्त-
मानाभ्यां नानाञौस्तः विनानाना विसंप्रोदः कटः एभ्यः कटप्रत्ययः स्यात् स्वार्थे विकटं विकृतं संकटं संहतं संबाधइत्यर्थः प्रकटं प्रज्ञातं प्रकाशते त्यर्थः
उत्कटमुद्भूतं रूढशब्दाश्चैते कथंचिद्व्युत्पाद्यंते अलाबूतिलोमाभंगाभ्योरजसि एभ्योरजस्यभिधेये कटप्रत्ययः स्यात् रजसोविकारत्वात् विकारार्थेप्रत्यया
नामपवादोयम् अलाबूनांरजः अलाबूकटं तिलानांरजः तिलकटं उमायाः रजः उमाकटं भंगायाः रजः भंगाकटं ॥ छ छ

गोष्ठादयः स्थानादिषु पशुनामभ्यः पशुनामभ्योगोष्ठादयः प्रत्ययाः स्युः स्थानादिषर्थेषु संघातेकटः अप्रसृतावयवसमूहः संघातस्तत्र कटप्रत्ययः सामूहिकानामपवादोयम् विस्तारेपटः प्रसृतावयवः समूहोविस्तारस्तत्र पटः प्रत्ययः सामूहिकानामपवादोयम् द्वित्वेगोयुगः प्रकृत्यर्थस्यद्वित्वेद्योत्येगोयुगप्रत्ययः स्यात् उष्ट्रगोयुगं द्वयं युगमित्यादिवत् द्व्यवयवसंघातप्राधान्यादेकवचनमित्यर्थः षट्त्वेषड्गवः षट्त्वेवाच्येषड्गवप्रत्ययः स्यात् अश्वानां षट्त्वं अश्वषड्गवं अवयवसंघातस्यप्राधान्यादेकवचनं स्नेहेतैलः स्नेहेवाच्येतैलप्रत्ययः तिलानां स्नेहः तिलतैलं सर्षपाणां स्नेहः सर्षपतैलं भवनेक्षेत्रेशाकटशाकिनौ भवने क्षेत्रे इत्यर्थे शाकटशाकिनौ प्रत्ययौ भवतः अवात्कुटारकटौ अवशब्दात् कुटारकटौ प्रत्ययौ भवतः अवाचीनेहीनेर्थे अवकुटारावकटशब्दौ वेदे प्रसिद्धौ नासिकायानतेसं

गोष्ठादयस्स्थानादिषु पशुनामभ्यः गवां स्थानं गोष्ठम् अश्वगोष्ठम् संघातेकटः अवीनां संघातोऽविकटः विस्तारेपटः अविपटः द्वित्वेगोयुगः द्वावुष्ट्रौ उष्ट्रगोयुगम् षट्त्वेषड्गवः अश्वषड्गवम् स्नेहेतैलः तिल तैलम् सर्षपतैलम् भवनेक्षेत्रेशाकटशाकिनौ इक्षूणां भवनं क्षेत्रं इक्षुशाकटम् इक्षुशाकिनम् अवात्कुटारकटौ अवाचीनोऽवकुटारः अवकटः नासिकायानते संज्ञायां टीटनाटभ्रटाः अवात् नासिकायानतं अवटीटम् अवनाटम् अवभ्रटम् तद्योगान्नासिकावटीटा पुरुषोऽवटीटः नेर्बिडबिरीसौ निबिडम् निबिरीसम् इनपिटकाः प्रत्ययानेश्चिक चिचिकादेशाः चिकिनम् चिपिटम् चिक्कम् क्लिन्नस्यचिलपिलचुलोलः प्रत्ययोऽस्यचक्षुषी इत्यर्थे क्लिन्नेचक्षुषी अस्य चिल्लः पिल्लः चुल्लः ॥ ॥

ज्ञायांटीटनाटभ्रटाः अवात् नासिकासाधनके नमनेवर्तमानादव शब्दादेतेप्रत्ययाः स्वार्थे संज्ञायां वाच्यायां नतमिति नपुंसके भावे क्तः नमनं नीचैस्त्वं कथं तर्हि नासिकायां पुरुषे चावटीटशब्दप्रयोग इत्यत आह तद्योगादिति नेर्बिडबिरीसौ उक्तेर्थे निशब्दान्नासिकायानतेऽभिधेयेनाबडबिरीसौ प्रत्ययौस्तः इनपिटकाः प्रत्ययानेश्चिकचिचिकादेशाः उक्तेर्थे नासिकायानतेऽभिधेये इनपिटकाः प्रत्ययाः स्युः नि शब्दस्य चिकचिचिकौ यथाक्रममादेशाश्च क्लिन्नस्यचिल्पिल्चुलोलः प्रत्ययोऽस्यचक्षुषी इत्यर्थे अस्य चक्षुषी एतस्मिन्नर्थे क्लिन्नशब्दाल्लप्रत्ययः स्यात् क्लिन्नस्य चिल्पिल्चुलः आदेशाश्च कथं तर्हि स्युः किन्नाक्षे चिल्लचुल्लपिल्लाः क्लिन्नेऽक्ष्णि चाप्यमी इत्यमरः इति चेत् अत्राहुः पुरुषे त्वनुसादितानां तदवयवे लक्षणाबोध्यात्र ॥ १०६

उपाधिभ्यामासन्नारूढयोस्त्यकः उपाधिभ्यांत्यकः प्रत्ययः स्यात् आसन्नं समीपं आरूढमुच्चस्थानं तत्रसंज्ञायां पर्वतस्यासन्नं स्थलमुपत्यका आरूढं स्थल
मधित्यकाक्षिपकादित्वात्काप्यतइतीत्वंनकर्मणघोघठतेइत्यर्थेसप्तम्यंतात् कर्मशब्दाद्ठप्रत्ययः स्यात् घटते चेष्टते इत्यर्थे नोवेतिटिलोपः कर्मशूरस्तु कर्मठ
इत्यमरः साक्षाद्द्रष्टरिसंज्ञायांडिनिः द्रष्टर्यर्थे साक्षा दित्यव्ययात् डिनिः स्यात् डित्वाट्टिलोपः संज्ञायामर्थे इनामितिदीर्घः साक्षी इष्टादिभ्यइनिरनेनेत्यर्थे ए
भ्यइनि प्रत्ययः स्यात् अनेनेत्यर्थे अधीतमनेनेति अधीती हैयंगवीनं श्रोत्रियः क्षेत्रियोऽनुपदी इत्यादयो निपात्याः दुह्यते इति दोहः क्षीरं ह्योगोदोहस्य विकार इ-
ति ह्योगोदोहस्य हियंगुरादेशो विकारार्थे ईनप्रत्ययश्च निपात्यते णितो वेति णित्वाद्वृद्धिः वोऽवृयस्वरेइत्यवृहैयंगवीनं नवनीतं छंदसः श्रोत्रभावो निपात्यते तद-

उपाधिभ्यामासन्नारूढयोस्त्यकः पर्वतस्यासन्ना भूमिरुपत्यका आरूढा अधित्यका कर्म्मणघोघटतेइत्यर्थे कर्म्मणिघटते क
र्म्मठः साक्षाद्द्रष्टरिसंज्ञायांडिनिः साक्षाद्द्रष्टासाक्षी इष्टादिभ्यइनिरनेनेत्यर्थे इष्टमनेनइष्टी अधीती हैयङ्गवीनं श्रोत्रियः क्षेत्रियोऽ
नुपदी इत्यादयोनिपात्याः ह्योगोदोहोद्भवं हैयङ्गवीनम् छन्दोऽधीते श्रोत्रियः परक्षेत्रे चिकित्स्यः क्षेत्रियः अनुपदमन्वेष्टानुपदी
आख्याताव्ययसर्वादेष्टेः प्रागकः पचतकि उच्चकैः नीचकैः सर्वकः अयकम् असकौ त्वकम् अहकम् त्यतनौ भवाद्यर्थे त्यतनौ प्र
त्ययौस्तः अव्ययात् कुत्रभवः कुत्रत्यः कुतस्त्यः अमात्यः इहत्यः अव्ययस्य तद्धितयस्वरयोष्टिलोपः बहिर्भवोबाह्यः स्वस्स्वर्ग-
स्तत्रभवस्सौवः पौनःपुन्यम् पौनःपुनिकः दक्षिणापश्चात्पुरसस्त्यण् दाक्षिणात्यः पाश्चात्यः पौरस्त्यः ऐषमस्त्यम् ऐषमस्त
नम् ॥ ॥

धीतेइत्येतस्मिन्नर्थे इय् प्रत्ययश्च णितो वेति वृद्ध्यभावः श्रोत्रियः परक्षेत्रशब्दात्सप्तम्यंतात् इय् प्रत्ययः परशब्दलोपश्च निपात्यते क्षेत्रि
योव्याधिः शरीरांतरे चिकित्स्यः अप्रतीकार्य इत्यर्थः अनुपदशब्दादन्वेष्टरि इन्प्रत्ययो निपात्यते आख्याताव्ययसर्वादेष्टेः प्रागकः एषांटेः प्राक् अकप्रत्ययः स्यात्
स्वार्थे अंत्योऽकार उच्चारणार्थः त्यतनौ भवाद्यर्थे एतौ स्तः अमेहक्वतसित्रेभ्य एवत्यः अमांतिकसहार्थयोः अमाभवः अमात्यः दक्षिणापश्चात्पुरसस्त्यण् ए
भ्यस्त्यण् स्यात् भवाद्यर्थे दक्षिणेत्यादंतमव्ययं दक्षिणाभवः दाक्षिणात्यः ऐषमोह्यस्श्वसभ्यो वात्यः पक्षे तनः अत्रवर्षे ऐषमः अतीतेऽह्नीयः आगामिदि

नेश्वः श्वसस्तिकण्वा श्वसऽव्ययात्तिकणपिस्यात् श्वोभवमितिनसंधिर्य्वोरित्युडागमवृद्धी शौवस्तिकं कालवाचिभ्योऽव्ययेभ्यः सायंचिरंप्राण्हेप्रगेइ
तिचतुर्भ्यश्च ननः स्यात् दोषे तिरात्रौदोषाभवः दोषातनः प्राण्हेतनः प्रगेप्रातर्भ वः प्रगेतनः सप्तम्याअलुक्उभयत्रस्यतेर्घञिआतोयुगितियुक्किृते
सायशब्दोऽकारांतोदिवसाऽवसानेरूढः तस्य चिरशब्दोप्यदंतस्तस्यापिप्रत्ययसंनियोगेनमांतत्वंप्राण्हप्रगयोरेदंतत्वंच निपात्यतेइतिवार्तिककृन्मतं
भाष्येतुसायंचिरंचमांतमव्ययंस्वीकृतं स्वार्थेपिप्रकृत्यर्थेप्यणादयः स्युः देवदत्तएवदैवदत्तकः णितोवेतिणित्वाद्वृद्धिः चोरएवचौरः वयएववायसः र
क्षएवराक्षसः अण् चत्वारश्चतेवर्णाश्चतुर्वर्णाः चतुर्वर्णाएवचातुर्वर्ण्यंष्यञ् चतुरोवेदानधीते इतितद्धितार्थे द्विगुः तमधीतेइत्यर्थेऽण् तस्यलुक् चचतुर्वे

श्वसस्तिकण्वा शौवस्तिकम् अद्यतनः ह्यस्तनः श्वस्तनः सनातनः सदातनः पुरातनः दोषातनः सायन्तनः चिरन्तनः प्राण्हे
तनः स्वार्थे पिउक्तावक्ष्यमाणाश्च प्रत्ययास्स्वार्थेस्युः देवदत्तएवदैवदत्तकः चौरः वयएववायसः रक्षएवराक्षसः चत्वारोवर्णा
श्चातुर्वर्ण्यम् समीपमेवसामीप्यम् चत्वारोवेदाश्चातुर्वैद्यम् प्रज्ञएवप्राज्ञः चातुराश्रम्यम् त्रैलोक्यम् अनंत एवानन्त्यम् आवस
थएवावसथ्यम् इतिह्यएव ऐतिह्यम् भेषजमेव भैषज्यम् भागरूपनामभ्योधेयः भागएवभागधेयम् नामधेयम् रूपधेयम् देवात्तः
देवएवदेवता मृदस्तिकः मृदेव मृत्तिका सस्नौप्रशंसायाम् प्रशस्ता मृत् मृत्सा मृत्स्ना॥ ॥ दएवउभयत्रवृद्धिः चातुर्वैद्यः ष्यञ् चत्वारश्चते
वेदाश्चचतुर्वेदाः चतुर्वेदएवचातुर्वैद्यमितिवा प्रज्ञएवप्राज्ञः अण् चत्वारआश्रमाएव चातुराश्रम्यंष्यञ् त्रयश्चतेलोकाश्च त्रिलोकाः त्रिलोकाएवत्रैलोक्यं
अनंतएवआनंत्यं ष्यञ् आवसथएवेतिउपसर्गेवसेरथप्रत्ययः आवसथ्यं गृहंष्यञ् इतिहेतिनिपातसमुदयः ऐतिह्यंष्यञ् भिषज्यतेः कंड्वादियगंतात् क्विप्
भिषक् भिषजामिदं भेषजंअणिनिपातनादेकारः भैषज्यंष्यञ् भागरूपनामभ्योधेयः एभ्योधेयप्रत्ययः स्यात्स्वार्थेदैवं [illegible] भाग्यं स्त्री नियतिर्वि-
धिरित्यमरः आख्याह्वे अभिधानंचनामधेयं चनामचेत्यमरः देवात्तः देवशब्दात्तप्रत्ययः स्यात्स्वार्थे तांतं स्त्रियां मृदस्तिकः मृदशब्दात्तिकप्रत्ययः स्या
त्स्वार्थे सस्नौप्रशंसायां रूपप्रत्ययस्यापवादौ मृदः सस्नौप्रत्ययौस्तः प्रशंसायामर्थे मृन्मृत्तिका प्रशस्तातु मृत्सामृत्स्ना च मृत्तिके त्यमरः ॥ ६९

दिष्टं भागधेयं

अणीनयोर्युष्मदस्मदो —— र्युष्माकास्माकौ एतयोर्द्वित्वेबहुत्वेचवर्तमानयोर्युष्माकास्माकावादेशौस्तः अणीनयोः परतः एकत्वेतवकममकौ एकत्वेवर्तमानयो र्युष्मदस्मदोस्तवकममकावादेशौस्तः अणीनयोः परतः वत्तुल्येतुल्यते सादृश्येनोन्मीयतेज्ञायतेइति तुलउन्माने ऽस्मात् क्यप् तुल्यं यद्वातोलनं तुलाण्नेरभावे भिदाघङ् तुलयासंमितंतुल्यंकारकादितिण्यः णितोवेत्यणित्वं तृतीयांतातृसप्तम्यंतात् षष्ठ्यंताच्च वत्प्रत्ययः स्यात् तुल्येसादृश्ये ऽर्थेब्राह्मणेन तुल्यंब्राह्मणवदधीते तृतीयांतात् तुक्रियातुल्ये एवगुणतुल्येमाभूत् पुत्रेणतुल्यः स्थूलः द्रव्यतुल्येपिन गवातुल्योगवयः सप्तम्यंतात् षष्ठ्यंतार्च्च क्रियातुल्येपिभवतीत्यर्थः मथुरावत् पाटलीपुत्रे प्राकारः मथुरायांयादृशः प्राकारस्तादृशः पाटलिपुत्रेइत्यर्थः अर्हेपि अर्हे ऽर्थेपि द्विती

अणीनयोर्युष्मदस्मदोर्युष्माकास्माकौ एकत्वेतवकममकौयुवयोर्युष्माकं वायंयौष्माकः यौष्माकीनः अनयोरस्माकंवायं आस्माकः आस्माकीनः तवायंतावकः ममायम्मामकः तावकीनः मामकीनः वत्तुल्ये सादृश्ये ऽर्थेवत्प्रत्ययः चन्द्रेण तुल्यश्चन्द्रवत् ब्राह्मणवत् क्षत्रियवत् मथुरायामिव मथुरावत् पाटलिपुत्रेइवप्राकारः पाटलीपुत्रवत् चैत्रस्येव चैत्रवत् मैत्रस्य गृहम् अर्हे ऽपि विधिमर्हति विधिवत् भावेतत्वयणः शब्दस्यप्रवृत्तिनिमित्तम्भावस्तत्र वाच्ये तेस्युः तान्तांस्त्रियां त्वान्तंक्लीबम् ब्राह्मणता ब्राह्मणत्वम् ब्राह्मण्यम् शुक्लता शुक्लत्वम् शौक्ल्यम् वैदुष्यम्॥ ॥ यांताद्वत् स्यात् क्रियातुल्ये विधिमर्हति विधिवत्सूज्यते विधानंविधिः

अर्हतीति अर्हः पचाद्यः भावेतत्व यणः तश्चत्वश्च यण्चते तत्वयणः भावेतत्वयणः प्रत्ययाअणादयश्चस्युः भावशब्दो ऽनेकार्थवचनः अभिप्राये यथाअयंभावः पदार्थमात्रेयथा विचित्राभावशक्तयः शृंगारादिषुयथास्थायिभावः संचारिभावः प्रवृत्तिनिमित्तेधात्वर्थमात्रेचभावः तेषत्रकस्यग्रहणं उच्यते प्रवृत्तिनिमित्तवचनस्यभावस्यात्रग्रहणंभवंतिशब्दाअनेनेतिव्युत्पत्तेः अभिप्रायादिवचनस्यात्रअग्रहो ऽनभिधानात् तथाचसिद्धांतकौमुद्यांप्रकृतिजन्यबोधेप्रकारोभाव इतिउक्तंचहरिटीकायां कृत्तद्धितसमासेभ्यः संबंधाभिधानंभावप्रत्ययेनेतितेनपाचकत्वमित्यत्रकर्तृत्वरूपः संबंधः औपगवत्वमित्यत्र जन्यत्वरूपः संबंधः राजपुरुषत्वमित्यत्रस्वरूपसंबंधः तप्रत्ययांतंस्त्रीलिंगंत्वप्रत्ययांतंनपुंसकंयणंतमुभयत्रमैत्र्यंमैत्रीत्यादिब्राह्मणस्यभावः यस्येत्य ऽलोपः ब्राह्मण्यं शुक्लायाभावः त्वतयोर्गुणवचनस्येतिपुंवद्भावः शुक्लत्वं॥

कर्मण्यपि कर्मण्यर्थेपि तत्प्रयणः प्रत्ययाः अणादयश्चस्युः राज्ञोभावः कर्मवानोवतिटिलोपः राज्यं यण् स्तेनस्य चौरस्यभावः कर्म्मवास्तेन्यं यण् लोहितादेर्डिमन्
भावेवालोहितादेर्गणात् डिमन्प्रत्ययस्त्वादयश्च भावेलोहितस्यभावः डित्वाट्टिलोपः लोहितिमा अणोर्भावः अणिमा लघोर्भावः लघिमा भावेऽणपि अण्
प्रत्ययोपिस्यात् भावेगुरोर्भावो गौरवंवोऽवृयस्वरे इत्यवृ यूनोभावः नोवेति टिलोपोनयौवनं शिशोर्भावः शैशवं मुनेर्भावःमौनंहोतुर्भावः हौत्रम् उद्गातुर्भा
वः औद्गात्रंमहतोभावः टिलोपः महिमात्ररइमनिऋइतिषष्ठ्यंतंसांकेतिकं पृथोर्भावः टिलोपः रत्वंप्रथिमा अणिमा पार्थवम् मृदोर्भावः म्रदिमामार्दवं कृश

कर्म्मण्यपि ब्राह्मणस्य कर्म्म ब्राह्मण्यम् राज्यम् स्तैन्यम् लोहितादेर्डिमन् भावेवा लोहितिमा लोहितता लोहितत्वम् लौहित्य-
म् अणिमा लघिमा भावेऽणपि लाघवम् गौरवम् यौवनम् शैशवम् मौनम् हौत्रम् औद्गात्रम् महतोभावो महिमा ऋरइमनि ह्र
सादेर्लघोर्ऋकारस्यरेफो भवति इमनि इष्ठेयसोश्च पृथोर्भावः प्रथिमा म्रदिमा क्रशिमा द्रढिमा लघोः किम् कृष्णिमा ह्रसादेः कि
म् ऋजिमा बहोर्लोपोभूचबहोः बहोःपरेषामिमनादीनामिवर्णस्तस्यलोपो बहोर्भूरादेशश्च बहोर्भावो भूमास्तेनाद्योनलोपश्च
स्तेनस्य कर्म्मभावोवास्तेयम् समूहेऽर्थेऽपि मयूराणांसमूहो मायूरम् कौशिकम् क्षै त्रम् कैदारिकम् गाणिक्यम् तद्धि
तयस्वरयोः पुम्वत् ॥ ॥

स्यभावः क्रशिमा दृढस्य भावः द्रढिमा कृष्णस्य भावः कृष्णि
मा लघोरभावान्तरत्वं ऋजोर्भावः ऋजिमा ह्रसादित्वाभावान्तरत्वम् बहोर्लोपोभूचबहोः बहुरुदंतः शेषंसुगमं स्तेनाद्योनलोपश्चस्तेनशब्दाद्यप्रत्ययःस्या
द्भावेकर्मणिचार्थेनलोपश्चस्तेनचौर्येपचाद्यः स्तेयंचौर्येसमूहेऽर्थेपि समूहेऽर्थेपिअणादयःप्रत्ययाःस्युः मयूराणांसमूहः अण् मायूरंकाकानांसमूहः काकंक्षेत्रा
णांसमूहः क्षैत्रंकेदाराणां समूहः इकः णितोवेति णित्वाद्वृद्धिः कैदारिकंगणिकानांसमूहोयण् गाणिक्यं छ छ छ

हस्तिनां हस्तिनीनां वा समूहः इकः यस्य लोप इति लोपे नो वेति टिलोपः हास्तिकं गर्भिणीनां समूहो ऽण् यस्य लोप इति लोपः गार्भिणं नो वेति टिलोपाः भावो ऽग्रा माणां समूहः तः ग्रामता जनानां समूहो जनता बंधूनां समूहो बंधुता पाशानां समूहो यण् पाश्या वातानां समूहो वात्या खलानां समूहः खल्या णितो वेति न वृद्धिः ग वां समूहो गव्या वोः वृयस्वरे इत्य वृ वृद्धानां समूहः कः णितो वेति णित्वाद्वृद्धिः वार्द्धकं केदाराणां समूहो यण् कैदार्यं कवचिनां समूहः इकः कावचिकं ब्राह्मणानां सम् होयण् ब्राह्मण्यं वडवानां समूहो वाडव्यं माणवानां समूहो माणव्यं गजानां समूहः तः गजता सहायानां समूहः सहायता पर्श्वा ड्वण् पर्शुशब्दा तृड्वण् प्रत्ययः स्या त् समूहे डित्वाट्टिलोपः पर्शूनां समूहः पार्श्वम् सक्तूनां समूहः साक्तुकं धेनूनां समूहः धैनुकं रथानां समूहो यण् णितो वेति न वृद्धिः रथ्या खलगोरथेभ्य इनित्रक ट्याः खलादिभ्यः क्रमात् एते स्युः खलानां समूहः त्वण इतीप् खलिनी गवां समूहो गोत्रा रथानां समूहो रथकट्या हिते च अणादयः प्रत्यया हितेर्थे च स्युः सू

हास्तिकम् गार्भिणम् ग्रामता जनता बंधुता पाश्या वात्या खल्या गव्या वार्द्धकम् कैदार्य्यम् कावचिकम् ब्राह्मण्यम् वाडव्यम् मा णव्यम् गजता सहायता पर्श्वा ड्वण् पर्शूनां समूहः पार्श्वम् साक्तुकम् धैनुकम् रथ्या खलगोरथेभ्य इनित्रकट्याः खलिनी गोत्रा रथकट्या हिते च सूर्याय हितः सूरीयः आत्मनीनः विश्वजनीनः मातृभोगीणः अपूपाय हितो ऽपूपीयः अपूप्यः आ मिक्षीयम् शांकव्यम् गव्यम् हविष्यम् खल्यम् यव्यम् ॥ ॥ र्याय हित इति सूर्यागस्त्ययोरीये ईपि चेति यलोपः सूरीयः णीयः आत्मने हितः नो वेत्यस्य टिलोपो न आत्मनीनः ईनः विश्वजनाय हितः विश्वजनीनः कर्मधारयादेवेष्यते विश्वस्य जनः सर्वसाधारणो वेश्यादिरिति तत्पुरुषे विश्वो जनो ऽस्येति बहुव्रीहौ च विश्वजनाय हितं विश्वजनीयं णीय एवमातुर्भोगः शरीरं मातृभोगः मातृभोगाय हितः मातृभोगीणः णत्वं भोगः सुखे स्यादि भृता वहे स्वफणकाययोः इत्यमरेण यद्यप्यहेरित्युक्तं तथापि प्रयोगबाहुल्याभिप्रायं तच्छक्तिस्तु शरीरमात्रेप्यस्ति इत्याकरः अपूपेभ्यो हितं अपूप्यं चूर्णण्यः णितो वेति न वृद्धिः अपूपीयः णीयः आमिक्षायै हितं ण्य र्णीयो आमिक्ष्यं आमिक्षीयं हविः सान्नायमामिक्षा शृतोष्णक्षीर जं दधीति हेमः आमीयते क्षि प्यते दधि यत्र सा आमिक्षा शांकवे हितं शांकव्यं ण्यः णितो वेति न वृद्धिः वोः वित्यवृ गवे हितं गव्यं हविषे हितं हविष्यं खलाय हितं खल्यं यवेभ्यो हितं यव्यं ॥

श्वनोवसउर्वाचदीर्घः श्वन्शब्दस्य वकाराकारयोरुत्वंभवतिउतश्चवादीर्घः नोवेति टिलोपोनभवतिवाशब्दस्य व्यवस्थार्थत्वात् शून्य शुन्य ऊधसोनङ्
ऊधस् शब्दस्यनङादेशोभवति ङित्वादंतस्यस्थानेनङ् अकारउच्चारणार्थः ऊधसेहितः णितोवेतिनवृद्धिः ऊधन्यः अ जाऽविभ्यांथ्यः आभ्यांथ्यप्रत्ययः स्यात्त-
द्धितेर्थेअजेभ्योअजाभ्योवाहिताअजथ्याथ्यप्रत्ययस्यतरादौपाठात्पुंवद्भावेरूपम् तुल्यंअविभ्योहिताअविथ्यासर्वस्मैहितंसार्वंअण् सार्वीयंणीयः
वृद्धिः अस्त्यर्थेमतुः प्रथमांतान्नाम्नोमतुप्रत्ययोभवतिअस्यास्तीत्यर्थेअस्मिन्नस्तीत्यर्थेचउदित्वात्पुंसिश्रितोनुमितिनुम् स्त्रियांचास्थित इतीप् ङीबेशौनुमभू
मनिंदाप्रशंसासुनित्ययोगेऽतिशायिनि संबंधेऽस्तिविवक्षायांभवंतिमत्विनादयः १ अस्तीत्यस्यविवक्षायांयेमत्वादयः प्रत्ययाविधीयंतेतेभूमादिषुविषयेषुभ
वंतिभूमाबहुत्वम् यथागावोऽस्यास्मिन्वासंतिसगोमान् निंदायांयथाककुदावर्तिनीकन्याप्रशंसायांयथारूपवान् नित्ययोगेयथाक्षीरिणः वृक्षाः अतिशायि नि यथा उदरिणी कन्या

श्वनोवसउर्वाचदीर्घः श्वनेहितंश्वन्यं शुन्यम् ऊधसोनङ् ऊधन्यः अजाविभ्यांथ्यः अजथ्या अविथ्या अस्त्यर्थेमतुः नाम्नः गावोऽस्या
स्मिन्वासन्तिगोमान् श्रीर्विद्यतेऽस्यश्रीमान् विदुष्मान् गोमती अइकौचमत्वर्थेनाम्नो इकस्त्वदन्तात् अर्शसः वैजयन्तः दण्डिकः ध
निकः मान्तोपधाद्वत्विनौ मान्तान्मान्तोपधादवर्णांतादवर्णोपधाच्चवतुरिनस्त्वदन्तात् किम्वान् लक्ष्मीवान् धनवान् यथाउदरिणीकन्या

संबंधः संसर्गः संयोगइतियावत् तत्रयथादंडीपुरुषः श्रीरस्तिअस्यास्मिन्वाश्रीमान् विद्वांसोऽस्यास्मिन्वासंतिवसोर्वउरित्युत्वेषत्वं विदुष्मान् देशः स्थितइतीप् गोम
तीअइकौचमत्वर्थेप्रत्ययभ्रमानिरासायसंधिस्त्रनकृतः अइकाविति निर्देशेनसमासेसंहितायांअनित्यत्वंज्ञापितम् तेनपदांतानां समानानामृतीत्यनेनससत्र्क
पीणामित्यत्रवासंहिताभवंतिअर्शोऽस्यास्मिन्वास्तिअर्शसः वैजयंतीपताकास्यास्मिन्वास्तिवैजयंतः अः इकप्रत्ययस्तुअकारांतादेवदण्डोऽस्यास्मिन्वास्ति
दंडिकः धनमस्याऽस्मिन्वास्तिधनिकः इकः मान्तोपधाद्वत्विनौ मश्चअश्चमौ अन्तश्चउपधाचअन्तोपधे मौअन्तोपधेयस्यतत् मान्तोपधंतस्मान्मान्तोपधात् प्रथमा
द्वत्विनौप्रत्ययौभवतः अस्त्यर्थेइन्प्रत्ययस्तुअकारान्तादेवमतोरपवादोयंविधिः यथासंख्यंतुनगुरुकरणात् तथाहिम् अंतेयस्यतन्मंतंअउपधायस्यतत् ओपधं
मंतंचओपधंचंअनयोःसमाहारोमांतोपधंतस्मान्मांतोपधात् इहं हिस्पष्टंयथासंख्यंलभ्यतेतदऽकरणाद्यथासंख्याऽभावः वतोरुकारोश्रितोनुमितिनुमर्थः श्वि
तइतीबर्थश्च किमस्यास्मिन्वास्तिकिंलक्ष्मीवान् लक्ष्मीरस्यास्मिन्वास्ति लक्ष्मीवान् धनमस्यास्मिन्वास्तिधनवान् ॥ ॥

विद्याऽस्यास्मिन्वास्ति विद्यावान् यशोस्यास्ति यस्मिन्वास्ति यशस्वान् भाः अस्यास्मिन्वास्ति भास्वान् क्षत्रमस्याऽस्मिन् वास्ति क्षत्री दंडोऽस्याऽस्मिन्वास्ति द-
ण्डी यवादेर्नं यवादेर्गणान्मतुरे वस्यात् वत्विनोनयवाअस्यास्मिन् वासंति यवमान् भूमिरस्यास्मिन्वास्ति भूमिमान तडिदादिभ्यश्च एभ्यो वतइकइनुप्रत्ययाः
स्युः अस्त्यर्थे तडिदस्यास्मिन्वास्तिर्तडिलान् विद्युदस्यास्मिन्वास्ति विद्युत्वान् मायास्यास्मिन्वास्ति मायीइन् मायिकः व्रीहयोऽस्यास्मिन्वासंति व्रीहिइत् व्रीहिकः इकः लोम पामपिच्छा
दिभ्यः शनेलाः लोमादिभ्यः शः पामादिभ्योनः पिच्छादिभ्य इलः स्यादस्त्यर्थे लोमान्यस्यास्मिन्वासंति लोमशः लोमवान् वतुः गिरिरस्याऽस्मिन्वास्ति गिरिशः
पामास्यास्मिन्वास्ति पामनः नाम्नोनोलोपश्शधाविति नलोपः शाकीपललीदर्द्रूणां ह्रस्वत्वं च नप्रत्यये एषां ह्रस्वः महच्छाकमिति शाकी ईप्रतद्वत् शाकिनमहत्स

विद्यावान् यशस्वान् भास्वान् क्षत्री दण्डी यवादेर्न यवमान् भूमिमान् तडिदादिभ्यश्च तडित्वान् विद्युत्वान् मायी व्रीही मायिकः
लोमपामपिच्छादिभ्यश्शनेलाः लोमशः गिरिशः पामनः दर्द्रुणः अङ्गना लक्ष्म्या अश्च लक्ष्मणः विष्वगित्युत्तरपदलोपश्चाकृत
सन्धेः विषुणः पिच्छिलः तुन्दिलः फेनिलः ॥ ॥

लालं पलाली तद्वत् पलालिनं दर्द्रूस्त्वग्रोगविशेषः दर्द्रूर
स्याऽस्मिन्वास्ति दर्द्रुणः नत्वं अंगमस्या अस्यां वास्ति अङ्गना लक्ष्मीरस्यास्मिन्वास्ति लक्ष्म्या अश्च लक्ष्मीशब्दस्याऽकारान्तादेशः स्यान्नप्रत्यये लक्ष्मणः णत्वं विषु
साम्येऽव्ययं विषु अंचतीति विष्वक् विष्वगस्यास्मिन्वास्ति विष्व गित्युत्तरपदलोपश्चाकृतसंधेः विषक् शब्दस्योत्तरपदस्य लोपः स्यात् संधावकृते सति नप्रत्यये
विषुणः विषुवदाख्यः कालः समरात्रिंदिवे काले विषुवद्विषुवं च तदित्यमरः पिच्छं चिक्कणमस्याऽस्मिन्वास्ति पिच्छिलः तुन्दमस्याऽस्मिन्वा तुंदिलः फेनमस्याऽ
स्मिन्वा फेनिलः उरसिलः उरस्वान् पिच्छवान् ७ ७ ७ ७ ७

सिध्मादेर्लः सिध्मादेर्गणाल्लप्रत्ययः स्यादस्त्यर्थे पक्षे मतुः सिध्मवान् दन्तबललल्लाटवत्स अंसफेनधमनिक्षुद्रजंतुउपतापगडुमणिविजयनिष्पाठपांशुहनुपार्ष्णिचूडासिध्मादयः पार्ष्णिधमन्योर्दीर्घश्च पार्ष्णीलः धमनीलः क्षुद्रजंतुर्यथा यूकालः मक्षिकालः उपतापो रोगः विपादिकाऽस्यास्तिविपादिकालः पादस्फोटो विपादिकेत्यमरः सिध्ममस्यास्मिन्वास्तिसिध्मलः चूडाऽस्याऽस्मिन्वास्तिचूडालः वातदंतबलललाटानामूङ्च वातुलः वातूलः इत्यादि कुमुदनडवेतसेभ्यो ड्मतुः एभ्यो ड्मतुप्रत्ययः स्यादस्त्यर्थे डित्वाट्टिलोपः कुमुदान्यऽस्यास्मिन्वासन्तिकुमुद्वान् नडाअस्याऽस्मिन्वासंतिनड्वान् वेतसा अस्यास्मिन्वासंतिवेतस्वान् महिषाड्मतुः महिषशब्दात् ड्मतुः स्यादस्त्यर्थे महिषाअस्या स्मिन्वासंतिमहिष्मान् टिलोपः नडशादाद्ड्वलः आभ्यां ड्वलप्रत्ययः स्यादस्त्यर्थे नडाअस्याऽस्मिन्वासन्ति नड्वलः डित्वाट्टिलोपः शादोऽस्याऽस्मिन्वास्तिशाद्वलः शादो जंबालघासयोरित्यमरः शिखायावलः शिखाशब्दाद्वलप्रत्ययः स्यादस्त्यर्थे शिखाऽस्याऽस्मिन्वास्ति

सिध्मादेर्लः सिध्मलः चूडालः कुमुदनडवेतसेभ्यो ड्मतुः कुमुद्वान् नड्वान् वेतस्वान् महिषाड्मतुः महिष्मान् देशः नडशादाद्ड्वलः शिखायावलः शिखावलः नडादीनामीये कुक् नडकीयम् क्रुञ्चा ह्रस्वत्वञ्च क्रुञ्चकीयम् शृङ्ग वृन्दाभ्यामारकः शृङ्गारकः वृन्दारकः फलबर्हाभ्यामिनः फलिनः बर्हिणः मलादिनः मलिनः ईमसश्च मलीमसः हृदयादालुः हृदयालुः शीतोष्णातृप्रेभ्यस्तदसहने शीतन्नसहते शीतालुः उष्णालुः॥ ॥ शिखावलः नडादीनामीये कुक् नडादीनां कुगागमो भवति णीयप्रत्यये नडप्लक्षबिल्ववेत्रवेतसक्रुंचातक्षन् नडादयः नडाअस्याऽस्मिन्वासंतिनडकीयम् क्रुंचा ह्रस्वत्वंच क्रुंचाशब्दस्य ह्रस्वो भवति णीये क्रुंचाऽस्याऽस्मिन्वास्तिक्रुंचकीयम् एवं तक्षकीयम् निपातनान्नलोपः बिल्वकीयम् वेत्रकीयम् शृंगवृंदाभ्यामारकः आभ्यामारकप्रत्ययः स्यादस्त्यर्थे शृंगमस्याऽस्मिन्वास्तिशृंगारकः शृंगं प्रधानसान्वोश्चेत्यमरः वृंदमस्याऽस्मिन्वास्ति वृंदारकः वृंदारकौ रूपिमुख्यावित्यमरः फलबर्हाभ्यामिनः आभ्यामिनप्रत्ययः स्यादस्त्यर्थे फलमस्यास्मिन्वास्तिफलिनः बर्हमस्याऽस्मिन्वास्ति बर्हिणः णत्वं हृदयादालुः हृदयशब्दादालुः प्रत्ययः स्यादस्त्यर्थे हृदयमस्याऽस्मिन्वास्तिहृदयालुः पक्षे हृदयी हृदयिकः हृदयवान् शीतोष्णतृप्रेभ्यस्तदसहने एभ्यः आलुप्रत्ययः स्यात् प्रकृत्यर्थाऽसहनेऽर्थे शीतंनसहते स शीतालुः उष्णंनसहते उष्णालुः ११०

तृप्रंदुः स्वं नसहतेतृप्रालुः तृप्रः पुरोडाशः तृप्रंदुः स्वमित्यर्थः हिमादेलुः हिमशब्दादेलुप्रत्ययः स्यात्तदसहनेऽर्थेबलादूलः बलशब्दादूलप्रत्ययः स्यात्तदसहने
ऽर्थेवातात्समूहेचवातशब्दादूलप्रत्ययः स्यात्तदसहनेऽर्थेसमूहेऽर्थेचबलूलवातूलशब्दावस्त्यर्थेचव्युत्पादितौतः पर्वमरुद्भ्यांआभ्यांतः प्रत्ययोऽस्त्यर्थेपर्वा
ऽस्याऽस्मिन्वास्तिनाम्न इतिनलोपः पर्वतः मरुदस्यास्मिन्वास्तिमरुतः ऊर्णाहंशुभंभ्यायुः एभ्योयुः प्रत्ययः स्यादस्त्यर्थेऊर्णाऽस्यास्मिन् वाऽस्तिऊर्णायुः अत्रनिपा
तनाद्यस्येत्यालोपोनअहमितिमांतमव्ययमहंकारेशुभमितिचशुभेअहंयुरहंकारवान्शुभंयुः शुभान्वितः स्वादामिन्नैश्वर्येऐश्वर्येस्वशब्दादामिन्प्रत्ययः स्या
स्यर्थेईशितेर्हिईश्वरस्तस्यभावऐश्वर्यंऐश्वर्येकिंस्ववान्स्वंद्रव्यमस्यास्मिन्वाऽस्तिवातातीसारपिशाचानामिनिः कुकुच एभ्यइनिः प्रत्ययः स्यादस्त्यर्थेइकारउच्चारणार्थः
एषांकुगागमश्चइनिप्रत्ययेवातोऽस्यास्मिन्वास्तिवातकीवातकीवातरोगीस्यादित्यमरः अतीसारोऽस्यास्मिन्वास्तिअतीसारकोरोगेचायमिनिरिष्यतेनेहवातवती

तृप्रंदुः स्वन्नसहते तृप्रालुः हिमादेलुः हिमन्नसहते हिमेलुः बलादूलः बलन्नसहतेबलूलः वातात्समूहेचवातन्नसहतेनतस्यसमू
होवावातूलः तः पर्वमरुद्भ्याम् पर्वतः मरुतः ऊर्णाहंशुभंभ्योयुः ऊर्णायुः अहंयुः शुभंयुः स्वादामिन्नैश्वर्येस्वमैश्वर्यमस्यास्मिन्वा
स्तिस्वामीवातातीसारपिशाचानामिनिः कुकुचवातकी अतीसारकी पिशाचकी ज्योत्स्नादिभ्योऽण्ज्यौत्स्नः तामिस्रः तापसः सैकतः
शार्करः ॥ गुहापिशाचोऽस्याऽस्मिन्वास्तिपिशाचकीज्योत्स्नादिभ्योऽण्ज्योत्स्नादिभ्योऽण्स्यादस्त्यर्थेकिंचज्योत्स्नातमिस्राशृंगिणोर्ज्जस्विनूर्ज्जस्वलगो
मिन्मलिनमलीमसाअस्त्यर्थेनिपात्यंतेज्योतिरस्याअस्यांवास्तिज्योत्स्नाचंद्रप्रभाज्योतिष्शब्दस्यनिपातनादुपधालोपोनप्रत्ययश्चतमोऽस्याऽस्मिन्वातमिस्रं
तमस्शब्दस्योपधायाइत्वंरप्रत्ययश्चशृंगमस्याऽस्मिन्वास्तिशृंगिणः अत्रइनप्रत्ययोनिपातनात्ऊर्ज्जोऽस्याऽस्मिन्वास्तिऊर्ज्जस्वीऊर्ज्जस्वलः विन्वलप्रत्ययौ
निपातनात्गौरस्याऽस्मिन्वास्तिगोमीमिन्प्रत्ययोनिपातनात्मलोऽस्याऽस्मिन्वास्तिमलिनः मलीमसः मलशब्दादिनेमसप्रत्ययौनिपातनादितिज्योत्स्नास्यास्मिन्वा
स्तीत्यणिज्यौत्स्नः शुक्लपक्षः तमिस्रमस्याऽस्मिन्वास्तितामिस्रः कृष्णपक्षोनरकविशेषश्चतमिस्रातामसीरात्रिज्यौत्स्नीचंद्रिकयान्वितेत्यमरोक्तौतुतमिस्रेत्येतदादं
तंनत्वणंतमितिनविरोधः तपोऽस्याऽस्मिन्वास्तितापसः विन्प्रत्ययोपितपस्वीसिकताऽस्याऽस्मिन्वास्तिसैकतः इलप्रत्ययेसिकतिलः वतौतुसिकतावान्शर्कराऽस्याऽ

स्मिन्वास्तिशार्करः अण्शार्करिलः शर्करावान्वतुपक्षेप्रत्ययलुक्चभवतिसिकताशर्करास्त्रीशर्कराशर्करिलः शार्करः शर्करावतिदेशएवादिमामेवमुन्नेयाःसि
कतावतिइत्यमरः ऊषशुषिमुष्कमधुरवमुरवकुंजनगपांशुपांडुभ्योरः एभ्योरप्रत्ययःस्यादस्त्यर्थेऊषोऽस्यास्मिन्वास्तिऊषरःस्यादूषःक्षारमृत्तिकाऊषवानूषरःइत्य
मरः शुषिरस्यास्मिन्वास्तिशुषिरः शुषिच्छिद्रंवंशादिकंतुशुषिरमित्यमरःमुष्कोऽस्यास्मिन्वास्तिमुष्करःमुष्कोंडःमधुमाधुर्यमस्यास्मिन्वास्तिमधुरःरवमस्यास्मि-
न्वास्तिरवरःमहत्कंठविवरंरवंगर्द्दभेरूढोयंमुरवमस्यास्मिन्वास्तिमुरवरःवाचालकुंजोहस्तिहनुरस्यास्मिन्वास्तिकुंजरःनगावृक्षाःपर्वताश्चतेअस्यास्मिन्वासंति-
नगरंजानिशब्दोयंतेनस्त्रियांजातिलक्षणईप्नगरीपांशूरजोऽस्यास्मिन्वास्तिपांशुरःपांडुरस्याऽस्मिन्वास्तिपांडुरः हरिणःपांडुरःपाडुरित्यमरः कच्छ्वाह्रस्वत्वंचक

ऊषसुषिमुष्कमधुरवमुरवकुञ्जनगपांशुपाण्डुभ्योरः ऊषरः शुषिरंमुष्करः मधुरः रवरः मुरवरः कुञ्जरः नगरः पांशुरः पाण्डुरः क
च्छ्वाह्रस्वत्वञ्चकच्छुरः द्युद्रुभ्याम्मः द्युमः द्रुमः केशादिभ्योवः केशवः मणिवः हिरण्यवः अर्णसोलोपश्च अर्णवः रजःकृष्या
सुतिपरिषद्भ्योवलः रजस्वला कृष्यादीनांवलेदीर्घः कृषीवलः॥ ॥

च्छूशब्दाद्रः स्यादस्त्यर्थे कच्छू इत्यस्य ह्रस्वश्चक-
च्छुरस्याऽस्मिन्वास्तिकच्छुरःकच्छूरोगविशेषः द्युद्रुभ्यांमःआभ्यांमप्रत्ययःस्यादस्त्यर्थे द्यौरस्याऽस्मिन्वास्तिद्युमः दिवउरसेइत्युत्वंद्रुःशाखावृक्षश्चद्रुरस्याऽस्मि-
न्वास्तिद्रुमःपलाशीद्रुद्रुमागमाइत्यमरः केशादिभ्योवःएभ्योवःस्यादस्त्यर्थेकेशाअस्याऽस्मिन्वासंतिकेशवःकेशीइन्केशिकःइकःकेशवान्वतुःमणिरस्या
ऽस्मिन्वास्तिमणिवःनागविशेषःहिरण्यमस्याऽस्मिन्वास्तिहिरण्यवोनिधिविशेषःअर्णसोलोपश्चअर्णस्शब्दाद्वःस्यादस्त्यर्थेसस्यलोपश्चअर्णोजलंतद्वान-
र्णवःअर्णस्वान्वतुःरजःकृष्यासुतिपरिषद्भ्योवलःएभ्योवलप्रत्ययःस्यादस्त्यर्थेरजोऽस्याअस्यांवास्तिरजस्वलारजःस्त्रीकुसुमेऽपिचेत्यमरः कृष्यादीनांवलेदी-
र्घःवलप्रत्ययेसंज्ञायामेषांदीर्घःस्यात्कृषिरस्याऽस्मिन्वास्तिकृषीवलः ॥ ॥ ॥ ॥

आसुतिरभिषवः मद्यसंधानमासुनिरिति हैमः प्रुत्रभिषवे क्तिः आसुतिरस्याऽस्मिन्वास्ति आसुतीवलः शौंडिकः परितः सीदतीति परिषत् क्विप् पर्षदिति पाठांतरम् परिषदस्याऽस्मिन्वास्ति परिषद्वलः पर्षद्वलश्च पर्षद्वलान्महाब्रह्मैराटनैकटिकाश्रमानिति भट्टिः अन्येभ्योऽपि वलप्रत्ययः स्यादस्त्यर्थे भ्राताऽस्याऽस्मिन्वास्ति भ्रातृवलः पुत्रोऽस्याऽस्मिन्वास्ति पुत्रवलः संज्ञायामभावान्नेह दीर्घः दंता अस्याऽस्मिन्वा संतिदंतावलो हस्ती कृष्यादीनामिति दीर्घः तुंडिबलिवटे-र्भः एभ्यो भप्रत्ययः स्यादस्त्यर्थे वृद्धानाभिस्तुंडिः तुंडिरस्याऽस्मिन्वास्ति तुंडिभः बलिरस्याऽस्मिन्वास्ति बलिभः वटिरस्याऽस्मिन्वास्ति वटिभः वल्मीकगृहमित्यर्थः पामादित्वाद्बलिनोपि एतत्किमिदंयत्तद्भ्यः परिमाणे वतुः एभ्यो वतुप्रत्ययः स्यात्परिमाणेर्थे परिमाणमिह परिच्छेदकमात्रम् यत्तदेतदामावतौ वतुप्रत्ययेपरे एषामाकारांतादेशः स्यात् यत्परिमाणमस्य यावान् तत्परिमाणमस्य तावान् एतत्परिमाणमस्य एतावान् किमः किर्वतोर्वस्य यः किम्शब्दस्य किरादेशः स्यात् व

आसुतीवलः परिषद्वलः अन्येभ्योऽपि भ्रातृवलः पुत्रवलः दन्तावलः बंधुवलः तुंडिबलिवटेर्भः तुंडिभः बलिभः वटिभः एतत्किमिदंयत्तद्भ्यः परिमाणे वतुः यत्तदेतदामावतौ यावान् तावान् एतावान् किमः किर्वतोर्वस्य यः कियान् इदमइश्वतोर्वस्य यः इयान् श्रद्धादेर्लुः श्रद्धालुः कृपालुः दयालुः औन्नत्ये दन्तादुरः दन्तुरः अस्मायामेधास्रग्भ्यो विनिः तपस्वी ओजस्वी वर्चस्वी तेजस्वी वचस्वी मायावी मेधावी स्रग्वी ॥ ॥

तुप्रत्ययवस्य यकारश्च किंपरिमाणमस्य कियान् इदम इश्वतोर्वस्य यः इदम्शब्दाद्वतुः स्यात्परिमाणेर्थे इदम्स्थाने इशादेशश्च शित्वात्सर्वादेशः वतुप्रत्ययवस्य यकारश्च इदंपरिमाणमस्य स इयान् श्रद्धादेर्लुः लुप्रत्ययः स्यादस्त्यर्थे श्रद्धाऽस्यास्मिन्वास्ति श्रद्धालुः कृपाऽस्याऽस्मिन्वा कृपालुः दयाऽस्याऽस्मिन्वास्ति दयालुः स्पृहिगृहिपतिदयिनिद्रातंद्राश्रद्धाशीङ्भ्य इत्यालुप्रत्ययेनापीष्टसिद्धेरिदं सूत्रंचिंत्यम् औन्नत्ये दंतादुरः उन्नते वर्तमानाद्दन्तशब्दादुरप्रत्ययः स्यादस्त्यर्थे उन्नता दंताः संत्यस्य दन्तुरः औन्नत्ये किं दन्तवान् अस्मायामेधास्रग्भ्यो विनिः एभ्यो विनिः स्यादस्त्यर्थे पक्षे वतुरपि तपोऽस्यास्मिन्वास्ति तपस्वी ओजोऽस्याऽस्मिन्वास्ति ओजस्वी वर्चोऽस्यास्मिन्वास्ति वर्चस्वी तेजोस्यास्मिन्वास्ति तेजस्वी वचोऽस्याऽस्मिन्वास्ति वचस्वी मनोऽस्याऽस्मिन्वास्ति मनस्वी मायाऽस्याऽस्मिन्वास्ति

मायीमायिकः इनिकौमेधाऽस्याऽस्मिन्वास्तिमेधावीस्रग स्यास्मिन्वास्तीतिचोः कुरित्यनेनासिद्धेपरत्वात्प्राप्तंछशषेतिपत्वंनिराकृत्यदिशामितिकुत्वं स्रग्वीआमयस्यदीर्घश्चअस्मादपिविनुस्यादस्त्यर्थेविनुप्रत्ययेऽस्यदीर्घश्चआमयोऽस्याऽस्मिन्वास्तिआमयावीवाचोग्मिनिः वाचूशब्दात्ग्मिनुप्रत्ययः स्यादस्त्यर्थेवागस्याऽस्मिन्वास्तिचस्यकुत्वेझभेजबाइतिगत्वेवाग्मीगकारद्वयमस्तिआलाटौकुत्सितभाषिणिवाचूशब्दादेतौस्तः कुत्सितबहुभाषकेऽर्थे कुत्सितंबहुभाषतेवाचालःवाचाटःयस्तुसम्यग्बहुभाषतेसवाग्मीत्येवईषदसमाप्तौकल्पदेश्यदेशीयाः प्रथमान्तान्नाम्नःआख्यातांताच्चैतेस्युरीषदूनेर्थेईषदसमाप्तौयेप्रत्ययास्तेषामभिधेयवदेवलिंगवचनेस्तः तेनगुडकल्पाद्राक्षाशर्कराकल्पोगुडइतिईषदूनःसर्वज्ञः सर्वज्ञकल्पः ईषदूनःपटुःपटुदेश्यःईषदूनो

आमयस्यदीर्घश्च आमयावी वाचोग्मिनिः वाग्मी आलाटौकुत्सितभाषिणि वाचालः वाचाटः ईषदसमाप्तौकल्पदेश्यदेशीयाः ईषदपरिसमाप्तस्सर्वज्ञस्सर्वज्ञकल्पः पटुदेश्यः विद्वद्देशीयः पटुदेशीयः बहुर्वाउक्तार्थेसचप्रागेवईषदूनः पटुः बहुपटुः प्रकारेजातीयः पटुप्रकारः पटुजातीयः कुटीशमीशुण्डाभ्योरो ह्रस्वत्वे ह्रस्वाकुटीकुटीरः शमीरः शुण्डारः कुत्वाडुपः ह्रस्वाकुतूः कुतुपः कासूगोणीभ्यांष्टरः ह्रस्वाकासूः कासूतरीगोणीतरी ॥

विद्वान्वसांरसेइतिदत्वंविद्वद्देशीयः ईषदूनंपचतिपचतिकल्पंक्रियाप्रधानमाख्यातमितिक्रियायामौत्सर्गिकमेकवचनंक्लीबत्वंचबहुर्वाउक्तार्थेसचप्रागेवईषदसमाप्तिविशिष्टेर्थेप्रथमांतान्नाम्नोबहुप्रत्ययःस्यात् सच प्रकृतेःप्रागेवनतुपरतः लिंगसंख्येऽपिप्रकृतेरेवनतुताद्धिपर्ययःतेनबहुगुडाद्राक्षालघुबहुतृणंनरइत्यादौनविशेष्यनिघ्नताप्रकारेजातीयः प्रकारवतिजातीयप्रत्ययःस्यात्सामान्यस्यभेदकःप्रकारः कुटीशमीशुंडाभ्योरोह्रस्वत्वेएभ्योरःप्रत्ययोभवतिह्रस्वेऽर्थेह्रस्वाकुटीतिस्वार्थिकाःप्रकृतिलिंगमतिवर्तन्तेइतिपुल्लिंगतात्रकुटीरः ह्रस्वाशमीशमीरः ह्रस्वाशुंडाशुंडारः कुत्वाडुपः कुतुशब्दात्डुपप्रत्ययःस्यात् ह्रस्वेर्थेकुतूः कृत्तेःस्नेहपात्रं ह्रस्वासाकुतुपः कुमानित्यमरः कासूगोणीभ्यांष्टरः आभ्यांष्टरप्रत्ययःस्यात्ह्रस्वेषित्वात् ष्वितइतीप् ह्रस्वाकासूः कासूतरीकासूःआयुधविशेषः ह्रस्वागोणीगोणीतरी ६९

वत्सोक्षाश्वर्षभेभ्यस्तनुत्वे एभ्यः ष्टरः स्यात् तनोर्भावस्तनुत्वंन्यूनतासाचप्रवृत्तिनिमित्तस्यैवप्रत्यासत्तेः क्वचित्तुतत्सहचरितधर्मांतराणामपिन्यूनतातत्रवत्सः प्रथम
वयाः प्रथमवयसोन्यूनत्वंनाम वयोंतरप्राप्तिः उक्षातरुणवयाः तारुण्यस्यतनुत्वंतृतीयवयःप्राप्तिः अश्वायामश्वादुत्पन्नोऽश्वः अश्वत्वंचजातिः तत्सहचरितस्या
ऽश्वायामश्वादुत्पन्नत्वधर्मस्यन्यूनत्वमन्यपितृकतातथाचगर्दभेनाऽश्वायामुत्पादितोऽश्वतरः तरतमेतिपुंवद्भावः अश्वतरोभारस्यवोढाऋषभस्तस्यतनुत्वभारोद्वह
नेमंदशक्तिता तद्वांस्तुऋषभतरः प्रवृत्तिनिमित्ततनुत्वेस्वायंदेवतां तान्तादर्थ्येयः तदर्थएवतादर्थ्यंस्वार्थेष्यः अग्निश्चासौदेवताचअग्निदेवतातस्यैपादार्घाभ्यांच
आभ्यांयः स्यात्तादर्थ्येपाद्यंपादायवारिणीत्यमरः मूल्येपूजाविधौचार्घइत्यमरः अर्घार्थमुदकमर्घ्यंनवस्यनूआदेशस्त्नतनईनाः प्रत्ययाः स्वार्थेनवशब्दात्स्वार्थेए-

वत्सोक्षाश्वर्षभेभ्यस्तनुत्वे तनुर्वत्सः वत्सतरः उक्षतरः अश्वतरीऋषभतरः देवतान्तात्तादर्थ्येयः अग्निदेवतायैइदमग्निदेवत्य
म् पादार्घाभ्यांच्चपादार्थमुदकम्पाद्यम् अर्घ्यम् नवस्यनूआदेशस्त्नतनईनाः प्रत्ययाः स्वार्थेनूत्नम् नूतनम् नवीनम् पुराणेप्रान्न-
श्च प्रणम् प्रत्नम् प्रतनम् प्रीणम् अतिथेर्न्यः अतिथयइदमातिथ्यम् प्रशंसायांरूपः प्रशस्तोवैयाकरणोवैयाकरणरूपः कुत्साया
म्पाशः कुत्सितोभिषक् भिषक्पाशः भूतपूर्वेचरट् पूर्वन्दृष्टो दृष्टचरः दृष्टचरी आढ्यचरी षष्ठ्यारूप्यच्च प्राचुर्यविकारप्राधान्यादिषु
मयट् अन्नंप्रचुरमत्रान्नमयोयज्ञः मृन्मयोघटः स्त्रीमयोजाल्मः अमृतंस्वरूपमस्यामृतमयश्चन्द्रः आम्रस्य विकारोऽवयवो वा
आम्रमयम् शरमयम् गोः पुरीषेगोमयम् ॥ तेस्युर्नवस्थाने नूश्चवोअव् यस्वरे इत्यव् नवीनंपुराणेप्रान्नश्चप्रात्पुराणेऽर्थेनप्रत्ययः स्यात् चाद्युक्ताः त्नत
नईनाः अतिथेर्न्यः अतिथिशब्दात्तादर्थ्येन्यः स्यात् प्रशंसायांरूपः प्रथमान्तान्नाम्नः आख्यातांताच्चरूपप्रत्ययः स्यात्प्रशंसायामर्थेप्रकृत्यर्थस्यापरिपूर्णतेहप्रशंसानतु
स्तुतिः तेनेहापिरूपप्रत्ययः चोररूपोयंयदक्ष्णोरप्यंजनंहरतिगुप्तवस्तुनोऽपहरणेनचौर्यंपरिपूर्यतेप्रशस्तंपचतिपचतिरूपम् कुत्सायांपाशः प्रथमांतान्नाम्नः पाश-
प्रत्ययः स्यात् कुत्सायामर्थेभूतपूर्वेचरट् पूर्वंभूतोभूतपूर्वस्तत्रवर्तमानात्प्रथमांताच्चरट्स्यात् टित्वादीप् भूतपूर्वाऽऽढ्याआढ्यचरीतरतमचरडितिपुंवत् षष्ठ्यारू
॥

यच्चपद्धं ताद्भूत

पूर्व्वेऽर्थेरूप्यप्रत्ययो वापक्षेचरट् कृष्णास्यभूतपूर्वोगौः कृष्णारूप्यः कृष्णाचरः प्राचुर्यविकारप्राधान्यादिषु मयट् नाम्न एष्वर्थेषु मयट् स्यात् प्राचुर्य्ये अन्नमयो
यज्ञः विशेष्यनिघ्नतात्र विकारे मृदो विकारो मृण्मयः मयट् प्रत्ययः अमेजवस्या पीतिनः प्राधान्येस्त्री प्रधानमस्यस्त्रीमयः आदिशब्दादन्येष्वप्यर्थेषु मयट् यथा
अमृतमयोऽस्वरूपे मयट् आम्रमयमत्र विकारावयवयोर्मयट् शराणां विकारोवयवो वा शरमयं गोः पुरीषे गोशब्दान्मयट् स्यात् पुरीषेऽर्थे गोः पुरीषं गोमयं पु
रीषे किं गव्यं पयसोण्यः नसंधिय्वोर्युट् च संधानं संधिः नङ्कीति किं प्रत्ययः संधौजातौ संधिजौ य्च व् च य्वौ संधिजौ च तौ य्वौ च संधिय्वौ शाकपार्थिवादित्वान्म
ध्यमपदलोपः माधवस्तु संधेर्य्वावितिषष्ठीतत्पुरुषमाह इश्च उश्च ऐनयोः समाहारोयुयुसहितः इयुट् द्वंद्वांते श्रूयमाणत्वात् टकारः प्रत्येकं संबध्यते इट् उट् इत्यर्थः वै

नसन्धिय्वोर्युट् न संधिजयोर्यकारवकारयोस्सम्बन्धिनस्स्वरस्य न वृद्धिः किन्तु तयोर्युडागमो यस्येट् वस्योट् पश्चाद्वृद्धिः व्या
करणमधीते वेद वा वैयाकरणः स्वश्वं वेद सौवश्वः व्यासस्यापत्यं वैयासकिः द्वारादीनाञ्च द्वारादीनां सम्बन्धिनः स्वरस्य न वृद्धिः
किन्तु तयोर्युडागमः द्वारे नियुक्तो दौवारिकः व्यल्कसस्येदं वैयल्कसम् सौवरम् शौवरम् सौवग्रामिकः नैयग्रोधम् सौवादुमृद
वम् शौवस्तिकम् इतोजातार्थे लज्जा जातास्य लज्जितः फलितः तारकितः॥ ॥

या करणः अण् इट् वृद्धिः सुश्रुअश्वः स्वश्वः स्वश्वं वेत्ती
ति सौवश्वः अण् उट् वृद्धी वैयासकिः अपत्ये इञ् सु धातृव्यासेत्यक ङ् इट् वृद्धी द्वारादीनां च द्वारादीनामसंधिजयोर्यकारवकारयोरपि युट् स्यात् पश्चाद्वृद्धिश्च यस्य इ
ट् वस्य उट् इत्यर्थः दौवारिकः नियुक्ते ऽर्थे इक उट् वृद्धी वैयल्कसं इदमर्थेऽण् इट् वृद्धी स्वरस्येदं सौवरं उट् वृद्धि स्वग्रामे भवः सौवग्रामिकः इकः उट् वृद्धी न्यग्रोधस्येदं नैय
ग्रोधं अण् इट् वृद्धी स्वादु च तत् मृदु च स्वादुमृदु स्वादुमृदु न इदं सौवादुमृदवं अण् वोः व्यस्वरे इत्यवृ उट् वृद्धी श्वो भवं शौवस्तिकं तिकण् उट् वृद्धी श्वापदस्येदं निपा
तनात्पूर्वपदस्य दीर्घः अण् वा उट् वृद्धी श्वापदं शौवापदं इतो जातार्थे प्रथमान्तान्नाम्नोऽस्य जातमित्यर्थे इतः प्रत्ययः स्यात् यस्य लोप इत्यालोपः लज्जितः फलानि ११३
जातान्यस्य फलितः त्रपा जाताऽस्य त्रपितः तारका जाता अस्य तारकितं नभः एवं पुष्पितं पुलकितं रोमांचितं छ छ छ

तरतमेयस्विष्ठाः प्रकर्षे तरश्च तमश्च ईयसुश्च इष्ठश्च तेतरतमेयस्विष्ठाः प्रकर्षइति प्रकृत्यर्थे विशेषणम् प्रकर्षणं प्रकर्षश्च नाधिक्यं किंत्वऽभिभवोमतः यद्यपिकृषिः केवलो विलेखने तथापिप्रपूर्वोऽभिभवेर्थे यद्यपि द्रव्यस्यस्वतः प्रकर्षोनतथापि गुण प्रकर्षात् प्रकर्षोभवति उक्तंच द्रव्यस्याव्यपदेशस्य य उपादीयतेगुणः भेदको व्यप देशाय तत्प्रकर्षोभिधीयते १ धर्मयोगं विनाव्यपदेष्टुमशक्यस्य द्रव्यस्य व्यपदेशाययो भेदको गुणउपादीयते प्रत्ययेन तस्य प्रकर्षोभिधीयते गुणक्रिया जाति संज्ञाभेदेन चतुष्टयीशब्दानांप्रवृत्तिः तत्रगुणक्रिययोः प्रवृत्ति निमित्तयोस्तत्प्रकर्षे प्रत्ययः जातिशब्देभ्यस्तुजातेः सर्वत्रैकरूपत्वेन प्रकर्षाऽभावात्तत्सहचरितायैवाहदोहावयोधर्मास्तत्प्रकर्षेप्रत्ययः संज्ञाशब्देषु प्रकर्षो नास्ति शब्दस्वरूपस्यैवप्रवृत्तिनिमित्तत्वात् तस्यच सर्वत्र तुल्यत्वात् गुणशब्दो यथा यस्यसामान्यतः श्वेतोगुणः सशुक्लः यस्यतदपेक्षयाधिकः सशुक्लतरः यस्यताभ्यामत्यधिकः सशुक्लतमः यः किंचिज्जानातिसपटुः

तरतमेयस्विष्ठाः प्रकर्षे अतिशयेन शुक्लः शुक्लतरः शुक्लतमः ईयस्विष्ठौडितौ अतिशयेनलघुर्लघीयान् लघिष्ठः गुर्वादेरिष्ठेमेयस्सुगरादिश्चयत्लोपश्च गुरोर्भावोगरिमा अतिशयेन गुरुर्गरिष्ठः गरीयान् प्रियस्यभावः प्रेमा अतिशयेन प्रियः प्रेष्ठः प्रेयान् अतिशयेन स्थूलस्स्थविष्ठः स्थवीयान् अतिशयेन प्रशस्यः श्रेष्ठः श्रेयान् दीर्घः द्राघिष्ठः द्राघीयान् स्थिरः स्थेष्ठः स्थेयान् स्फिरः स्फेष्ठः स्फेयान् उरुः वरिष्ठः वरीयान् बहुलः बंहिष्ठः बंहीयान् वृद्धः वर्षिष्ठः वर्षीयान् ॥ ॥

ततोऽधिकं जानाति स पटुतरः ततोप्यधिकं सपटुतमः क्रियाशब्दो यथायो विलंबेन पचतिसपाचकः यस्तुततः किंचिच्छीघ्रं पचति स पाचकतरः यस्त्वति शीघ्रं पचतिस पाचक तमः जातिशब्दो यथा गौरयं हलं वहतिगोतरोयं हलं शकटंच वहति गोतमोयं तौ गोणींच वहति इष्ठेयसुप्रत्ययौ गुणवचनादेव संख्या परिमाण प्रमाणोन्मानवाचिभ्यो न तरादयः संख्या एकादिः परिमाणं कुडवद्रोणादि प्रमाणहस्तवितस्त्यादि उन्मानं तुलादि उक्तंच ऊर्ध्वमानंकिलोन्मानं परिमाणं तु सर्वतः आयामस्तु प्रमाणं स्यात्संख्या बाह्यातुसर्वतः ईयस्विष्ठौडितौ एतौ डित्संज्ञकौस्तः अतिशयेनलघुईयसुटिलोपेउदित्वान्नुम् न्सम्महतइतिदीर्घः सिलोपसंयोगांतलोपौलघीयान् लघिष्ठः इष्ठः गुर्वादेरिष्ठेमेयस्सुगरादिश्चयत्लोपश्चगुरु १ प्रिय २ स्थूल ३ प्रशस्य ४ दीर्घ ५ स्थिर ६ स्फिर ७ गुरु ८ बहुल ९ वृद्ध १० ॥ ॥

तृप्र११ वृंदारक१२ दूर१३ युवन् १४ अल्प १५ ह्रस्व १६ क्षिप्र १७ क्षुद्र १८ अंतिक १९ बाढ२० गुर्वादयः गररांतः प्र अदंतः स्थो ओदन्तः श्र अदंतः द्राघ अदंतः स्थ अदंतः स्फ अदंतः वर् रान्तः बंहः अदन्तः वर्षि ष्यंतः त्रप् पांतः वृंद अदन्तः दो ओदन्तः यो ओदंतः अल्पपांतः ह्रस् सांतः क्षेपि पांतः क्षोदि दांतः नेद अदंतः साध अदंतः एते गरादयः एषामेकस्वराणां टिलोपो यस्य लोप इत्यलोपश्च न हि स्वराणां तु यस्यलोपो इत्यलोपो भवत्येव गरिमा इमन् गरिष्ठः इष्ठः गरीयान् इयसुः स्त्रियां तु उगित इतीप् गरीयसी प्रेमा ईमन् प्रेष्ठः इष्ठः प्रेयान् ईयसुः स्थविष्ठः इष्ठः स्थवीयान् ईयसुः श्रेष्ठः इष्ठः श्रेयान् ईयसुः द्राघिष्ठः यस्यलोप इत्यलोपः इष्ठः द्राघीयान् ईयसुः स्थेष्ठः इष्ठः स्थीयान् ईयसुः अतिशयेन स्फिरः स्फूर्यद्दक्षं उरुस्फिरमितिहैमः स्फेष्ठः इष्ठः स्फेयान् ईयसुः अतिशयेन उरुः वरिष्ठः इष्ठः वरीयान् ईयसुः अतिशयेन बहुलः यस्येत्यलोपः बंहिष्ठः इष्ठः बंहीयान् ईयसुः अतिशयेन वृद्धः वर्षिष्ठः वर्षीयान् ईयसुः अति-

तृप्रः त्रपिष्ठः त्रपीयान् वृन्दारकः वृन्दिष्ठः वृन्दीयान् दूरः दविष्ठः दवीयान् युवा यविष्ठः युवाल्पयोः कन् वा कवीयान् कनिष्ठः कनीयान् अल्पिष्ठः अल्पीयान् कनिष्ठः कनीयान् ह्रस्वः ह्रसिष्ठः ह्रसीयान् क्षिप्रः क्षेपिष्ठः क्षेपीयान् क्षुद्रः क्षोदिष्ठः क्षोदीयान् अन्तिकः नेदिष्ठः नेदीयान् बाढः साधिष्ठः साधीयान् वृद्ध प्रशस्ययोर्वा ॥

तिशयेन तृप्रः पुरोडाशः तृप्रं दुःखं त्र-
पिष्ठः इष्ठः त्रपीयान् ईयसुः अतिशयेन वृन्दारकः वृंदारकौ रूपि मुख्या वित्यमरः यस्येत्यलोपः बंहिष्ठः इष्ठः बंहीयान् ईयसुः अतिशयेन दूरः दविष्ठः इष्ठः दवीयान् ईयसुः अतिशयेन युवा यविष्ठः इष्ठः यवीयान् ईयसुः युवाल्पयोः कन् वा एतयोः कनादेशो वा स्यात् इष्ठेयस्वोः परतः कनिष्ठः इष्ठः कनीयान् ईयसुः अतिशयेनाल्पः अल्पिष्ठः इष्ठः अल्पीयान् ईयसुः कनीष्ठः कनीयान् अतिशयेन ह्रस्वः ह्रसिष्ठः इष्ठः ह्रसीयान् ईयसुः अतिशयेन क्षिप्रः क्षेपिष्ठः इष्ठः क्षेपीयान् ईयसुः अतिशयेन क्षुद्रः क्षोदिष्ठः इष्ठः क्षोदीयान् ईयसुः अतिशयेनांतिकः यस्येत्यलोपः नेदिष्ठः इष्ठः नेदीयान् ईयसुः अतिशयेन बाढः यस्येत्यलोपः साधिष्ठः इष्ठः साधीयान् ईयसुः वृद्ध प्रशस्ययोर्वा ज्यास्या दिष्ठे यस्वोः परतः ॥ ॥ ॥

मातुलोपाध्यायाभ्यांवा आन्यामानीप् वास्यात् पक्षेपुंयोगे चेतीप् मातुरूमीता मातुलस्तस्य स्त्रीमातुलानी मातुली उपाध्यायस्य स्त्रीउपाध्यायानी उपाध्यायी अर्यक्षत्रियाभ्यांवास्वार्थे आभ्यांस्वार्थेआनीप्वास्यात् पक्षेआप् अर्याणीअर्यास्वामिनी वैश्यावेत्यर्थः अर्यःस्वामिवैश्ययोरित्यर्थ-द्वये ऽपि निपातनात् क्षत्रिया णी क्षत्रियाक्षत्रियजातीयास्त्रीत्यर्थः पुंयोगे तुअर्यीक्षत्रियीया तुस्वयमेवाध्यापिका तत्रवाईप्वाच्यः पक्षेआप्उपाध्यायीउपाध्यायाउपेत्यस्याअधीयतेइत्यपादानेस्त्रियांघञ्उपाध्यायान्युपाध्यायीत्यमरः पुंयोगेनइहपुमितिषष्ठ्यंतंसांकेतिकंपृथक्पदं तच्चावर्त्यते द्विरुच्चारणमावृत्तिः पुंसः पुंसइतियोगेइतिभावेनिमित्तेवासप्तमीअधिकारान्नामेतिलभ्यतेयत् पुंसोनामपुंवाचकशब्दोऽदंतः पुंसोयोगे स्त्रियां वर्त्ततेतत्

मातुलोपाध्यायाभ्यांवा मातुलानी मातुली उपाध्यायानी उपाध्यायी अर्य्यक्षत्रियोपाध्यायेभ्योवास्वार्थे अर्य्याणी अर्य्याक्षत्रियाणी क्षत्रियाउपाध्यायानी उपाध्याया पुंयोगेच अदंतात्स्त्रियामीप् शूद्री गणकी पालकान्तान्न गोपालिकाअश्वपालिका सूर्याद्देवतायांचाप् सूर्यस्यस्त्रीदेवता सूर्या अन्यासूरी ॥ ॥

ई स्या तु योगः संबं-धः सचेह दंपतिरूप एवेतिनाग्रहः किंतुजन्यजनकभावोपिगृह्यते तेन केकयस्य क्षत्रियस्य पुत्रीकेकयीत्यादि सिद्धं तथाचभट्टिः माकेकयीतोभरतस्ततोभूदितिकत्यादित्वात्केकयदुहिताकैकेयीत्यपि तथामाघुक्तः कैकेयिकामाफलितास्तवेतिकालिदासः पुंयोगे किंदेवता अत्रहिसंज्ञाशब्दः स्वभावात्स्त्रियांवर्त्तते नतुपुंवाचकशब्दयोगेअतः किंभानोःस्त्रीभानुः पालकांतान्न पुंयोगेईप् नस्यात् गोपालकस्य स्त्रीगोपालिका सूर्याद्देवतायांचाप् सूर्यशब्दात् पुंयोगेआप्स्यात् देवतार्थेईपोपवादः देवतायां किंसूर्यस्यस्त्रीसूरीमानुषीकुंतीत्यर्थः सूर्यागस्त्ययोरितियलोपः ॥ ॥ ६९ ६९

जातेरयोपधात् जातिवाचकाद्यउपधायस्यसयोपधः नयोपधः अयोपधस्तस्मादयोपधात् अदंतात्स्त्रियामीप्स्यात् जातिलक्षणमाह आकृति ग्रहणा जातिर्लिंगानांचनसर्वभाक् सकृदाख्यातनिर्ग्राह्यागोत्रंचचरणैः सह १ आकृतिग्रहणं यस्याः साआकृतिग्रहणाजातिरुच्यते आकृतिः संस्थानं गृह्यते ऽनेनेतिग्रहणंकरणेल्युट् अवयवसन्निवेशविशेषव्यंग्येत्यर्थः यथातटी तटादेः सर्वलिंगत्वेपि आकृतिग्रहणत्वाज्जातित्वंभवति अनेन लक्षणेनगोत्वादिजातिर्लक्षिताब्राह्मणत्वादिजातिस्तुनलक्षिताब्राह्मणक्षत्रियादीनांह्यवयवसंस्थानस्य सदृशत्वाद् ब्राह्मणादिष्वव्याप्तिवारणायलक्षणांतरमाहचकारोभिन्नक्रमार्थः यासकृदाख्यातनिर्ग्राह्या साजातिरुच्यतेसकृदेकवारमाख्यातोपदिष्टासतीनिर्ग्राह्यानिश्चेतुंशक्यासाजातिरित्यर्थः कीदृशीसा लिंगानांनसर्वभाक् लिंगानामितिकर्मणिषष्ठीसर्वाणिभजतीतिसर्वभाक् यासर्वाणिलिंगानि नभजतीत्यर्थः सर्वशब्दस्यलिंगापेक्षत्वे ऽपिगमकत्वात् भजोण्विप्रत्ययः समासश्च असर्वलिंगत्वेसत्येकस्यांव्यक्तौकथना द्व्यक्त्यंतरे कथनंविना ऽपिसुग्रहाजातिरितिलक्षणांत

जातेरयोपधात् जातिवाचिनो यकारोपधादकारान्तात्स्त्रियामीप् प्रत्ययो भवति महिषी हंसी योपधात्तु क्षत्रिया वैश्या क्वचिन्न बलाका ॥ ॥

रंयथावृषली एकस्यांहिव्यक्तौवृषलत्वेकथिते तदपत्यतत्सहोदरादौकथनंविना ऽपिवृषलत्वस्यसुग्रहः सकृदित्यादि किं देवदत्तायस्यांहिव्यक्तौदेवदत्तत्वंकथ्यते तत्समकालमन्यादेवदत्तव्यक्तिरप्रसिद्धेतिनदेवदत्तत्वंजातिः उक्तलक्षणद्वयरहितत्वात् तृतीयलक्षणमाह चरणैस्सह गोत्रं जातिरुच्यतेचरणशब्देनशाखाध्येतारउच्यंतेगोत्रशब्देनापत्यमुच्यते अपत्यप्रत्ययांतः शाखाध्येतृवाचकशब्दो जातिवाचकइत्यर्थः गोत्रस्यानाकृतिग्रहणत्वात् सर्वलिंगत्वाच्च पृथगुपादानंचरणशब्दस्त्वध्ययनक्रियासंबंधेनप्रवृत्तत्वात् क्रियाशब्दाएवजातिशब्दाइतिचरण ग्रहणं कृतंआकृतिग्रहणायथामहिषी हंसीअसर्वलिंगायथाब्राह्मणीवृषलीगोत्रलक्षणा यथाऔपगवी पैतृष्वस्रीयोऽण्णं तसीपंपरत्वादयंबाधतेइतिभावः चरणलक्षणायथा कठेनप्रोक्तमधीयानाकठीकारिकादित्यण् प्रत्ययस्तस्यलुक्च अतइ ञ्विं तित्तिरिः गौः क्वचिन्नयः शब्दोजातिवा- ९४

चीअयोपधः स्त्रियांनियतश्चततोनेप् भवतीत्यर्थः बलाकाबिसकंठिकेत्यमरः गवयहयमुकयमनुष्यमत्स्यानामनिषेधः योपधेभ्योप्येभ्यईप्
स्यात् हसान्ततद्धितयस्योपिलोपः हसात्परस्य तद्धितयकारस्यलोपः स्यादीपियस्येत्यलोपः मनुषीः ईपिमत्स्यस्ययलोपः मत्स्यशब्दस्ययकारस्यलोपः
स्या ङीपियस्येत्यलोपः मत्सी सूर्यागस्त्ययोरीपेईपिच अनयोर्यकारस्यलोपः स्यात् ईयप्रत्ययेईप्प्रत्ययेच सूरीयः सूरी अगस्तीयः अगस्तीतिष्य
पुष्ययोर्नक्षत्राणि यलोपः अनयोर्यकारस्यलोपः स्यात् नक्षत्रसंबंधीयोऽण्सनक्षत्राण् नक्षत्रेणयुक्तः कालइत्यऽण् नक्षत्रेभवइत्यण च तस्मिन्
परतः तिष्येणयुक्तः कालस्तैषः पुष्येणयुक्तः कालः पौषः तथातिष्येभवस्तैषः पुष्येभवः पौषः स्त्रियां ऽणईबितीप् यस्येत्यलोपः तैषी पौषीपा
णिनिसूत्रम् जानपदकुंडगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणा स्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाके

गवयहयमुकयमनुष्यमत्स्यानामनिषेधः गवयी हयी मुकयी हसांततद्धितयस्योपिलोपः मनुषीमत्स्यस्ययलोपः मत्सी सूर्या-
गस्त्ययोरीपेईपिच सूरीअगस्तीतिष्यपुष्ययोर्नक्षत्राणियलोपः तैषीपौषी जानपदादिभ्योऽर्थविशेषेईप् जानपदी वृत्तिश्चेत्
अन्याजानपदी कुंडीअमत्रंचेत् कुंडान्या गोणीआवपनंचेत् गोणान्या स्थलीअकृत्रिमायास्थालान्या भाजीश्राणाचेत् भाजान्याना
गीस्थूलाचेत् नागान्याकालीवर्णश्चेत् ॥ ॥

शवेशेपु एभ्यएकादशेभ्यएष्वर्थे ङीप्स्यात् जनपददेशेभवाजानपदीभवार्थेअण्वर्तते
अन्येति वृत्तिर्जीविकाचेद्यदि अन्याप्येवंजानपदीवृत्त्यभावे आद्युदात्तइतिस्वरेभेदः अस्त्रीकमडलुः कुंडीत्यमरः अमत्रंपात्रं कुंडी विषयत्वाभावाद-
प्राप्त ईप्विधीयते अन्याकुंडाकुंडि दाहे अस्माद्गुरोर्हसादित्यङ् प्रत्ययेरूपम् यस्तु अमृतेजारजः कुंडइतिमनुष्यजातिवाचीकुंडशब्दस्ततोजा-
तिलक्षणईप् भवत्येव ओप्यंते निक्षिप्यंते धान्यं यस्मिन् तदावपनंगोणी आङ्पूर्वाद्वपे रधिकरणेल्युट् अन्यागोणेति यथेच्छंनाम अकृत्रिमापुरुषे
णासंस्कृताभूमिः स्थली पुरुषकृतातु स्थलापुष्पाचेत् नागीअन्यानागावर्णयुक्ताचेत्काली अन्या ॥ ॥ छ छ
छ छ छ छ छ छ

कालाअनाच्छादनं चेन्नीली औषधिविशेषः प्राणिनितुनीलीगौः आच्छादनेतु नीलाशाटी अयसोलोहस्यविकारः अयोविकारः फाल इतिप्र-
सिद्धः तत्रकुशी अन्याकुशा वेदे औदुंबरशंकुं कुशाइतिव्यवहरंति वल्गावसेपर्णीकुशेति हैमकोशे मैथुनेच्छायां सुरतवांछायां कामुकी वनादिकंका
मयितुं शीलयस्याः साकामुकाषाकाकण् इत्युकण् केशविन्यासे केशरचनायां कबरी अन्याकबराचित्रेत्यर्थः शोणाद्वाशोणशब्दाद्वाङीप् स्यात् शो
णः कोकनदच्छवि रित्यमरः बहुव्रीहेर्जोतिपूर्वात् क्तांतात् जातिवाचिपूर्वपदात् क्तांताद दंताद्बहुव्रीहेः स्त्रियामीप् भिन्नावूरूयस्या इतिबहुव्री
हौभिन्नशब्दस्यबहुव्रीहौविशेषणसप्तम्यंतक्तांतानामितिपूर्वनिपाते प्राप्तेक्वचिन्नेति परनिपातः जातांतान्न जातशब्दांताद्बहुव्रीहेर्जोतिवा-

कालान्यानीली औषधिप्राणिनोर्नीलान्या संज्ञायांवानीलानीली कुशीअयोविकारे कुशान्या कामुकी मैथुनेच्छायांकामुका
न्याकबरी केशविन्यासे कबरान्या शोणाद्वा शोणीशोणा बहुव्रीहेर्जोतिपूर्वात् क्तांतात् उरुभिन्नी जातांतान्न दंतजाता अस्वां
गपूर्वपदाद्वा सुरापीतीसुरापीता पाणिगृहीती भार्यायां अन्यापाणिगृहीता क्रीतांतात्करणादेः वस्त्रक्रीती क्वचिन्न धनक्रीता
क्तांतादल्पत्वे अभ्रलिप्तीद्यौः ॥ ॥

चिपूर्वपदादीप् नदंता जातायस्याः सा दंतजाता अस्वांगपूर्वपदाद्वा अस्वांगवाचि-
पूर्वपदात् क्तांताददंताद्बहुव्रीहेः स्त्रियां वेप् स्यात् पीतासुरा यथासासुरापीता क्वचिन्नेति क्तांतस्य परनिपातः बहुव्रीहेर्जोतिपूर्वपदादित्यनेननि
त्येप्राप्ते विकल्पार्थमेतत् पाणिगृहीती भार्यायां यस्याः पाणिरग्निसाक्षिको गृह्यते तस्यांवाच्यायां पाणिगृहीतशब्दादीप् स्यात् अन्येतिकौतुकादि
नापाणिर्गृहीतोयस्यादासादेः सापाणिगृहीता क्रीतांतात्करणादेः आदिशब्दोत्यवयववचनः करणमादिरवयवो यस्य तस्मात् करणादेरेकपदा-
दित्यर्थः क्रीतांताददंतात् करणादेः स्त्रियामीप् स्यात् वस्त्रेण क्रीतेति वस्त्रक्रीती करणादेरिति किं गवाक्रीता अश्वेनक्रीता क्तांतादल्पत्वे करणा
देः क्तांताददंतात्स्त्रियामीप् स्याद् अल्पत्वे द्योत्ये अभ्रैरल्पैर्लिप्तेति अभ्रलिप्ती ॥ ॥ ६५ ६५

देवतेदमर्थे देवता चइदमं च अनयोः समाहारो देवतेदं देवतेदं चासौ अर्थश्च देवतेदमर्थस्तस्मिन् देवतेदमर्थे त्यज्यमानद्रव्ये उद्देश्यविशेषो देवता द्वंद्वांते श्रूयमा
णत्वात्प्रत्येकमर्थशब्दः संबध्यते देवतार्थे इदमर्थे च उक्ता वक्ष्यमाणा श्च प्रत्ययाः स्युः अण् इञ् ण्यः आयनण् ण्यण् णीय आरण् रारण् इञ्चण् ऐरण् एते उक्तप्र-
त्ययाः इन्द्रो देवता अस्येति ऐंद्रं हविः अत्र प्रथमांतात्प्रत्ययो देवतास्येति षष्ठ्यर्थे अन्योक्ते प्रथमेति तद्धितेनोक्ते संबंधे प्रथमा स्त्रियां तु त्रणईप् ऐंद्री दिक् सोमो देव
ताऽस्येति सौम्यं ण्यः नदादित्वादीप् सौमी ऋक् हलस्तद्धितस्येपीति यलोपः अग्निर्देवताऽस्येति आग्नेयं एयण् अणंतत्वादीप् आग्नेयी गृहमेधशब्दोऽदंतः
गृहमेधो देवताऽस्येति गृहमेधीयं गृहमेध्यं वास्तोष्पतिर्देवताऽस्येति वास्तोष्पतीयं वास्तोष्पत्यं वास्तोष्पतिः सुरपतिरित्यमरः वास्तोः पतिः वास्तोष्पतिः वेश्म
भूर्वास्तुरस्त्रियामित्यमरः अग्नीषोमौ देवते अस्येति अग्निषोमीयं अग्नीषोम्यं मरुत्वान् देवताऽस्येति मरुत्वतीयं मरुत्वत्यम् इन्द्रो मरुत्वान्मघवेत्यमरः अपो-
नपादऽपांनपातोरपोनप्तऽपांनप्तृ आदेशौ ईयेययोः एतयोः परतः अपोनप्तृ अपांनप्तृ आदेशौ स्तः अपोनपाद्देवताऽस्येति अपान्नपात् देवताऽस्येति प्रावृष ए

देवतेदमर्थे देवतार्थे इदमर्थे चोक्ता वक्ष्यमाणाश्च प्रत्ययाः इन्द्रो देवताऽस्य ऐन्द्रम् सौम्यम् आग्नेयम् गृहमेधीयं वास्तोष्पतीयम्
अग्नीषोमीयम् मरुत्वतीयम् अपोनपाद पान्नपाद पोनप्तृ अपान्नप्तृ आदेशौ इयेययोः परतः अपोनप्त्रियम् अपान्नप्त्रियम् अ
पान्नप्त्रीयम् प्रावृष एण्यः प्रावृड् देवताऽस्य प्रावृषेण्यं कः प्रजापतिर्देवताऽस्य कायम् क्वचिद्द्वयोः पूर्वोत्तरपदाद्योस्स्वरयोः क्वचि-
द्वृद्धिर्भवति न्निर्णीति आग्निमारुतम्॥

ण्यः अस्मादेण्यप्रत्ययः स्यात् देवतार्थे प्रवर्षतीति प्रावृट् नहिवृतीति दीर्घः जातेऽर्थे तु इक् प्रावृषि जा
तः प्रावृषिकः प्रावृषेण्यः स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा अथ शरत् स्त्रियामित्यमरः कस्येकारांतादेशोऽणि को ब्रह्मा देवताऽस्येति यस्येति लोपाः सरत्वादादि
वृद्धिः आयुकायं हविः क्वचिद्द्वयोः द्वयोरिति षष्ठ्यंतं पदविशेषणं अग्ना मरुतौ देवते अस्येति अग्नेरिदिति वक्ष्यमाणे नेकारादशः उभयत्र वृद्धिः आग्निमारुतम्
अण् साम्यर्थवाचक देवताद्वंद्वे एव पूर्वोत्तरपदादिस्वरवृद्धिविषयकमुदाहरणमेतत् तैनेहन स्कंदविशाखयोरयमिति स्कांदविशाखः अण् पार्वतीनंदनः स्कं
दः इत्यमरः नेन्द्रस्य परस्य उभयत्र प्राप्तौ परस्येंद्रशब्दस्य वृद्धिर्न भवति देवताद्वंद्वे सोमेन्द्रौ देवते अस्येति सौमेंद्रः पशुः अण् परस्येति किम् इंद्राग्नी देवते अस्ये

तिऐन्द्राग्नोऽणयस्येतीकारलोपः दीर्घात्सरस्य वरुणस्य वृद्धिर्न भवति देवता द्वंद्वे इन्द्रावरुणौ देवते अस्येति देवताद्वंद्वे पूर्वस्येत्यात्वं ऐन्द्रावरुणं मित्रावरुणौ देवता अस्येति मैत्रावरुणं अण् दीर्घात्किं अग्नीवरुणौ देवते अस्येति ईदग्नेः सोमवरुणयोरितीत्वं ३७ अग्नेरि द्वन्द्वे अग्निशब्दस्येत्स्यात् वृद्धिमत्युत्तरपदे देवताद्वंद्वे अलौकिके वाक्ये आत्वमत्वं च बाधित्वा इत् विष्णौ परे इत्वं न विष्णुशब्दे परेऽग्निशब्दस्येन्न आग्नावैष्णवम् अण्प्रत्ययः आग्निवारुणं उभयत्र वृद्धिः सुहृदो भावः सौहार्दं अण् सुभगाया अपत्यं सौभागिनेयः ण्यणि नडौ वृद्धी सुभगस्य भावः सौभाग्यं ण्यः सक्तुप्रधानाः सिंधवः सक्तुसिंधवः सक्तुसिंधुषु भवः साक्तुसैंधवः अण् वृद्धी शतेन क्रीतः शतिकः शतिकमनुगतो अनुशातिकः अनुशातिकस्येदं आनुशातिकं अण् वृद्धी इहलोके भवं ऐहलौकिकम् इकः परलोके भवं पारलौकिकं णितो वा अणादयः कादयश्च णितो वा भवन्ति अणादीनां णित्त्वे सिद्धे पक्षे निषेधार्थं वचनं कादीनामणित्वे सिद्धे पक्षे विधानार्थं स च क्वचिन्नित्यनिषेधः क्वचिद्वैक-

अग्नेरिद्वन्द्वो वृद्धिमत्युत्तरपदे अग्नेरिदादेशस्स्यात् आग्निवारुणम् सौहार्दम् सौभागिनेयः सौभाग्यम् साक्तुसैन्धवः आनुशा
तिकम् ऐहलौकिकम् पारलौकिकम् पौर्वाण्हिकम् णितो वा उक्ता वक्ष्यमाणाश्च प्रत्यया णितो वा स्वस्त्रीयः श्वशुरस्यापत्यं श्वाशुर्य्यः
पित्र्यम् गव्यम् पयस्यम् कुल्यम् तदीयम् त्वदीयम् मदीयम् अन्यस्य दक् अन्यदीयम् पितुर्भ्रातरि व्यः पितुर्भ्राता पितृव्यः मा
तुर्भ्रातरि डुलः मातुलः मातृपितृभ्याम्पितरि च डामहच् मातुः पिता मातामहः पितामहः मातुर्माता मातामही पितामही॥ ॥

ल्पिकः क्वचिदनिषेध एव स्वसुरपत्यं स्वस्त्रीयः णीयः श्वशुरस्यापत्यं यस्येत्यलोपः श्वाशुर्यः पितुरिदमिति क्वचित्स्वरव घकार इति स्वरत्वात् रत्वं पित्र्यं ण्यः गोरिदं गव्यं ण्यः स्वरत्वादौ पयसि भवं पयस्यं कुले भवं कुल्यं ण्यः तस्येदं तदीयं तवेदं ममेदं त्वन्मदेकत्वे इति त्वद् मद् त्वदीयं मदीयं अन्यस्य दक् अन्यशब्दस्य दगागमो भवति णीये अषष्ठीतृतीयांतस्यान्यशब्दस्य दगागमो वाच्यः आशीराशास्थाऽऽस्थितोत्सुकोतिकारकरागणीयेषु परतः अन्यदाशीः अन्यदाशा अन्यदास्था अन्यदास्थितः अन्यदुत्सुकः अन्यदूतिः अन्यत्कारकः अन्यद्रा गः अषष्ठीतृतीयांतस्येति किम् अन्यस्यान्येन वा आशीः अन्याशीः कारकणीययोरषष्ठीतृतीयांतस्येति निषेधो न वाच्यः अर्थे परे अन्यस्य वा दक् अन्यदर्थः अन्यार्थः अ
न्यदीयं पितुर्भ्रातरि व्यः पितृशब्दाद्व्यप्रत्ययो भवति भ्रात्रर्थे मातुर्भ्रातरि डुलः मातृशब्दात् डुल्प्रत्ययो भवति भ्रात्रर्थे डित्वात् टिलोपः मातृपितृभ्यां पितरि मातरि च डामहच् आभ्यां डामहच् प्रत्ययः स्यात्॥ ७७ ॥

पित्रर्थे मात्रर्थे च डित्वाट्टिलोपः षित्वात्स्त्रियां ङीष् तद्इतीप् अवेर्दुग्धे सोढदूसमरीसाः अविशब्दादेते प्रत्यया भवंति दुग्धेऽर्थे सकारपाठसामर्थ्यान्नषः अ
विसोढमिति तिलान्निष्फलात्पिंजपेजौ तिलशब्दादेतौ प्रत्ययौ स्तः निष्फलेऽर्थे तिलपिंजः तिलपेजः वंध्यस्तिल इत्यर्थः कारकात् क्रियायुक्ते कारकादणादयः का
दयश्च प्रत्ययाः स्युः कर्ता कर्म च करणं संप्रदानं तथैव च अपादानाधिकरणे इत्याहुः कारकाणि षड् इत्यत्र कारकशब्दः सर्वस्मिन्नपि क्रियासाधने दृष्टः स्वार्थिकः
कारकः संगीत्यत्र तु कर्तृमात्रे दृष्टस्तस्य कस्मान्न ग्रहणं उच्यते अत्राद्यस्यैव ग्रहः अन्यथा कर्तुरित्येवा वक्ष्यत् अथ का क्रिया किंच तद्युक्तं उच्यते व्यापारो भावना सैवो
त्पादना सैव च क्रियेति उक्तं च गुणभूतैरवयवैः समूहः क्रमजन्मनां बुद्ध्या प्रकल्पितो भेदः क्रियेति व्यपदिश्यते ॥ १ ॥ इति स्वभावतो गुणीभूतैरवयवैरवांतरलक्षणैर्यु-

अवेर्दुग्धे सोढदूस मरीसाः अवेर्दुग्धम् अविसोढम् अविदूसम् अविमरीसम् तिलान्निष्फलात्पिञ्जपेजौ ॥ निष्फलस्तिल-
स्तिलपिञ्जः तिलपेजः कारकात् क्रियायुक्ते कारकादण्यते प्रत्ययाः क्रियायुक्ते कर्तरि कर्म्मणि च कुंकुमेन रक्तं कौङ्कुमम् वस्त्रेण
परिवृतो वास्त्रो रथः काम्बलः द्वैपः वैयाघ्रः पाण्डुकम्बलादिनिः पाण्डुकम्बलेन संवीतः पाण्डुकम्बली रथः वसिष्ठेन दृष्टं वासिष्ठं
साम कालेयम् वररुचिना कृतो वाररुचो ग्रन्थः मनुना प्रोक्तो मानवो धर्म्मः मथुराया आगतो माथुरः ग्रामादागतो ग्राम्यः धुरं वहतीति धु
र्य्यः धौरेयः सर्वधुरीणः एकधुरीणः मुखपार्श्वतसोर्लोपः ईयेमुखतो भवम् मुखतीयम् पार्श्वतीयम् ॥ क्तः क्रमजन्मनां क्षणानां समूहः आ

चार्यैः क्रिया व्यपदिश्यते की दृशः संकलनात्मिकया बुद्ध्या भेद एकत्वं प्रकल्पितः तद्युक्तमेतया क्रियया युक्तं क्रिया चोत्पत्त्युत्पादनारूपा उत्पत्तिः फलं उत्पादना व्यापारः व्यापारेण-
युक्तः कर्ता फलेन युक्तं कर्म तस्मिन् क्रियायुक्ते कर्त्तरि कर्म्मणि च तेन रक्तं रागात् रज्यते अनेनेति बाहुलकात् करणे घञ् रागो रंजकद्रव्यं तृतीयांताद्रागवाचकात्स
त्ययारक्तमित्यर्थे कुंकुमेन रक्तं वस्त्रं कौंकुमं रंजनक्रियायाः करणकारकात् कुंकुमादण् तद्युक्तमत्र वस्त्रं कर्मेत्यादि ज्ञेयम् लाक्षया रक्तं लाक्षिकं रोचनया रक्तं रौचनि
कं इकः नील्या रक्तं नीलं अण् णितो वेति न वृद्धिः पीतेन रक्तं पीतकं कः तेन परिवृतो रथः समन्ताद्वेष्टितः परिवृत उच्यते तेनेति तृतीयांतादणादयः परिवृतो रथ इत्यर्थे वा-
स्त्रो रथः अण् कंबलेन परिवृतो रथ कांबलः अण् द्वीपिनो विकारो द्वैपं द्वैपेन परिवृत्तो रथः द्वैः व्याघ्रस्य विकारो वैयाघ्र इद् वृद्धी वैयाघ्रेण परिवृतो वैयाघ्रो रथः ॥ ॥

सिद्धान्त चन्द्रीका लीथोग्राफ
Size– 33·5 x 16·6 Cm

पांडुकंबलादिनिः पांडुकबलशब्दो राजास्तरणपाडुवर्णकंबलस्य वाचकः अस्त्यर्थेनैवसिद्धे वचनमणोनिवृत्त्यर्थं इकारउच्चारणार्थः तेनदृष्टंसामतेनेतितृती-
यांतादणादयः दृष्टंसामेत्यर्थेवासिष्ठंसाम अण् कलिनादृष्टंसामकालेयं एयण् वामदेवेनदृष्टंसामवामदेव्यं ण्यः उशनसादृष्टंसामनिपातनादिलोपोवाऔशनसंऔ
शनं अण् तेनकृतोग्रन्थः तेनेतितृतीयान्तादणादयः कृतोग्रन्थइत्यर्थेवररुचिनाकृतोवाररुचोग्रन्थः तेनप्रोक्तं तेनेतितृतीयान्तादणादयः प्रोक्तमित्यर्थेमनुनाप्रो-
क्तोमानवोधर्मः अण् ततआगतः ततइतिपञ्चम्यंतादणादयः आगतइत्यर्थे माथुरः अण् ग्रामण्यः तद्वहतितदितिद्वितीयांतादणादयोवहतीत्यर्थेधुरंवहति
धुर्य्यः ण्यः णितोवेतिनवृद्धिः य्वोर्विहसेइतिदीर्घोनसंज्ञापूर्वकत्वेनतस्यानित्यत्वात् धौरेयः एयण् सर्वाचासौधूश्चेतिऋक्पूरित्यप्रत्ययः कर्मधारयेइतिपुंवत्
सर्वधुरातांवहतियस्येत्यालोपः सर्वधुरीणः ईनः एकाचासौधूश्चेति एकधुरातांवहतिएकधुरीणः ईनः एकधुरः अण् शकटंवहतिशाकटोगौः अण् हलंव

देवस्वराजजनपराणांकुक् ईये देवकीयम् स्वकीयम् राजकीयम् जनकीयम् परकीयम् मध्यान्मः मध्यमः हेमन्तस्यवातलो
पोऽणि हैमनम् हैमन्तम् चिरपरुत्परारिभ्यस्त्नः चिरत्नम् परुत्नम् परारित्नम् अग्रादिपश्चादन्ताड्डिमः अग्रिमम् आदिमम्
पश्चिमम् अन्तिमम् हेतुमनुष्येभ्योवारूप्यमयटौ समादागतं समरूप्यम् सममयम् समीपम् देवदत्तमयं देवदत्तरूप्यम् देवदत्ती-
यम् ॥ ॥

हतिहालिकः इकः सीरंवहतिसैरिकः इकः रथंवहतिरथ्यः ण्यः युगंवहतियुग्यः ण्यः मुखपार्श्वतसोर्लोपईयेमुखंचपार्श्वंचमुखपार्श्वेमु
खपार्श्वयोस्तसौमुखपार्श्वतसौतयोः षष्ठीनिर्दिष्टत्वात्सलोपः यस्येत्यलोपः मुखतीयं पार्श्वतोभवं पार्श्वतीयं णीयः ६९ ६९ देवस्वराजजनपरा-
णांकुक् ईये एषांकुक् स्यात् णीये देवस्येदं देवकीयम् स्वस्येदं स्वकीयम् राज्ञइदं राजकीयं नाम्नो नोलोपशिति नलोपे कृते पश्चात् कुक् बोध्यः जनस्येदंजनकी
यं परस्येदं परकीयम् मध्यान्मः अस्मान्मः प्रत्ययः स्यात् भवाद्यर्थे मध्येभवो मध्यमः हेमंतस्यवातलोपोऽणि हेमंतादण् स्यात् तस्यलोपश्चवा हेमंतेभवं हैमनं
हैमंतंचा चिरपरुत्परारिभ्यत्नः एभ्यस्त्नप्रत्ययः स्यात् चिरशब्दोऽदन्तः परुदित्यव्ययं पूर्वस्मिन् वत्सरे परारि पूर्वतरेवत्सरेव्ययम् अग्रादिपश्चादंतात् डिमः
एभ्योडिमः प्रत्ययः स्यात् डित्त्वाट्टिलोपः अग्रेभवं अग्रिमं आदौभवं आदिमं पश्चाद्भवं पश्चिमं अंतेभवं अंतिमं हेतुमनुष्येभ्योवारूप्यमयटौ हेतुवाचकेभ्यो·